॥ व्रतरत्नाकरः ॥

प्रथमो भागः

चेन्नपुर्याम्

वाविळ्ळ रामस्वामिशास्त्रुलु अण्ड् सन्स्

इत्येतैः प्रकटितः

चेन्नपुर्याम्
वाविळ्ळ मुद्रणालये
मुद्रितः ॥
१९५०

॥ श्रीः ॥

॥ प्रस्तावना ॥

भो आस्तिकमहाशयाः,

विदाङ्कुर्वन्त्वेतत्तत्रभवन्तो भवन्तः कृपया सावधानमनसः ॥ अस्माभिरान्ध्रलिप्यां मुद्रितो व्रतरत्नाकराख्यो ग्रन्थो भाष्यगद्ययात्मकः सकलास्तिकजनैराद्रियमाणो विजयतेतराम् ॥ तादृशो ग्रन्थो नागराक्षरैर्मुद्रापितव्य इति धिया द्रविडदेशीयैरुपयोज्यमानव्रतकल्पचिन्तामणि, व्रतचूडामणि, कल्पमञ्जर्यादिग्रन्थान् परिशील्य विशेषविषयान् संयोज्य उपाध्यायानपेक्षं स्वयमेव पूजादीन् कर्तुं सौलभ्याय प्रतिमन्त्रमुद्दिष्टदेवतानामनिर्देशादिपूर्वकं सुष्ठायसाक्षरैः संमुद्य प्रकाशितः ॥ तत्र तत्र ऋच उपयुक्ताः संपूर्णतया मुद्रापिताः ॥ फलश्रुतिप्रतिपादिकाः कथाश्च संयोजिताः ॥ पूजाविधानं पृथक्पृथक् विविच्य मुद्रापितम् ॥

व्रतरत्नाकरोऽयं रत्नाकर इव व्रताचरणतत्पराणां चिन्तितार्थान् रत्नानीव ददात्वति शम् ॥

इत्थं

चेन्नपुरी
१५-२-१९२८ } वाविळ्ल-रामस्वामिशास्त्रुलु अण्ड् सन्स्.

अद्य पुनरिदं मुद्रणं द्वितीयं भवति। अस्यानादर एवास्तिकानां बहोः कालात्परं पुनर्मुद्रणे कारणं भवति। अत्यावश्यकत्वादस्य सर्वेषामप्यत्रात्यादरो भवितव्यः इति प्रार्थयामो वयम् ॥

इत्थं

चेन्नपुरी
९-१-१९५० } वाविळ्ल-रामस्वामिशास्त्रुलु अण्ड् सन्स्.

॥ श्रीरस्तु ॥

॥ विषयसूचिका ॥

॥ श्रीरस्तु ॥

॥ व्रतरत्नाकरः ॥

॥ विनायकव्रतम् ॥

आचम्य, प्राणानायम्य,

श्लो. शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम्।
प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये ॥

अयं मुहूर्तः सुमुहूर्तोऽस्त्विति भवन्तो महान्तोऽनुगृह्णन्तु । (इति कर्ता ब्राह्मणान् प्रार्थयेत्)

विनायकचतुर्थीव्रतनिर्णयः—अथ भाद्रपदशुक्लचतुर्थ्यां सिद्धिवैनायकव्रतम्—हेमाद्रौ स्कान्दे । तच्च मध्याह्नव्यापिन्यां कार्यं । 'प्रातः शुक्लतिलैः स्नात्वा मध्याह्ने पूजयेन्नृप । पार्थिवस्य गणेशस्य तत्रैव पूजनं चरेत्" ॥ इति ॥ दिनद्वये तद्व्याप्तौ एकदेशव्याप्तौ वा पूर्वा । अन्यथा परा । "चतुर्थी गणनाथस्य मातृविद्धा प्रशस्यते । मध्याह्नव्यापिनी सा तु परतश्चेत्परेऽहनि ॥" इति बृहस्पत्युक्तेः ॥ (मातृविद्धा=तृतीयाविद्धा). स्मृत्यन्तरेऽपि—"मातृविद्धा प्रशस्ता स्याच्चतुर्थी गणनायके । मध्याह्ने परतश्चेत्स्यान्नागविद्धा प्रशस्यते ॥" इति ॥ नागविद्धा=पञ्चमीविद्धेत्यर्थः ॥

तदेव लग्नं सुदिनं तदेव ताराबलं चन्द्रबलं तदेव ।
विद्याबलं दैवबलं तदेव लक्ष्मीपते तेंऽघ्रियुगं स्मरामि ॥

यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः ।
तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम ॥

अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते ।
तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम् ॥

स्मृते सकलकल्याणभाजनं यत्र जायते ।
पुरुषं तमजं नित्यं व्रजामि शरणं हरिम् ॥

सर्वदा सर्वकार्येषु नास्ति तेषाममङ्गलम् ।
येषां हृदिस्थो भगवान् मङ्गलायतनं हरिः ॥

लाभस्तेषां जयस्तेषां कुतस्तेषां पराभवः ।
येषामिन्दीवरश्यामो हृदयस्थो जनार्दनः ॥

आपदामपहर्तारं दातारं सर्वसंपदाम् ।
लोकाभिरामं श्रीरामं भूयोभूयो नमाम्यहम् ॥

॥ विनायकप्रार्थना ॥

सुमुखश्चैकदन्तश्च कपिलो गजकर्णकः ।
लम्बोदरश्च विकटो विघ्नराजो गणाधिपः ॥

धूमकेतुर्गणाध्यक्षः फालचन्द्रो गजाननः ।
वक्रतुण्डः शूर्पकर्णो हेरम्बस्स्कन्दपूर्वजः ॥

षोडशैतानि नामानि यः पठेच्छृणुयादपि ।
विद्यारम्भे विवाहे च प्रवेशे निर्गमे तथा ॥

संग्रामे सर्वकार्येषु विघ्नस्तस्य न जायते ।

अभीप्सितार्थसिद्ध्यर्थं पूजितो यस्सुरैरपि ।
सर्वविघ्नच्छिदे तस्मै श्रीगणाधिपतये नमः ॥

ओं दैवी गायत्री छन्दः प्राणायामे विनियोगः. ओं भूः, ओं भुवः, ओं सुवः, ओं महः, ओं जनः, ओं तपः, ओं सत्यं, ओं तत् सवितुर्वरेण्यं, भर्गो देवस्य धीमहि, धियो यो नः प्रचोदयात्, ओमापो ज्योतीरसोऽमृतं ब्रह्म भूर्भुवस्सुवरोम् ॥

मम उपात्तसमस्तदुरितक्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थं शुभे शोभने मुहूर्ते, आद्यब्रह्मणः द्वितीयपरार्धे, श्वेतवराहकल्पे वैवस्वतमन्वन्तरे कलियुगे, प्रथमपादे, जम्बूद्वीपे, भारतवर्षे, भरतखण्डे, शकाब्दे, मेरोः दक्षिणदिग्भागे, समस्तदेवताब्राह्मणसन्निधौ, वर्तमाने व्यावहारिके चान्द्रमानेन प्रभवादिषष्टिसंवत्सराणां मध्ये...नामवत्सरे ...अयने...ऋतौ...मासे...पक्षे...तिथौ...वासरयुक्तायां एवं गुणविशेषणविशिष्टायामस्यां शुभतिथौ अस्माकं सहकुटुंबानां क्षेमस्थैर्यधैर्यविजयायुरारोग्यैश्वर्याभिवृद्ध्यर्थं धर्मार्थकाममोक्षचतुर्विधफलपुरुषार्थसिद्ध्यर्थं पुत्रपौत्राभिवृद्ध्यर्थं इष्टकाम्यार्थसिद्ध्यर्थं मनोवाञ्छाफलसिद्ध्यर्थं समस्तदुरितोपशान्त्यर्थं समस्तमङ्गलावाप्त्यर्थं वरसिद्धिविनायकमुद्दिश्य वरसिद्धिविनायकप्रीत्यर्थं कल्पोक्तप्रकारेण यावच्छक्तिध्यानावाहनादिषोडशोपचारपूजां करिष्ये ॥ (इति पात्रस्थ जलं स्पृशेत्)

आदौ निर्विघ्नेन परिसमाप्त्यर्थं गणाधिपतिपूजां करिष्ये । तदंगत्वेन कलशपूजां करिष्ये । कलशं गन्धपुष्पाक्षतैरभ्यर्च्य ।

कलशस्य मुखे विष्णुः कण्ठे रुद्रः समाश्रितः ।
मूले तत्र स्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः ॥
कुक्षौ तु सागराः सर्वे सप्त द्वीपा वसुन्धरा ।
ऋग्वेदोऽथ यजुर्वेदः सामवेदो ह्यथर्वणः ॥
अङ्गैश्च सहिताः सर्वे कलशाम्बु समाश्रिताः ।
आयान्तु देवपूजार्थं दुरितक्षयकारकाः ॥
गङ्गे च यमुने चैव गोदावरि सरस्वति ।
नर्मदे सिंधु कावेरि जलेऽस्मिन् सन्निधिं कुरु ॥

मन्त्रः—आपो वा इदगूँ सर्वं विश्वा भूतान्यापः प्राणा वा आपः पशव आपोऽन्नमापोऽमृतमापस्सम्राडापो विराडापस्स्वराडापश्छन्दागूँस्यापो ज्योतीगूँष्यापो यजूगूँष्यापस्सत्यमापस्सर्वा देवता आपो भूर्भुवस्सुवराप ओम् ॥ कलशोदकेन पूजाद्रव्याणि देवमण्टपमात्मानं संप्रोक्ष्य ॥

॥ गणाधिपतिपूजा ॥

आदौ निर्विघ्नेन परिसमाप्त्यर्थं गणाधिपतिपूजां करिष्ये ॥

गणानां त्वा गणपतिगूँ हवामहे कविं कवीनामुपमश्रवस्तमं । ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत आनश्शृण्वन्नूतिभिस्सीदसादनम् ॥ महागणाधिपतिं ध्यायामि, महागणाधिपतिं आवाहयामि ।

महागणाधिपतये आसनं समर्पयामि
,, अर्घ्यं समर्पयामि
,, पाद्यं समर्पयामि
,, आचमनीयं समर्पयामि

महागणाधिपतये औपचारिकस्नानं समर्पयामि
,, स्नानानन्तरं आचमनीयं समर्पयामि
,, वस्त्रार्थं अक्षतान् समर्पयामि
,, यज्ञोपवीतार्थं अक्षतान् समर्पयामि
,, गंधान् धारयामि
,, गंधस्योपरि अलंकरणार्थं अक्षतान् समर्पयामि

पुष्पैः पूजयामि, ॐ सुमुखाय नमः, एकदन्ताय नमः, कपिलाय नमः, गजकर्णिकाय नमः, लम्बोदराय नमः, विकटाय नमः, विघ्नराजाय नमः, गणाधिपाय नमः, धूमकेतवे नमः, गणाध्यक्षाय नमः, फालचन्द्राय नमः, गजाननाय नमः, वक्रतुंडाय नमः, शूर्पकर्णाय नमः, हेरम्बाय नमः, स्कन्दपूर्वजाय नमः, महागणाधिपतये नमः, नानाविधपरिमलपुष्पाणि समर्पयामि। धूपार्थं अक्षतान् समर्पयामि। महागणाधिपतये दीपार्थं अक्षतान् समर्पयामि। ॐ...यात्, देव सवितः प्रसुव। सत्यं त्वर्तेन परिषिंचामि। अमृतमस्तु, अमृतोपस्तरणमसि, स्वाहा ॐ प्राणायस्वाहा ॐ अपानाय स्वाहा ॐ व्यानाय स्वाहा ॐ उदानाय स्वाहा ॐ समानाय स्वाहा ॐ ब्रह्मणे स्वाहा। ब्रह्मणि म आत्माऽमृतत्वाय॥ महागणाधिपतये...निवेदनं समर्पयामि, महागणाधिपतये मध्ये मध्ये पानीयं समर्पयामि, महागणाधिपतये तांबूलं समर्पयामि, महागणाधिपतये नीराजनं समर्पयामि, नीराजनानन्तरं आचमनीयं समर्पयामि॥

वक्रतुंड महाकाय कोटिसूर्यसमप्रभ। अविघ्नं कुरु मे देव सर्वकार्येषु सर्वदा॥ महागणाधिपतये नमः मन्त्रपुष्पं समर्पयामि॥ महा-

गणाधिपतये नमः आत्मप्रदक्षिणनमस्कारान् समर्पयामि ।। सर्वोपचार-पूजाः समर्पयामि ।। यस्य स्मृत्या च नामोक्त्या तपःपूजाक्रियादिषु । न्यूनं संपूर्णतां याति सद्यो वन्दे तमच्युतम् । मन्त्रहीनं क्रियाहीनं भक्तिहीनं गणाधिप । यत्पूजितं मया देव परिपूर्णं तदस्तु ते ।। अनया षोडशोपचारपूजया भगवान् सर्वदेवात्मकः श्रीमहागणाधिपतिः सुप्रीतः सुप्रसन्नो वरदो भवतु ।। मम इष्टकाम्यार्थफलसिद्धिरस्तु ।। गणाधिपतिप्रसादं शिरसा गृह्णामि ।।

तदङ्गत्वेन (फलसिद्धिविनायक) प्राणप्रतिष्ठापनं करिष्ये इति उद्दिष्टदेवतानामोच्चारयेत् ।।

।। प्राणप्रतिष्ठापनम् ।।

अस्य श्री (वरसिद्धिविनायक) प्राणप्रतिष्ठापनमहामन्त्रस्य ब्रह्म-विष्णुमहेश्वरा ऋषयः । ऋग्यजुस्सामाथर्वाणि छंदांसि । प्राणशक्तिः परा देवता । ह्रां बीजं ह्रीं शक्तिः ह्रूं कीलकम् मम (वरसिद्धिविनायक) प्राणप्रतिष्ठासिद्ध्यर्थे जपे विनियोगः.

करन्यासः	अङ्गन्यासः
ह्रां अंगुष्ठाभ्यां नमः	ह्रां हृदयाय नमः
ह्रीं तर्जनीभ्यां नमः	ह्रीं शिरसे स्वाहा
ह्रूं मध्यमाभ्यां नमः	ह्रूं शिखायै वषट्
ह्रैं अनामिकाभ्यां नमः	ह्रैं कवचाय हुम्
ह्रौं कनिष्ठकाभ्यां नमः	ह्रौं नेत्रत्रयाय वौषट्
ह्रः करतलकरपृष्ठाभ्यां नमः	ह्रः अस्त्राय फट्

भूर्भुवस्सुवरोमिति दिग्बन्धः ।।

॥ ध्यानम् ॥

श्लो. रक्ताम्भोधिस्थपोतोल्लसदरुणसरोजाधिरूढा कराब्जैः
पाशं कोदण्डमिक्षूद्भवमणिगणमप्यङ्कुशं पञ्च बाणान् ।
बिभ्राणासृक्कपालं त्रिनयनलसिता पीनवक्षोरुहाढ्या
देवी बालार्कवर्णा भवतु सुखकरी प्राणशक्तिः परा नः ॥

ह्रां ह्रीं क्रों य र ल व श ष स होम् ॐ (वरसिद्धिविनायक) प्राणः मम प्राणः (वरसिद्धिविनायक) जीवः मम जीवः वाङ्मनः-श्रोत्रजिह्वाघ्राणैः उच्छ्वासरूपेण बहिरागत्य अस्मिन् बिम्बे (अस्मिन् कलशे) (अस्यां प्रतिमायाम्) सुखेन चरन् तिष्ठतु स्वाहा ॥

मन्त्रः—असुनीते पुनरस्मासु चक्षुः पुनः प्राणमिह नो धेहि भोगम् । ज्योक्पश्येम सूर्यमुच्चरन्तमनुमते मृडयानस्स्वस्ति । अमृतं वै प्राणा अमृतमापः प्राणानेव यथास्थानमुपह्वयते ॥

स्वामिन् सर्वजगन्नाथ यावत्पूजावसानकम् ।
तावत्त्वं प्रीतिभावेन बिम्बेऽस्मिन् सन्निधिं कुरु ॥

आवाहितो भव, स्थापितो भव, सुप्रसन्नो भव, वरदो भव, अवकुण्ठितो भव, स्थिरासनं कुरु, प्रसीद प्रसीद प्रसीद.

मन्त्रः—आ त्वा वहन्तु हरयस्सचेतसश्श्वेतैरश्वैस्सह केतुमद्भिः । वाताजवैर्बलवद्भिर्मनोजवैरायाहि शीघ्रं मम हव्याय शर्वोम् ॥ इत्यक्षतान् पुष्पाणि देवतोपरि निक्षिपेत् ॥ यत्किञ्चिन्निवेदनं कुर्यात् ॥

प्राणप्रतिष्ठापनविधिः सम्पूर्णः ॥

॥ पूजाप्रारंभः ॥

अथ वरसिद्धिविनायकपूजाविधानम् ॥

श्लो. भवसञ्चितपापौघविध्वंसनविचक्षणम् ।
विघ्नान्धकारभास्वन्तं विघ्नराजमहं भजे ॥

एकदन्तं शूर्पकर्णं गजवक्त्रं चतुर्भुजम् ।
पाशाङ्कुशधरं देवं ध्यायेत्सिद्धिविनायकम् ॥

उत्तमं गणनाथस्य व्रतं संपत्करं शुभम् ।
भक्ताभीष्टप्रदं तस्माद्ध्यायेत्तं विघ्ननायकम् ॥

ध्यायेद्गजाननं देवं तप्तकाञ्चनसन्निभम् ।
चतुर्भुजं महाकायं सर्वाभरणभूषितम् ॥

श्रीवरसिद्धिविनायकं ध्यायामि ॥

श्लो. अत्रागच्छ जगद्वन्द्य सुरराजार्चितेश्वर ।
अनाथनाथ सर्वज्ञ गौरीगर्भसमुद्भव ॥

श्रीवरसिद्धिविनायकं आवाहयामि ॥

श्लो. मौक्तिकैः पुष्यरागैश्च नानारत्नैर्विराजितम् ।
रत्नसिंहासनं चारु प्रीत्यर्थं प्रतिगृह्यताम् ॥

श्रीवरसिद्धिविनायकाय आसनं समर्पयामि ॥

श्लो. गौरीपुत्र नमस्तेऽस्तु शङ्करप्रियनंदन ।
गृहाणार्घ्यं मया दत्तं गन्धपुष्पाक्षतैर्युतम् ॥

श्रीवरसिद्धिविनायकाय अर्घ्यं समर्पयामि ॥

श्लो. गजवक्त्र नमस्तेऽस्तु सर्वाभीष्टप्रदायक ।
भक्त्या पाद्यं मया दत्तं गृहाण द्विरदानन ॥
श्रीवरसिद्धिविनायकाय पाद्यं समर्पयामि ॥

श्लो. अनाथनाथ सर्वज्ञ गीर्वाणवरपूजित ।
गृहाणाचमनं देव भक्त्या दत्तं मया प्रभो ॥
श्रीवरसिद्धिविनायकाय आचमनीयं समर्पयामि ॥

श्लो. दधिक्षीरसमायुक्तं मध्वाज्येन समन्वितम् ॥
मधुपर्कं गृहाणेदं गजवक्त्र नमोऽस्तु ते ॥
श्रीवरसिद्धिविनायकाय मधुपर्कं समर्पयामि ॥

श्लो. स्नानं पञ्चामृतैर्देव गृहाण गणनायक ।
अनाथनाथ सर्वज्ञ गीर्वाणगणपूजित ॥
श्रीवरसिद्धिविनायकाय पञ्चामृतस्नानं समर्पयामि ॥

॥ पञ्चामृतस्नानमन्त्राः ॥

१. पयः—आप्यायस्व समेतु ते विश्वतस्सोमवृष्णियं । भवा वाजस्य संगधे ॥ श्री···नायकं क्षीरेण स्नपयामि ॥

२. दधि—दधि क्राव्णो अकार्षं जिष्णोरश्वस्य वाजिनः । सुरभि नो मुखाकरत्प्रण आयूँषि तारिषत् ॥ श्रीवरसिद्धिविनायकं दध्ना स्नपयामि ॥

३. घृतम्—शुक्रमसि ज्योतिरसि तेजोऽसि देवो वस्सवि-

तोपुनात्वच्छिद्रेण पवित्रेण वसोस्सूर्यस्य रश्मिभिः ।। श्रीवर···यकं आज्येन स्नपयामि ।।

४. मधु—मधु वाता ऋतायते मधु क्षरन्ति सिंधवः ।। माध्वीर्नस्सन्त्वोषधीः ।। श्रीवर···यकं मधुना स्नपयामि ।।

५. शर्करा—स्वादुः पवस्व दिव्याय जिन्वने स्वादुरिन्द्राय सुहवे तु नाम्ने स्वादुर्मित्राय वरुणाय वायवे बृहस्पतये मधुमाँ् अदाभ्यः ।। श्रीवर···यकं शर्करया स्नपयामि ।।

फलोदकम्—याः फलिनीर्या अफला अपुष्पा याश्च पुष्पणीः । बृहस्पतिप्रसूतास्ता नो मुञ्चन्त्वगूँहसः ।। श्रीवर···यकं फलोदकेन स्नपयामि ।।

श्लो. गङ्गादिसर्वतीर्थेभ्य आहृतैरमलैर्जलैः ।
स्नानं कुरुष्व भगवन्नुमापुत्र नमोऽस्तु ते ।।

मन्त्रः—आपोहिष्ठामयोभुवः । ता न ऊर्जे दधातन । महेरणाय चक्षसे । यो वश्शिवतमो रसः । तस्य भाजयतेह नः । उशतीरिव मातरः । तस्मा अरं गमाम वः । यस्य क्षयाय जिन्वथ । आपो जनयथा च नः ।।

श्रीवरसिद्धिविनायकस्वामिने नमः स्नानं समर्पयामि ।।

श्लो. रक्तवस्त्रद्वयं चारु देवयोग्यं च मङ्गलम् ।
शुभप्रद गृहाण त्वं लम्बोदर हरात्मज ।।

मन्त्रः—अभिवस्त्रा सुवसनान्यर्षाभिधेनोस्सुदुघाः पूयमानाः ।
अभिचन्द्रा भर्तवेनो हिरण्योऽभ्यश्वान् रथिनो देव सोम ॥
श्रीवर···य वस्त्रयुग्मं समर्पयामि ॥

श्लो. राजतं ब्रह्मसूत्रं च काञ्चनं चोत्तरीयकम् ।
गृहाण देव सर्वज्ञ भक्तानामिष्टदायक ॥

मन्त्रः—यज्ञोपवीतं परमं पवित्रं प्रजापतेर्यत्सहजं पुरस्तात् ।
आयुष्यमग्र्यं प्रतिमुञ्च शुभ्रं यज्ञोपवीतं बलमस्तु तेजः ॥
श्रीवर···य यज्ञोपवीतं समर्पयामि ॥

श्लो. चन्दनागरुकर्पूरकस्तूरीकुङ्कुमान्वितम् ।
विलेपनं सुरश्रेष्ठ प्रीत्यर्थं प्रतिगृह्यताम् ॥

मन्त्रः—गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् ।
ईश्वरीँग्ँ सर्वभूतानां तामिहोपह्वये श्रियम् ॥
श्रीवर···यकाय गंधान् धारयामि ॥

श्लो. अक्षतान् धवलान् दिव्यान् शालीयांस्तण्डुलान् शुभान् ।
गृहाण परमानन्द शंभुपुत्र नमोऽस्तु ते ॥

मन्त्रः—आयने ते परायणे दूर्वा रोहन्तु पुष्पिणीः ।
ह्रदाश्च पुण्डरीकाणि समुद्रस्य गृहा इमे ॥

श्रीवर···काय अलंकरणार्थं अक्षतान् समर्पयामि ॥

श्लो. सुगन्धीनि च पुष्पाणि जातीकुन्दमुखानि च ।
एकविंशतिपत्राणि संगृहाण नमोऽस्तु ते ॥

श्रीवर...नायकं पुष्पैः पूजयामि ॥

॥ अथांगपूजा ॥

गणेशाय नमः पादौ पूजयामि	पाशहस्ताय नमः हस्तान् पूजयामि
एकदंताय नमः गुल्फौ ,,	चतुर्भुजाय नमः बाहून् ,,
शूर्पकर्णाय नमः जानुनी ,,	गजवक्त्राय नमः वक्त्रं ,,
विघ्नराजाय नमः जङ्घे ,,	एकदन्ताय नमः दन्तान् ,,
*आखुवाहनाय नमः ऊरू ,,	विघ्नहन्त्रे नमः नेत्रे ,,
हेरम्बाय नमः कटिं ,,	शूर्पकर्णाय नमः कर्णौ ,,
लम्बोदराय नमः उदरं ,,	फालचन्द्राय नमः ललाटं ,,
गणनाथाय नमः नाभिं ,,	उमापुत्राय नमः नासिकां ,,
विनायकाय नमः वक्षः स्थलं,,	विघ्नहन्त्रे नमः चिबुकं ,,
विघ्नपर्वतदंभोळये नमः पार्श्वौ	शुंडादंडाय नमः ओष्ठौ ,,
गणेशाय नमः हृदयं ,,	हरसूनवे नमः गंडस्थलं ,,
स्थूलकण्ठाय नमः कण्ठं ,,	गुहाग्रजाय नमः कचान् ,,
स्कन्दाग्रजाय नमः स्कन्धौ ,,	सर्वेश्वराय नमः शिरः ,,

विघ्नराजाय नमः सर्वाणि अङ्गानि पूजयामि ॥

---

* ब्रह्मचारिणे इति पाठांतरम्.

॥ अथ एकविंशतिपत्रपूजा ॥

	पूजयामि		पूजयामि
सुमुखाय नमः	माचीपत्रं	वटवे नमः	दाडिमीपत्रं
गणाधिपाय नमः	बृहतीपत्रं	द्विरदाय नमः	आमलकपत्रं
उमासुताय नमः	बिल्वपत्रं	फालचन्द्राय नमः	मरुवकपत्रं
गजाननाय नमः	दूर्वायुग्मं	हेरम्बाय नमः	सिन्धुवारपत्रं
हरसूनवे नमः	दुत्तूरपत्रं	शूर्पकर्णाय नमः	जातीपत्रं
लम्बोदराय नमः	बदरीपत्रं	सुराग्रजाय नमः	गण्डलीपत्रं
गुहाग्रजाय नमः	अपामार्गपत्रं	इभवक्त्राय नमः	शमीपत्रं
गजकर्णाय नमः	तुलसीपत्रं	विनायकाय नमः	भृंगराजपत्रं
एकदन्ताय नमः	चूतपत्रं	सुरसेविताय नमः	अर्जुनपत्रं
विकटाय नमः	करवीरपत्रं	कपिलाय नमः	अर्कपत्रं
भिन्नदन्ताय नमः	विष्णुक्रान्तपत्रं		

श्रीगणेश्वराय नमः एकविंशतिपत्राणि पूजयामि ॥

॥ अथैकविंशतिपुष्पपूजा ॥

पञ्चास्यगणपतये नमः	जाजीपुष्पं	पूजयामि
गणानां गणपतये नमः	सामन्तिकापुष्पं	,,
धीरगणपतये नमः	चंपकपुष्पं	,,
विष्वक्सेनगणपतये नमः	वकुलपुष्पं	,,
आमोदगणपतये नमः	पाटलीपुष्पं	,,
प्रमथगणपतये नमः	पुन्नागपुष्पं	,,
रुद्रगणपतये नमः	द्रोणपुष्पं	,,

विद्यागणपतये नमः	रसालपुष्पं	पूजयामि
विघ्नगणपतये नमः	अमृणाळं समर्पयामि	
दुरितगणपतये नमः	कह्लारपुष्पं	”
भक्तवत्सलगणपतये	कमलपुष्पं	”
कामितार्थप्रदगणपतये नमः	मल्लिकापुष्पं	”
सम्मोहगणपतये नमः	धुत्तूरपुष्पं	”
विष्णुगणपतये नमः	शम्याकपुष्पं	”
ईशान्यगणपतये नमः	अर्कपुष्पं	”
गजास्यगणपतये नमः	करवीरपुष्पं	”
सर्वसिद्धिगणपतये नमः	बिल्वपुष्पं	”
वीरगणपतये नमः	मंदारपुष्पं	”
कन्दर्पगणपतये नमः	केतकीपुष्पं	”
उच्छिष्टगणपतये नमः	पारिजातपुष्पं	”
ब्रह्मगणपतये नमः	दाडिमीपुष्पं	”

अथैकविंशतिदूर्वायुग्मपूजा ॥

“दूर्वायुग्मं पूजयामि” इति प्रतिनाम संयोज्यम्.

गणाधिपाय नमः	एकदन्ताय नमः
पाशांकुशधराय नमः	इभवक्त्राय नमः
आखुवाहनाय नमः	मूषकवाहनाय नमः
विनायकाय नमः	कुमारगुरवे नमः
ईशपुत्राय नमः	कपिलवर्णाय नमः
सर्वसिद्धिप्रदाय नमः	ब्रह्मचारिणे नमः

"दूर्वायुग्मं पूजयामि" ॥

मोदकहस्ताय नमः
सुरश्रेष्ठाय नमः
गजनासिकाय नमः
कपित्थफलप्रियाय नमः
गजमुखाय नमः
सुप्रसन्नायनमः
सुराग्रजाय नमः
उमापुत्राय नमः
स्कन्दप्रियाय नमः

अष्टोत्तरशतनामावलिः ॥

ॐ गजाननाय नमः
गणाध्यक्षाय
विघ्नराजाय
विनायकाय
द्वैमातुराय
द्विमुखाय
प्रमुखाय
सुमुखाय
कृतिने
सुप्रदीपाय १०
सुखनिधये
सुराध्यक्षाय
सुरारिघ्नाय
महागणपतये
मान्याय
महाकालाय
महाबलाय
हेरम्बाय
लम्बजठराय
ह्रस्वग्रीवाय २०
महोदराय
मदोत्कटाय
महावीराय
मन्त्रिणे
मङ्गलस्वराय
प्रमथाय
प्रथमाय
प्राज्ञाय
विघ्नकर्त्रे
विघ्नहन्त्रे ३०
विश्वनेत्रे
विराट्पतये
श्रीपतये
वाक्पतये
शृंगारिणे
आश्रितवत्सलाय
शिवप्रियाय
शीघ्रकारिणे
शाश्वताय
बलाय ४०
बलोत्थिताय
भवात्मजाय
पुराणपुरुषाय
पूष्णे
पुष्करोत्क्षिप्तवारिणे
अग्रगण्याय
अग्रपूज्याय
अग्रगामिने
मन्त्रकृते
चामीकरप्रभाय ५०
सर्वस्मै
सर्वोपास्याय
सर्वकर्त्रे
सर्वनेत्रे
सर्वसिद्धिप्रदाय
सर्वसिद्धये
पञ्चहस्ताय

पार्वतीनन्दनाय	जितमन्मथाय	सरसाम्बुनिधये
प्रभवे	ऐश्वर्यकारणाय	महेशाय
कुमारगुरवे ६०	ज्यायसे	दिव्याङ्गाय
अक्षोभ्याय	यक्षकिन्नरसेविताय	मणिकिङ्किणिमेखलाय
कुञ्जरासुरभञ्जनाय	गङ्गासुताय	समस्तदेवतामूर्तये
प्रमोदात्तायनाय	गणाधीशाय ८०	सहिष्णवे
मोदकप्रियाय	गम्भीरनिनदाय	सततोत्थिताय
कान्तिमते	वटवे	विघातकारिणे
धृतिमते	अभीष्टवरदाय	विष्वग्दृशे १००
कामिने	ज्योतिषे	विश्वरक्षाकृते
कपित्थपनसप्रियाय	भक्तनिधये	कल्याणगुरवे
ब्रह्मचारिणे	भावगम्याय	उन्मत्तवेषाय
ब्रह्मरूपिणे ७०	मङ्गलप्रदाय	अवरजजिते
ब्रह्मविद्यादिदानभुवे	अव्यक्ताय	समस्तजगदाधाराय
जिष्णवे	अपाकृतपराक्रमाय	सर्वैश्वर्यप्रदाय
विष्णुप्रियाय	सत्यधर्मिणे ९०	आक्रान्तचिदचित्प्रभवे
भक्तजीविताय	सख्ये	श्रीविघ्नेश्वराय नमः ॥

श्रीवर...यनमः अष्टोत्तरशतनामपूजां समर्पयामि.

श्लो. दशाङ्गं गुग्गुलोपेतं सुगन्धि सुमनोहरम् ॥
उमासुत नमस्तुभ्यं गृहाण वरदो भव ॥

श्रीवर...,य नमः धूपमाघ्रापयामि

मन्त्रः—धूरसि धूर्व धूर्वन्तं धूर्व तं योऽस्मान् धूर्वति तं धूर्वयं वयं धूर्वामः ॥

श्लो. साज्यं त्रिवर्तिसंयुक्तं वह्निना द्योतितं मया ।
गृहाण मङ्गलं दीपमीशपुत्र नमोऽस्तु ते ॥

मन्त्रः—उद्दीप्यस्व जातवेदोपघ्नं निर्‌ऋतिं मम ।
पशूँश्च मह्यमावह जीवनं च दिशो दश ।
मानोहिँसीज्जातवेदो गामश्वं पुरुषं जगत् ।
अबिभ्रदग्न आगहि श्रिया मा परिपातय ॥

श्रीवर···य नमः दीपं दर्शयामि ॥ आचमनीयं ॥

सुगंधान् सुकृतांश्चैव मोदकान् घृतपाचितान् ।
नैवेद्यं गृह्यतां देव चणमुद्गैः प्रकल्पितान् ॥
भक्ष्यं भोज्यं च लेह्यं च चोष्यं पानीयमेव च ।
इदं गृहाण नैवेद्यं मया दत्तं विनायक ॥

मन्त्रः—देव सवितः प्रसुव, सत्यं त्वर्तेन परिषिंचामि, अमृतमस्तु, अमृतोपस्तरणमसि, स्वाहा, ओं प्राणाय स्वाहा, अपानाय स्वाहा, व्यानाय स्वाहा, उदानाय स्वाहा, समानाय स्वाहा, ब्रह्मणे स्वाहा.

श्रीवर···काय नमः महानैवेद्यं समर्पयामि ॥

पानीयं पावनं श्रेष्ठं गङ्गादिसरिदाहृतं ।
हस्तप्रक्षालनार्थं त्वं संगृहाण गणाधिप ॥

मध्ये मध्ये पानीयं समर्पयामि ॥ हस्तप्रक्षालनं समर्पयामि ॥ पादप्रक्षालनं समर्पयामि ॥ शुद्धाचमनीयं समर्पयामि ॥

पूगीफलसमायुक्तं नागवल्लीदलैर्युतम् ।

कर्पूरचूर्णसंयुक्तं तांबूलं प्रतिगृह्यताम् ॥

श्रीवर···स्वामिने नमः तांबूलं समर्पयामि ॥

सदानंदद विघ्नेश पुष्कलानि धनानि च ।
भूम्यां स्थितानि भगवन् स्वीकुरुष्व विनायक ॥

श्रीवर···काय नमः सुवर्णपुष्पं समर्पयामि ॥

घृतवर्तिसहस्रैश्च कर्पूरशकलैस्तथा ।
नीराजनं मया दत्तं गृहाण वरदो भव ॥

मन्त्रः—हिरण्यपात्रं मधोः पूर्णं दधाति । मधव्योऽसानीति ॥
एकधा ब्रह्मण उपहरति । एकधैव यजमान आयुस्तेजो दधाति ॥

श्रीवर···काय नमः नीराजनं दर्शयामि ॥ नीराजनानन्तरं आचमनीयं समर्पयामि ॥

गणाधिप नमस्तेऽस्तु उमापुत्राघनाशन ।
विनायकेशतनय सर्वसिद्धिप्रदायक ॥
एकदन्तैकवदन तथा मूषकवाहन ।
कुमारगुरवे तुभ्यमर्पयामि सुमाञ्जलिम् ॥

श्रीवर···काय नमः मन्त्रपुष्पं समर्पयामि ॥

अत्र मन्त्रपुष्पं वदेत् । मन्त्रपुष्पग्रंथात् तान् मन्त्रान् पठेत् ॥

यं ब्रह्म वेदान्तविदो वदन्ति परं प्रधानं पुरुषं तथान्ये ।
विश्वोद्गतेः कारणमीश्वरं वा तस्मै नमो विघ्नविनायकाय ॥

प्रसीद देव देवेश प्रसीद गणनायक ।
प्रदक्षिणं करोमीशपुत्र विघ्नेश सर्वदा ।

प्रदक्षिणं करोमि त्वां मम त्वं सन्निधौ भव ॥

यानि कानि च पापानि जन्मान्तरकृतानि च ।
तानि तानि प्रणश्यन्ति प्रदक्षिणपदेपदे ॥

पापोऽहं पापकर्माहं पापात्मा पापसम्भवः ।
त्राहि मां कृपया देव शरणागतवत्सल ॥

अन्यथा शरणं नास्ति त्वमेव शरणं मम ।
तस्मात्कारुण्यभावेन रक्ष रक्ष विनायक ॥

प्रदक्षिणं करिष्यामि सततं मोदकप्रिय ।
नमस्ते विघ्नराजाय नमस्ते विघ्ननाशन ॥

श्रीवर···काय नमः आत्मप्रदक्षिणनमस्कारान् समर्पयामि ॥

नमस्तुभ्यं गणेशान नमस्ते विघ्ननाशन ।
ईप्सितं मे वरं देहि परत्र च परां गतिम् ॥

विनायक वरं देहि सततं मोदकप्रिय ।
निर्विघ्नं कुरु मे देव सर्वकार्येषु सर्वदा ॥

इति प्रार्थयेत् ॥

स्वर्णपुंखसमायुक्तं मुक्ताजालसमन्वितम् ।
श्वेतपट्टातपत्रं ते प्रददामि गणाधिप ॥

वर···मिने नमः आतपत्रं धारयामि ॥

वज्रवैडूर्यखचितं शरच्चन्द्रसमप्रभम् ।
चमरीमृगवालढ्यं चामरं त्वं गृहाण भोः ॥

वर···काय नमः चामरं वीजयामि ॥

उशीरनिर्मितं देव व्यजनं स्वेदशान्तये ।
प्रददामि गणाध्यक्ष संतुष्टो भव सर्वदा ॥

वर...काय नमः व्यजनं समर्पयामि ॥

आन्दोलिकां समर्पयामि ॥ समस्तराजोपचारान् समर्पयामि ॥

शुभे...शुभतिथौ आचरितशुक्लचतुर्थीव्रतोद्यापनकर्मणि महागणपतिपूजान्ते क्षीरार्घ्यप्रदानं करिष्ये ॥ इति संकल्प्य हस्ते साक्षतपात्रं क्षीरं च गृहीत्वा ॥

अर्घ्यं गृहाण हेरम्ब सर्वभद्र विनायक ।
गन्धपुष्पाक्षतैर्युक्तं भक्त्या दत्तं मया प्रभो ॥

वर...काय नमः इदमर्घ्यम् ॥

नमस्तुभ्यं गणेशाय नमस्ते विघ्ननायक ।
पुनरर्घ्यं प्रदास्यामि गृहाण गणनायक ॥

वर...काय नमः इदमर्घ्यम् ॥

नमस्ते भिन्नदन्ताय नमस्ते हरसूनवे ।
इदमर्घ्यं प्रदास्यामि संगृहाण गणाधिप ॥

वर...काय नमः इदमर्घ्यम् ॥

गौर्यंकमलसंभूत ज्येष्ठस्वामिन् विनायक ।
गणेश्वर गृहाणार्घ्यं गजानन नमोऽस्तु ते ॥

वर...काय नमः इदमर्घ्यम् ॥

अनेन अर्घ्यप्रदानेन भगवान् सर्वात्मकः वरसिद्धिविनायकः प्रीयताम् ॥

अद्य पूर्वोक्त एवंगुणविशेषणविशिष्टायां अस्यां शुभतिथौ वरसिद्धिविनायकप्रीत्यर्थं वरसिद्धिविनायकव्रतसाङ्गफलसिद्ध्यर्थं उपायनदानं करिष्ये ॥

वरसिद्धिविनायकस्वरूपस्य ब्राह्मणस्य इदमासनम् ॥

(अथैकविंशतिं गृह्य मोदकान् घृतपाचितान् । स्थापयित्वा गणाध्यक्ष समीपे कुरुनन्दन ॥ दश विप्राय दातव्यं स्थापयेद्दश चात्मने । एकं गणाधिपे दद्यात् सघृतं मोदकं शुभम् ॥ दशानां मोदकानां च फलदक्षिणया युतम् ॥)

श्लो. गणेशः प्रतिगृह्णातु गणेशो वै ददाति च ।
गणेशस्तारकोभाभ्यां गणेशाय नमो नमः ॥

इति उपायनदाता वदेत् ॥ ग्रहीता इदं प्रतिवदेत् ॥

देवस्य त्वा सवितुः प्रसवे अश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामाददे ॥

यस्य स्मृत्या च नामोक्त्या तपःपूजाक्रियादिषु ।
न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम् ॥

अनेन आचरितव्रतेन वरसिद्धिविनायकः सुप्रीतः सुप्रसन्नो वरदो भवतु ॥

॥ उद्यापने विशेषः ॥

कुंभस्येशानदिग्भागे प्रतिष्ठाप्य हुताशनम् ।
स्वगृह्योक्तविधानेन मुखान्तं होममाचरेत् ॥

" गणानां त्वा " इति मन्त्रेण समिदन्नाज्यैर्जुहुयात् ।
अष्टोत्तरशतं हुत्वा ततः स्विष्टकृदादि च ॥
कुंभानुद्वास्य विधिवदभिषिच्य घटोदकैः ।
कर्ताऽथ धृतवस्त्रादिराचार्यादींश्च पूजयेत् ॥
विनायकस्य प्रतिमां वस्त्रयुग्मसमन्विताम् ।
तुभ्यं दास्यामि विप्रेन्द्र यथोक्तफलदो भव ॥
श्लोकेनानेन प्रतिमाः पञ्चर्त्विग्भ्यः प्रदापयेत् ।
दशदानादीनि ततो ब्राह्मणेभ्यः प्रदापयेत् ॥
भूरिदानं प्रकुर्वीत इष्टार्थफलसिद्धये ।
आशिषं वाचयित्वाऽथ ब्राह्मणान् भोजयेत्ततः ॥
इत्येवं विधिवत्कुर्यात् गणेशोद्यापनं व्रती ।
इष्टं कार्यं लभेन्मर्त्यः प्राप्नोति च परां गतिम् ॥

इति वरसिद्धिविनायकव्रतोद्यापनविधिः ॥

विनायकस्य प्रतिमां वस्त्रयुग्मसमन्विताम् ।
तुभ्यं दास्यामि विप्रेन्द्र यथोक्तफलदो भव ॥

इति प्रतिमादानं कुर्यात् ॥

॥ कथाप्रारम्भः ॥

श्लो. आसीत्पुरा चन्द्रवंशे राजा धर्म इति श्रुतः ।
स्वराज्ये दैवयोगेन ज्ञातिभिः कुटिलैर्हृते ॥

अनुजैर्भार्यया सार्धं जगाम गहनं वनम् ।
बहुवृक्षसमाकीर्णं नानामृगसमन्वितम् ॥

बहुपक्षिकुलोपेतं व्याघ्रभल्लूकसङ्कुलम् ।
तत्रतत्र समाविष्टा मुनयो ब्रह्मवादिनः ॥

आदित्यसन्निभाः सर्वे सर्वे वह्निसमप्रभाः ।
तेजोमण्डलसङ्काशा वायुपर्णाम्बुभक्षकाः ॥

अग्निहोत्ररता नित्यमतिथीनां च पूजकाः ।
ऊर्ध्वबाहुनिरालम्बाः सर्वे मुनिगणास्तथा ॥

तान् पश्यन् धर्मराजोऽपि संभ्रमेण समन्वितः ।
सूताश्रमं समासाद्य सूतं दृष्ट्वा ससंभ्रमः ॥

नत्वा च भार्यया सार्धमनुजैः समुपाविशत् ।

धर्म उवाच ॥

सूतसूत महाप्राज्ञ सर्वशास्त्रविशारद ॥

वयं च भार्यया सार्धं ज्ञातिभिः परिपीडिताः ।
स्वराज्यं सकलं चैव पुत्राश्चापहृता हि नः ॥

तव दर्शनमात्रेण सर्वं दुःखं विनाशितम् ।
ममोपरि कृपां कृत्वा व्रतं ब्रूहि दयानिधे ॥

सूत उवाच ॥

व्रतं संपत्करं नृणां सर्वसौख्यप्रवर्धनम् ।

शृणुध्वं पाण्डवाः सर्वे व्रतानामुत्तमं व्रतम् ॥
रहस्यं सर्वपापघ्नं पुत्रपौत्राभिवर्धनम् ।
व्रतं साम्बशिवेनैव स्कन्दस्योद्बोधितं पुरा ॥
कैलासशिखरे रम्ये नानामुनिनिषेविते ।
मन्दारविटपिप्रान्ते नानामणिविभूषिते ॥
हेमसिंहासनासीनं शङ्करं लोकशङ्करम् ।
पप्रच्छ षण्मुखस्तुष्टो लोकानुग्रहकांक्षया ॥

स्कन्द उवाच ॥

केन व्रतेन भगवन् सौभाग्यमतुलं भवेत् ।
पुत्रपौत्रान् धनं लब्ध्वा मनुजः सुखमेधते ॥
तन्मे वद महादेव व्रतानामुत्तमं व्रतम् ॥

ईश्वर उवाच ॥

अस्ति चात्र महाभाग गणनाथप्रपूजनम् ॥
सर्वसम्पत्करं श्रेष्ठमायुःकामार्थसिद्धिदम् ।
मासे भाद्रपदे शुक्लचतुर्थ्यां व्रतमाचरेत् ॥
प्रातः स्नात्वा शुचिर्भूत्वा नित्यकर्म समाचरेत् ।
स्वशक्त्या गणनाथस्य स्वर्णरौप्यमयाकृतिम् ॥
अथवा मृण्मयं कुर्याद्वित्तशाठ्यं न कारयेत् ।
स्वगृहस्योत्तरे देशे मण्डपं कारयेत्ततः ॥
तन्मध्येऽष्टदलं पद्मं यवैर्वा तण्डुलेन वा ।
प्रतिमां तत्र संस्थाप्य पूजयित्वा प्रयत्नतः ॥
श्वेतगन्धाक्षतैः पुष्पैर्दूर्वाङ्कुरसमन्वितैः ।

धूपैर्दीपैश्च नैवेद्यैर्मोदकैर्घृतपाचितैः ॥

एकविंशतिसंख्यानि नारिकेलफलान्यपि ।
रम्भाजम्बुकपित्थौघानिक्षुखण्डांश्च तावतः ॥

एवमन्यफलापूपैर्नैवेद्यं कारयेत्सुत ।
नृत्यगीतैश्च वाद्यैश्च पुराणपठनादिभिः ॥

तर्पयेद्गणनाथं च विप्रान् दानेन श्रोत्रियान् ।
बन्धुभिः स्वजनैः सार्धं भुंजीयात्तैलवर्जितम् ॥

एवं यः कुरुते मर्त्यो गणनाथप्रसादतः ।
सिध्यन्ति सर्वकार्याणि नात्र कार्या विचारणा ॥

ततः प्रभाते विमले पुनःपूजां समाचरेत् ।
मौंजीं कृष्णाजिनं दण्डमुपवीतं कमण्डलुम् ॥

परिधानं तथा दद्याद्यथाविभवमुत्तमम् ।
उपायनं ततो दद्यादाचार्याय स्वशक्तितः ॥

अन्येभ्यो दक्षिणां दद्याद्ब्राह्मणान् भोजयेत्ततः ।
त्रैलोक्यविश्रुतं चैतद्व्रतानामुत्तमोत्तमम् ॥

अन्यैश्च देवमुनिभिर्गन्धर्वैः किन्नरैस्तथा ।
चीर्णमेतद्व्रतं सर्वैः पुराकल्पे षडानन ॥

इति पुत्राय शर्वेण षण्मुखायोदितं पुरा ।
एवं कुरुष्व धर्मज्ञ गणनाथप्रपूजनम् ॥

विजयस्ते भवेन्नित्यं सत्यं सत्यं वदाम्यहम् ।
एतद् व्रतं हरिश्चापि दमयन्ती पुराऽकरोत् ॥

कृष्णो जाम्बवतीमागाद्रत्नं चापि स्यमन्तकम् ।
दमयन्ती नलं चैव व्रतस्यास्य प्रभावतः ॥

शक्रेण पूजितः पूर्वं वृत्रासुरवधे तथा ।
रामदेवेन तद्वच्च सीताया मार्गणे तथा ॥
भगीरथेन तद्वच्च गङ्गामानयता पुरा ।
अमृतोत्पादनार्थाय तथा देवासुरैरपि ॥
कुष्ठव्याधियुतेनापि साम्बेनाराधितः पुरा ।
एवमुक्तस्तु सूतेन सानुजः पाण्डुनन्दनः ॥
पूजयामास देवस्य पुत्रं त्रिपुरघातिनः ।
शत्रुसङ्घं निहत्याशु प्राप्तवान् राज्यमोजसा ॥
पूजयित्वा महाभागं गणेशं सिद्धिदायकम् ।
सिद्ध्यन्ति सर्वकार्याणि मनसा चिन्तितान्यपि ॥
तेन ख्यातिं गतो लोके नाम्ना सिद्धिविनायकः ।
विद्यारम्भे पूजितश्चेत् विद्यालाभो भवेद्ध्रुवम् ॥
जयं च जयकामश्च पुत्रार्थी लभते सुतान् ।
पतिकामा च भर्तारं सौभाग्यं च सुवासिनी ॥
विधवा पूजयित्वा तु वैधव्यं नाप्नुयात्क्वचित् ।
ब्राह्मणः क्षत्रियो वैश्यः शूद्रो वाऽप्यथवा स्त्रियः ॥
अर्भकश्चापि भक्त्या च व्रतं कुर्याद्यथाविधि ।
सिध्यन्ति सर्वकार्याणि गणनाथप्रसादतः ॥
पुत्रपौत्राभिवृद्धिं च गजाद्यैश्वर्यमाप्नुयात् ॥

इति विनायकव्रतकल्पः समाप्तः ॥

॥ सिद्धिविनायकव्रतकथा ॥

शौनकाद्या ऋषिगणा नैमिशारण्यवासिनः । सूतं पौराणिकश्रेष्ठमिदमूचुर्वचस्तथा॥ ऋषयः-निर्विघ्नेन तु कार्याणि कथं सिध्यन्ति सूतज । अर्थसिद्धिः कथं नृणां पुत्रसौभाग्यसंपदः॥ दंपत्योः कलहे चैव बंधुभेदे तथा नृणां । उदासीनेषु लोकेषु कथं सुमुखता भवेत्॥ विद्यारम्भे तथा नृणां वाणिज्ये च कृषौ तथा । नृपतेः परचक्रस्य जयसिद्धिः कथं भवेत्॥ कां देवतां नमस्कृत्य कार्यसिद्धिर्भवेन्नृणां । एतत्समस्तं विस्तार्य ब्रूहि मे सूत पृच्छतः ॥ सूत उवाच—सन्नद्धयोः पुरा विप्राः कुरुपाण्डवसेनयोः । पृष्टवान् देवकीपुत्रं कुन्तीपुत्रो युधिष्ठिरः॥ युधिष्ठिर उवाच—निर्विघ्नेन जयं मह्यं वद त्वं देवकीसुत । कां देवतां नमस्कृत्य सम्यग्राज्यं लभेमहि ॥ कृष्ण उवाच—पूजयस्व गणाध्यक्षमुमामलसमुद्भवं । तस्मिन् संपूजिते देवे ध्रुवं राज्यमवाप्स्यसि॥युधिष्ठिर उवाच—कथं केन विधानेन पूजनीयो गणाधिपः । किं दानं किं व्रतं कार्यं कदा ब्रूहि जगत्पते॥श्रीकृष्ण उवाच-मासि भाद्रपदे शुक्ले चतुर्थ्यां गणनायकं । मध्याह्ने श्रावणे वापि मार्गशीर्षेऽथवा व्रती॥ गजवक्त्रं तु शुक्लायां चतुर्थ्यां सर्वदाऽर्चयेत्। यथा चोत्पद्यते भक्तिस्तथा पूज्यो गणाधिपः॥प्रातश्शुक्लतिलैस्स्नात्वा मध्याह्ने पूजयेन्नृप । निष्कमात्रसुवर्णेन तदर्धार्धेन वा पुनः॥स्वशक्त्या गणनाथस्य स्वर्णरौप्यमयं कृतं । अथवा मृण्मयं कुर्याद्वित्तशाठ्यं न कारयेत् ॥ एकदन्तं शूर्पकर्णं गजवक्त्रं चतुर्भुजं । पाशांकुशधरं देवं ध्यायेत्सिद्धिविनायकम्॥ कृत्वा पूजां प्रयत्नेन स्नाप्यं पञ्चामृतैः पृथक् । गणाध्यक्षेति नाम्ना वै गन्धं दद्याच्च भक्तितः॥ आवाहनार्घ्यपाद्यं च दत्वा पश्चात्प्रयत्नतः । रक्तवस्त्र-

युगं चैव दद्याद्देवाय भक्तितः॥ विनायकेति पुष्पाणि धूपं चोमासुताय वै। दीपं रुद्रप्रियायेति नैवेद्यं विघ्ननाशिने॥ किंचित्सुवर्णपूजां च तांबूलं च समर्पयेत्। ततो दूर्वायुगं ग्राह्यं विंशतिं चैकमेव हि॥ पूजनीयः प्रयत्नेन एभिर्नामपदैस्सह। गणाधिप नमस्तेऽस्तु उमापुत्राघनाशन॥ विनायकेशपुत्रेति सर्वसिद्धिप्रदायक। एकदन्तेभवक्त्रेति तथा मूषकवाहन॥ कुमारगुरवे तुभ्यं पूजनीयः प्रयत्नतः। दूर्वायुग्मं गृहीत्वा तु गन्धपुष्पाक्षतैर्युतम्॥ एकैकेन तु नाम्ना वै दत्वैकं सर्वनामभिः। अथैकविंशतिं भक्त्या मोदकान् घृतपाचितान्॥स्थापयित्वा गणाध्यक्षसमीपे कुरुनन्दन। दश विप्राय दातव्याः स्वयं ग्राह्यास्तथा दश॥ एकं गणाधिपे दद्यात्सनैवेद्यं नृपोत्तम। विनायकस्य प्रतिमां ब्राह्मणाय समर्पयेत्॥तुभ्यं संप्रददे देव प्रीयतां मे गजाननः। विनायक गणेशान सर्वदेवनमस्कृत॥ पार्वतीप्रिय विघ्नेश मम विघ्नं विनाशय। गणेशः प्रतिगृह्णाति गणेशो वै ददाति च॥गणेशस्तारकोभाभ्यां गणेशाय नमो नमः। कृत्वा नैमित्तिकं कर्म पूजयेदिष्टदेवताम्॥ ब्राह्मणान् भोजयेत्पश्चाद्भुंजीयात्तैलवर्जितम्। एवं कृते धर्मराज गणनाथस्य पूजने॥ विजयस्ते भवेन्नूनं सत्यं सत्यं मयोदितम्। वैष्णवाद्यासु दीक्षासु आदौ पूज्यो गणाधिपः॥ तस्मिन् संपूजिते विष्णुरीशो भानुस्तथा ह्युमा। हव्यवाहमुखा देवाः पूजिताः स्युर्नसंशयः॥ चंडिकाद्या मातृगणाः परितुष्टा भवन्ति च। तस्मिन् संपूजिते विप्रा भक्त्या सिद्धिविनायक॥ य इदं शृणुयान्नित्यं श्रावयेद्वा समाहितः। सिध्यन्ति सर्वकार्याणि विघ्नेशस्य प्रसादतः॥

इति विनायकव्रतं भविष्योक्तं संपूर्णम्॥

॥ चतुर्थीचंद्रदर्शनदोषः ॥

मासि भाद्रपदे शुक्ले शिवलोके प्रपूजिता । तस्यां स्नानं तथा दानमुपवासोऽर्चनं तथा ॥ क्रियमाणं शतगुणं प्रसादाद्याति को नृप ॥ चतुर्थीत्यनुषंगः ॥ अस्यामेव चन्द्रदर्शनदोषमाह पराशरः—कन्यादित्ये चतुर्थ्यां च शुक्ले चन्द्रस्य दर्शनं। मिथ्याभिदूषणं कुर्यात्तस्मात्पश्येन्न तं तदा ॥ तद्दोषशांतये जाप्यं विष्णुनोक्तं स्यमन्तकं । सिंहः प्रसेनमवधीत्सिंहो जांबवता हतः ॥ सुकुमारक मारोदीस्तव ह्येष स्यमन्तकः॥

॥ स्कान्दे स्यमन्तकोपाख्यानम् ॥

नन्दिकेश्वर उवाच—शृणुष्वैकाग्रचित्तस्सन् व्रतं गाणेश्वर महत्। चतुर्थ्यां शुक्लपक्षे तु सदा कार्यं प्रयत्नतः ॥ सनत्कुमार योगीन्द्र यदीच्छेच्छुभमात्मनः । नारी वा पुरुषो वापि यः कुर्याद्विधिवद्व्रतम्॥ मोचयत्याशु विप्रेन्द्र संकष्टाद्व्रतिनं मतं । अपवादहरं चैव सर्वविघ्नप्रणाशनम्॥ कान्तारे विषमे वापि रणे राजकुलेऽथवा । सर्वसिद्धिकरं दिव्यं व्रतनामुत्तमं व्रतम् ॥ गजाननप्रियं चाथ त्रिषु लोकेषु विश्रुतं । अतो न विद्यते ब्रह्मन् सर्वसंकष्टनाशनम् ॥

सनत्कुमार उवाच—केन चादौ पुरा चीर्णं मर्त्यलोके कथं गतं । एतत्समस्तं विस्तार्य ब्रूहि गाणेश्वरं महत् ॥ नन्दिकेश्वर उवाच—चक्रे व्रतं जगन्नाथो वासुदेवः प्रतापवान् । आदिष्टो नारदेनैव वृथालाञ्छनमुक्तये ॥ सनत्कुमारः—षड्गुणैश्वर्यसंपन्नः सृष्टिसंहारकारकः । वासुदेवो जगद्व्यापी प्राप्तवान् लाञ्छनं कथम् ॥ एतदाश्चर्यमाख्यानं ब्रूहि त्वं नन्दिकेश्वर ॥ नन्दिकेश्वर उवाच—भूमिभारनिवृत्त्यर्थं वसुदेवसुतावुभौ। रामकृष्णौ समुत्पन्नौ पद्मनाभफणीश्वरौ॥जरासन्धभयात्कृष्णो

द्वारकां समकल्पयत् । विश्वकर्माणमाहूय पुर्त्री हाटकनिर्मिताम् ॥ तत्र षोडशसाहस्रं स्त्रीणां चैव शताधिकम् । भवनानि मनोज्ञानि तेषां मध्येऽप्यकल्पयत्॥पारिजाततरुं मध्ये तासां भोगाय कल्पयत्। याद-वानां गृहास्तत्र षट्पञ्चशतकोटयः॥ अन्येऽपि बहवो लोका वसन्ति विगतज्वराः । यत्किञ्चित्त्रिषु लोकेषु सुन्दरं तत्र दृश्यते॥ सत्राजित-प्रसेनाख्यौ पुत्रावुग्रस्य विश्रुतौ । अम्भोधितीरमासाद्य तन्मनस्कतया च सः॥सत्राजितस्तपस्तेपे सूर्यमुद्दिश्य बुद्धिमान् । व्रतं निरशनं गृह्य सूर्यसंबुद्धलोचनम्॥ ततः प्रसन्नो भगवान् सत्राजितपुरस्स्थितः । सत्रा-जितोऽपि तुष्टाव दृष्ट्वा देवं दिवाकरम्॥तेजोराशे नमस्तेऽस्तु हरिदश्व नमोऽस्तु ते । ग्रहराज नमस्तेऽस्तु नमस्ते चन्द्ररोचिषे॥वेदत्रय नमस्ते-ऽस्तु सर्वदेव नमोऽस्तु ते । प्रसीद पाहि देवेश सुदृष्ट्या मां दिवाकर ॥ इत्थं संस्तूयमानोऽसौ देवदेवो दिवाकरः । स्निग्धं गंभीरमधुरं सत्रा-जितमुवाच ह ॥ सूर्यः—वरं ब्रूहि प्रदास्यामि यत्ते मनसि वर्तते । सत्राजित महाभाग तुष्टोऽहं तव निश्चयात् ॥ सत्राजितः—स्यमन्तक-मणिं देहि यदि तुष्टोऽसि भास्कर । ददौ तस्य च तद्रत्नं स्वकण्ठादवतार्य सः ॥ भास्करः—भाराष्टकं शातकुम्भं सुवतेऽसौ महामणिः । शुचि-ष्मता सदा धार्यं रत्नमेतन्महोत्तमम् ॥ सत्राजित क्षणेनैतदशुभं हन्ति मानवं । इत्युक्त्वांऽतर्दधे देवस्तेजोराशिर्दिवाकरः ॥ तत्कण्ठ-रत्नज्वलमानरूपी पुरीं स कृष्णस्य विवेश सत्वरं । दृष्ट्वा तु लोका मनसा दिवाकरं संचिन्तयन्तोऽस्तमितस्वदृष्टयः ॥ समागतो-ऽयं हरिदश्वदीधितिर्जनार्दनं द्रष्टुमसंशयेन । नायं सहस्रांशुरितीह लोकाः सत्राजितोऽयं मणिकण्ठभास्वान् ॥ स्यमन्तकं महारत्नं दृष्ट्वा तत्कण्ठमण्डले । स्पृहां चक्रे जगन्नाथो न जहार मणिं

ततः ॥ सत्राजितो जातभयो याचयिष्यति मां हरिः । प्रसेनाय ददौ भ्रात्रे धार्योऽयं शुचिना त्वया ॥ एकदा कण्ठदेशेऽसौ क्षिप्त्वा तं मणिमुत्तमम् । मृगयाक्रीडनार्थाय ययौ कृष्णेन संयुतः ॥ अश्वारूढश्शुचिश्चासौ हतः सिंहेन तत्क्षणात् । रत्नमादाय सिंहोऽपि गच्छन् जांबवता हतः । नीत्वा सविवरे रत्नं ददौ पुत्राय जांबवान् । पुरीं विवेश कृष्णोऽपि स्वकैस्सर्वैस्समावृतः॥प्रसेनोऽद्यापि नायाति हतः कृष्णेन निश्चितम् । मणिलोभेन हा कष्टं बान्धवः पापिना हतः ॥ द्वारकावासिनस्सर्वे जना ऊचुः परस्परं । वृथापवादसन्तप्तः कृष्णोऽपि निरगाच्छनैः॥ सहैव तैर्यथारण्ये दृष्ट्वा सिंहेन पातितम् । प्रसेनं वाहनयुतं तत्पादानुचरैर्हरिम्॥ ऋक्षेण निहतं दृष्ट्वा कृष्णश्चर्क्षबिलं गतः । विवेश योजनशतमंधकारं स्वतेजसा॥निवारयन् ददर्शाग्रे प्रासादं बद्धभूमिकम् । तं कुमारं जांबवतो डोलायामभितद्युतिम् ॥ माणिक्यं लम्बमानं च ददर्श भगवान् हरिः । रूपयौवनसपन्नां कन्यां जांबवतीं पुनः ॥ डोलां दोलायमानां च ददर्श कमलेक्षणः । महान्तं विस्मितं चक्रे दृष्ट्वा तां चारुहासिनीम्॥डोलां डोलायमाना च जगौ गीतमिदं मुहुः । सिंहः प्रसेनमवधीत्सिंहो जांबवता हतः ॥ सुकुमारक मा रोदीस्तव ह्येष स्यमन्तकः । मदनज्वरदाहार्ता दृष्ट्वा तं कमलेक्षणम् ॥ उवाच ललितं बाला गम्यतां गम्यतामिति । रत्नं गृहीत्वा वेगेन तवच्छेत्ता स जांबवान् ॥ इत्याकर्ण्य हसन् शौरिः शङ्खं दध्मौ प्रतापवान् । आकर्ण्य सहसोत्थाय युयुधे ऋक्षराट् ततः ॥ तयोर्युद्धमभूद्घोरं हरिजांबवतोस्तदा । द्वारकावासिनस्सर्वे गतास्ते सप्तमे दिने॥ मृतः कृष्णे निरीक्षंतो निस्संदिग्धं विचार्य च । परलोकक्रियां चक्रुः परे तस्य तु ते तदा ॥ एकविंशदिनं यावद्बाहुप्रहरणो विभुः । युयुधे तेन

ऋक्षेण युद्धकर्मणि तोषितः॥जाम्बवान् प्राक्तनं स्मृत्वा दृष्ट्वा देवे बलं महत् । जांबवानुवाच—अजय्योऽहं सुरैस्सर्वैर्यक्षराक्षसदानवैः । त्वया जितोऽहं देवेश देवस्त्वमसि निश्चितम् ॥ जाने त्वां वैष्णवं तेजो नान्यथा बलमीदृशं । इति प्रसाद्य गोविंदं ददौ माणिक्यमुत्तमं ॥ सुतां जांबवतीं नाम भार्यार्थं वरवर्णिनीं । मणिं वै ग्राहयामास देवदेवं च जांबवान्॥मणिमादाय देवोऽपि जांबवत्यापि संयुतः । तद्वृत्तान्तं समाचष्टे द्वारकावासिनां स्वयम् ॥ सत्राजितस्य माणिक्यं दत्तवान् संसदि स्थितः । मिथ्यापवादसंशुद्धिं प्राप्तवान् मधुसूधनः ॥ सत्राजितोऽपि संत्रस्तः कृष्णाय प्रददौ सुतां । सत्यभामां महाबुद्धिं ददौ सर्वगुणान्विताम् । शतधन्वा क्रूरमुखा यदूनां दुष्टमानसाः । सत्राजितेन ते वैरं चक्रू रत्नाभिलाषिणः ॥ दुरात्मा शतधन्वापि गते कृष्णेऽथ पाण्डवान् । सत्राजितं निहत्याशु मणिं जग्राह पापधीः ॥ कृष्णस्य पुरतस्सत्या समाचष्टे विचेष्टितं । अंतर्हृष्टो बहिः कोपी कृष्णः कपटनाटकः । बलदेव पुरोवाक्यमुवाच धरणीधर । हत्वा सत्राजितं दुष्टो मणिमादाय गच्छति ॥ निहत्य शतधन्वानं गृहीत्वा रत्नमावयोः । नित्यभोग्यं च तद्रत्नं करिष्यावोऽद्य निश्चितम् ॥ एतच्छ्रुत्वा भयत्रस्तश्शतधन्वापि यादवः । आहूयाक्रूरनामानं माणिक्यं प्रददौ च सः ॥ आरुह्य बडवां वेगान्निर्गतो दक्षिणां दिशं । रथस्थमनुगच्छेतां तदा रामजनार्दनौ ॥ शतयोजनमात्रेण ममार बडबा तदा । पलायमानो निहतः स कृष्णेन पदातिना ॥ रथस्थो बलदेवस्तु हते रत्नस्य लोभतः । न दृष्टं तस्य तद्रत्नमित्यूचे हरिरग्रजम्॥ तदाकर्ण्य महारोषादुवाच वचनं बलः । कपटी त्वं सदा कृष्ण लोभी पापी सुनिश्चितम् ॥ अर्थाय स्वजनं हिंसीः कस्त्वां बन्धुस्समाश्रयेत् । अनेकशपथैः कृष्णो बलदेवं प्रसादयत् ॥ स तु धिक्कष्टमित्युक्त्वा

ययौ वै दर्भमण्डलं। कृष्णोऽपि रथमारुह्य द्वारकां प्रययौ पुनः ॥ तथैवोचुर्जनास्सर्वे न साधीयानयं हरिः। निष्कासितो रत्नलोभात् ज्येष्ठभ्राता बलो बली ॥ तच्छ्रुत्वा दीनवदनः पापीयानिव संस्थितः। वृथाभिशापात्संतप्तो बभूव स जगत्पतिः ॥ अक्रूरोऽपि विनिष्क्रम्य तीर्थयात्रानिमित्ततः । काशीं गत्वा सुखेनास्मौ यजन् यज्ञपतिं प्रभुम् ॥ तोषमुत्पादयामास तेन द्रव्येण बुद्धिमान् । सुरालयगृहैश्चित्रैर्नगरं समकल्पयत् ॥ न दुर्भिक्षं न वै रोगा ईतयो न च विड्वरं। शुचिना धार्यते यत्र मणिस्सूर्यस्य निश्चितम् ॥ जानन्नपि हि तत्सर्वं मानुषं भावमाश्रितः। लोकाचारं तथा मायामज्ञानं चाश्रितो यथा ॥ बन्धुवैरसमुत्पन्नलांछनं समुपस्थितं । वृथापवादं बहुलं जायमानं कथं भवेत् ॥ इति चिंतातुरं कृष्णं नारदस्समुपस्थितः। गृहीत्वा तत्कृतां पूजां सुखासनगतोऽब्रवीत् ॥ नारद उवाच ॥ किमर्थं खिद्यसे देव किं वा ते शोककारणम् ? यथावृत्तं समाचष्टे नारदाय स केशवः ॥ जानामि कारणं देव यदर्थं लाञ्छनं तव । त्वया भाद्रपदे शुक्ले चतुर्थ्यां चन्द्रदर्शनम् ॥ कृतं तेन समुत्पन्नं लाञ्छनं तु वृथैव हि ॥ श्रीकृष्ण उवाच—वद नारद मे शीघ्रं को दोषश्चन्द्रदर्शने । किमर्थं तु द्वितीयायां तस्य कुर्वन्ति दर्शनम् ? नारदः—गणनाथेन संशप्तश्चन्द्रमा रूपगर्वितः । तद्दर्शने नराणां हि वृथा निन्दा भविष्यति ॥ श्रीकृष्णः—किमर्थं गणनाथेन शप्तश्चन्द्रस्सुधामयः । इदमाख्यानकं श्रेष्ठं यथावद्वक्तुमर्हसि ॥ नारद उवाच—गणानामाधिपत्ये च रुद्रेण विहितः पुरा । अणिमा महिमा चैव लघिमा गरिमा तथा। प्राप्तिः प्राकाम्यमीशत्वं वशित्वं चाष्टसिद्धयः। भार्यार्थं प्रददौ देवो गणेशस्य प्रजापतिः ॥ पूजयित्वा गणाध्यक्षं स्तुतिं कर्तुं

प्रचक्रमे ॥ ब्रह्मोवाच । गजवक्त्र गणाध्यक्ष लंबोदर वरप्रद । विघ्नाधिराज देवेश सृष्टिसंहारकारक ॥ संपूजये गणाध्यक्षं मोदकाद्यैः प्रयत्नतः । तेषां प्रदीयते सिद्धिर्निर्विघ्नेन न संशयः ॥ असंपूज्य गणाध्यक्षं ये वाञ्छन्ति सुरासुराः । न तेषां जायते सिद्धिः कल्पकोटिशतैरपि । त्वद्भक्त्या तु गणाध्यक्ष विष्णुः पालयते सदा । रुद्रोऽपि संहरत्याशु त्वद्भक्त्यैव करोम्यहम् ॥ इत्थं सस्तूयमानोऽसौ देवदेवो गजाननः । उवाच परमप्रीतो ब्रह्माणं जगतां पतिः ॥ श्रीगणेश उवाच—वरं ब्रूहि प्रदास्यामि यत्ते मनसि वर्तते ॥ ब्रह्मा—क्रियमाणा हि मे सृष्टिर्निर्विघ्नं जायतां प्रभो । एवमस्त्विति देवोऽसौ गृहीत्वा मोदकान् करे । सप्तलोकान्समागत्य स्वेच्छया गगने शनैः । चन्द्रलोकं समासाद्य चरितो गणनायकः ॥ अपहासं तदा चक्रे सोमो रूपमदान्वितः । तं दृष्ट्वा कोपताम्राक्षो गणनाथश्शशाप ह ॥ दर्शनीयः सुरूपोऽहं सुन्दरश्चाहमित्यथ । गर्वितोऽसि शशाङ्क त्वं फलं प्राप्स्यसि सत्वरम् । अद्य प्रभृति लोकास्त्वां नहि पश्यन्ति पापिनम् ॥ ये पश्यन्ति प्रमादेन त्वां नरा मृगलाञ्छनम् ॥ मिथ्याभिशापसंयुक्ता भविष्यन्तीह ते ध्रुवं ॥ हाहाकारो महान् जातः श्रुत्वा पापं च भीषणम् ॥ अत्यन्तम्लानवदनश्चन्द्रो जलमथाविशत् । कुमुदं कौमुदीनाथः स्थितस्तत्र कृतालयः ॥ ततो देवर्षिगन्धर्वास्तन्नाशोद्विग्नमानसाः । तुरासाहं पुरोधाय जग्मुस्ते तं पितामहम् ॥ देवं शशंसुश्चन्द्रस्य गणेशस्य च चेष्टितं । दत्तश्शापो गणेशेन कथयामासुरादरात् ॥ विचार्य भगवान् ब्रह्मा तान्सुरानिदमब्रवीत् । गणेशशापो देवेन्द्र शक्यते केन नान्यथा ॥ कर्तुं रुद्रेण न मया विष्णुना चापि निश्चितं । तमेव देवदेवेशं व्रजध्वं शरणं सुराः ॥ स एव शाप-

मोक्षं च करिष्यति न संशयः ॥ देवा ऊचुः—केनोपायेन वरदो गजवक्त्रो गणेश्वरः । पितामह महाप्राज्ञ तदस्माकं वद प्रभो ॥ पितामह उवाच—चतुर्थ्यां देवदेवोऽसौ पूजनीयस्सदैव हि । कृष्णपक्षे विशेषेण नक्तं कुर्याच्च तद्व्रतम् । अपूपैर्घृतसंयुक्तैर्मोदकैः परितोषयेत् । मधुरान्नं हविष्यं च स्वयं भुंजीत वाग्यतः ॥ स्वर्णरूपं गणेशस्य दातव्यं ब्राह्मणाय च । भक्त्या च दक्षिणां दद्याद्वित्तशाठ्यं न कारयेत् ॥ एवं श्रुत्वैव ते सर्वे प्रैषयन् गीष्पतिं सुराः । स गत्वा कथयामास चन्द्राय ब्रह्मणोदितम् ॥ व्रतं चक्रे ततश्चन्द्रो यथोक्तं ब्रह्मणा पुरा । आविर्बभूव भगवान् गणेशो व्रततोषितः ॥ तं क्रीडमानं गणनायकं च दृष्ट्वा तु तुष्टाव कलानिधानः । त्वं कारणं कारणकारणानां वेत्तासि वेद्यं च विभो प्रसीद ॥ प्रसीद देवेश जगन्निवास गणेश लम्बोदर वक्रतुण्ड । विरिञ्चिनारायणपूज्यमान क्षमस्व मे गर्वकृतं च हास्यम् ॥ ये त्वामसंपूज्य गणेश नूनं वाञ्छन्ति मूढाः सुकृताः प्रसिद्धिम् । ते दैवनष्टाश्च भवन्ति तस्य ज्ञातो भवान् ते सकलः प्रभावः ॥ ये चाप्युदासीनतरास्तु पापास्ते यान्ति वासं नरके सदैव । हेरम्ब लम्बोदर मे क्षमस्व दुश्चेष्टितं तत्करुणासमुद्र ॥ एवं संस्तूयमानोऽसौ चन्द्रेणाथ गजाननः ॥ गणेशः—तुष्टोऽहं तव दास्यामि यथेच्छसि वरं तव । ततो ब्रह्मादयस्सर्वे समाजग्मुर्भयार्दिताः ॥ विशापं कुरु देवेन्दुं प्रार्थयामो वयं तव । विशापमकरोच्चन्द्रं कमलासनगौरवात् ॥ शुक्लपक्षे चतुर्थ्यां तु ये पश्यन्ति सदैव हि । मिथ्यापवादमावर्षं प्राप्स्यन्तीह न संशयः ॥ मासदौ पूर्वमेव त्वां ये पश्यन्ति सदा जनाः । चतुर्थ्यां शुक्लपक्षस्य तेषां दोषो न जायते ॥ तदा प्रभृति लोकोऽयं द्वितीयायां कृतादरः । पुनरेव तु पप्रच्छ कला-

वान् गणनायकम्। केनोपायेन देवेश पूज्यो भवसि तद्वद ॥ गणेश उवाच—सदा कृष्णचतुर्थ्यां तु मोदकाद्यैः प्रपूज्य माम्। रोहिण्या सहितं त्वां च समभ्यर्च्य विधानतः ॥ तदा तस्य करिष्यामि संकष्टस्य निवारणम्। भाद्रशुक्लचतुर्थ्यां तु मृण्मयी प्रतिमा शुभा ॥ हेमाभावे तु कर्तव्या नानापुष्पैः प्रपूजयेत्। ब्राह्मणान् भोजयेत्पश्चाज्जागरं च विशेषतः॥स्थापयेदव्रणं कुम्भं धान्यस्योपरि शोभितं। यथाशक्ति च मद्रूपं शातकुम्भेन निर्मितम् ॥ वस्त्रद्वयसमाच्छन्नं मोदकाद्यैः प्रपूज्य मां। रक्ताम्बरधरा मर्त्या ब्रह्मचर्यव्रतश्शुचिः ॥ राजा तस्य तु रूपं मे यथाशक्ति विनिर्मितम्। वस्त्रं शिवप्रियायेति गणेशायोपवस्त्रकम् ॥ गन्धं लम्बोदरायेति पुष्पं सिद्धिप्रदायिने। धूपं गजमुखायेति दीपं मूषकगामिने ॥ विघ्ननाथाय नैवेद्यं फलं सर्वार्थदायिने। तांबूलं कामरूपाय दक्षिणां धनदाय च ॥ इक्षुदण्डैर्मोदकैश्च होमं कुर्याच्च नामभिः। विसर्जनं ततः कुर्यात् सर्वसिद्धिप्रदायकम् ॥ एवं संपूज्य विघ्नेशं कथां श्रुत्वा विधानतः। मन्त्रेणानेन तत्सर्वं ब्राह्मणाय निवेदयेत् ॥ दानेनानेन सर्वेश प्रीतो भव गणेश्वर। सर्वत्र सर्वदा देव निर्विघ्नं कुरु सर्वदा ॥ ममोन्नतिं च राज्यं च पुत्रपौत्रान्प्रदेहि मे। गाश्च धान्यं च वासांसि दद्यात्सर्वं स्वशक्तितः ॥ दत्वा तु ब्राह्मणैस्सर्वैस्स्वयं भुंजीत वाग्यतः। मोदकापूपमधुरं लवणक्षारवर्जितम् ॥ एवं करोति यश्चन्द्र तस्याहं सर्वदा जयं ॥ सिद्धिं च धनधान्ये च ददामि विपुलां प्रजाम् ॥ इत्युक्त्वांतर्दधे देवो विघ्नराजो विनायकः। तद्व्रतं कुरु कृष्ण त्वं ततस्सिद्धिमवाप्स्यसि ॥ नारदेनैवमुक्तश्च व्रतं चक्रे हरिस्स्वयम्। मिथ्यापवादसंशुद्धिं द्वितीयं कृष्णयाचितम्। ये शृण्वन्ति तवाख्यानं स्यमन्तकमणीयकं। चन्द्रस्य

चरितं सर्वं तेषां दोषो न जायते ॥ भाद्रशुक्लचतुर्थ्यां तु कचिच्चन्द्रस्य दर्शनं । जातं तत्परिहारार्थं श्रोतव्यं सर्वमेव हि ॥ यदा यदा मनः-कष्टं संदेह उपजायते । तदा तदा च श्रोतव्यमाख्यानं कष्टनाशनम् ॥ एवमुक्त्वा गतो देवो गणेशः कृष्णतोषितः ॥ यदा यदा श्रेयसि शौर्ये उत्थितो नारी नरश्चाथ करोति तद्व्रतं । सिध्यन्ति कार्याणि तथेप्सितानि किं दुर्लभं विघ्नहरे प्रसन्ने ॥

इति श्रीस्कान्दे पुराणे नन्दिकेश्वरसनत्कुमारसंवादे
स्यमन्तकोपाख्यानं संपूर्णम् ॥

॥ श्रीरस्तु ॥

॥ व्रतरत्नाकरः ॥

॥ [1] सरस्वतीव्रतम् ॥

श्लो. शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये ॥

ॐ भूः—सुवरोम् ॥ एवंगुणविशेषणविशिष्टायामस्यां शुभतिथौ मम (अस्माकं) धर्मार्थकाममोक्षरूपचतुर्विधफलपुरुषार्थसिद्ध्यर्थं सकलविद्यापारङ्गतत्वसिद्ध्यर्थं च वर्षे वर्षे प्रयुक्ता श्री दुर्गालक्ष्मीसरस्वतीदेवता उद्दिश्य दुर्गालक्ष्मीसरस्वतीदेवताप्रीत्यर्थं कल्पोक्तप्रकारेण यावच्छक्ति ध्यानावाहनादिषोडशोपचारपूजां करिष्ये इति संकल्प्य [2] कलशपूजां गणाधिपतिपूजां प्राणप्रतिष्ठां च कुर्यात् ॥

---

1. अथ आश्वयुजशुक्लनवम्यां दुर्गालक्ष्मीसरस्वतीपूजाविधानम् ॥

तिथिनिर्णये नवमीतिथिप्रकरणे दुर्गालक्ष्मीसरस्वतीव्रतादौ— पूर्वविद्धा नवमी ग्राह्या । " अष्टम्या नवमी युक्ता कर्तव्या फलकांक्षिभिः । नकुर्यान्नवमीं तात दशम्या तु कदाचन ॥" इत्यांगीरसः ॥ " मूले त्वावाहयेद्देवीं श्रवणे तु विसर्जयेत् ॥" इति ॥

2. तत् सर्वं विधानं विनायकव्रते द्रष्टव्यम् ॥

॥ सरस्वतीपूजाप्रारम्भः ॥

श्लो. पुस्तकेषु यतो देवी क्रीडते परमार्थतः ।
ततस्तत्र प्रकुर्वीत ध्यानमावाहनादिकम् ॥
ध्यानमेवं प्रकुर्वीत साधको विजितेन्द्रियः ।

(पुष्पाक्षतान् गृहीत्वा) ध्यानम् ॥

चतुर्भुजां महादेवीं वाणीं सर्वाङ्गसुन्दरीम् ।
श्वेतमाल्याम्बरधरां श्वेतगन्धानुलेपनाम् ॥
प्रणवासनमारूढां तदर्थत्वेन निश्चिताम् ॥
सितेन दर्पणाभेन वस्त्रेणोपरिभूषिताम् ।
शब्दब्रह्मात्मिकां देवीं शरच्चन्द्रनिभाननाम् ॥
अङ्कुशं चाक्षसूत्रं च पाशं वीणां च धारिणीम् ।
मुक्ताहारसमायुक्तां देवीं ध्यायेच्चतुर्भुजाम् ॥

सरस्वत्यै नमः ध्यायामि ॥

अत्रागच्छ जगद्वन्द्ये सर्वलोकैकपूजिते ।
मया कृतामिमां पूजां गृहाण जगदीश्वरि ॥

आवाहनमन्त्राः—

जातवेदसे, सुनवाम सोममरातीयतो निदहाति वेदः । स नः पर्षदतिदुर्गाणि विश्वा नावेव सिन्धुं दुरितात्यग्निः ॥१॥ दुर्गामावाहयामि ॥ सक्तुमिव तितउना पुनन्तो यत्र धीरा मनसा वाचमक्रत । अत्रासखायस्सख्यानि जानते भद्रैषां लक्ष्मीर्निहिताधिवाचि ॥ लक्ष्मीमावाहयामि ॥ प्रणो देवी सरस्वती वाजेभिर्वाजिनीवती । धीनामवित्र्यवतु ॥ सरस्वतीमावाहयामि ॥

शुकपोतकरांभोजे सर्वावयवसुन्दरि ।
चतुर्मुखप्रिये देवि आसनं प्रतिगृह्यताम् ॥

आसनं समर्पयामि ॥

पाद्यमाद्यन्तशून्यायै वेद्यायै वेदवेदिभिः ।
अद्य ते कलयाम्येतत् प्रीत्यर्थं प्रतिगृह्यताम् ॥

पाद्यम् समर्पयामि ॥

गङ्गायमुनतोयेन निर्मितं च सुवासितम् ।
भक्त्या समर्पितं वाणि गृहाणार्घ्यं शुभानने ॥

अर्घ्यं समर्पयामि ॥

मया दत्तमिदं देवि गृहाणाचमनीयकम् ।
शारदे शरदभ्राभे सर्वविद्याधिदेवते ॥

आचमनीयं समर्पयामि ॥

दधिक्षीरसमायुक्तं कदलीफलसंयुतम् ।
मधुपर्कं मया दत्तं गृहाण वरदा भव ॥

मधुपर्कं समर्पयामि ॥

दधिक्षीरघृतोपेतं शर्करामधुसंयुतम् ।
पञ्चामृतमिदं देवि स्वीकुरुष्व महेश्वरि ॥

पञ्चामृतस्नानं समर्पयामि ॥

नमस्ते हंसवाहिन्यै नमस्ते धातृपत्निके ।
गन्धोदकेन संपूर्णं स्नानं च प्रतिगृह्यताम् ॥

गन्धोदकस्नानं समर्पयामि ॥

सुवर्णकलशानीतैर्नानागन्धसुवासितैः ।
शुद्धोदकैश्च सुस्नानं कर्तव्यं विधिपत्निके ॥
शुद्धोदकस्नानं ॥ आचमनीयं समर्पयामि ॥
शुक्लवस्त्रद्वयं देवि कोमलं कुटिलालके ।
मयि प्रीत्या त्वया वाणि वस्त्राणि प्रतिगृह्यताम् ॥
वस्त्रयुग्मं समर्पयामि ॥
शब्दब्रह्मात्मिके देवि शब्दशास्त्रकृतालये ।
ब्रह्मसूत्रं गृहाण त्वं ब्रह्मशक्रादिवन्दिते ॥
उपवीतं समर्पयामि ॥
रत्नताटङ्ककटकं केयूरवलयं तथा ।
ददामि भूषणं देवि संगृहाण महेश्वरि ॥
आभरणान् समर्पयामि ॥
सीमन्ते ते भगवति सिन्दूरं न्यस्तमम्बिके ।
फालदेशे तव प्रीत्यै काश्मीरं तिलकं मुदा ॥
सिन्दूरं समर्पयामि ॥
विन्यस्तं नेत्रयोः कान्त्यै सौवीरांजनमुत्तमम् ।
संगृहाण सुरश्रेष्ठे वागीश्वर्यै नमोऽस्तु ते ॥
नेत्राञ्जनं समर्पयामि ॥
कुङ्कुमागरुकर्पूरैर्युक्तं मलयजं शुभम् ।
गन्धं गृहाण देवेशि वीणापुस्तकधारिणि ॥
गन्धान् धारयामि ॥

अक्षतान् धवलान् दिव्यान् कुङ्कुमाक्तान् शुभानने ।
भक्तानां सिद्धिदे देवि संगृहाण महेश्वरि ॥
अक्षतान् समर्पयामि ॥

पुन्नागैर्जातिकुसुमैर्मन्दारैः पारिजातकैः ।
करवीरैर्मनोरम्यैर्वकुलैः केतकैश्शुभैः ॥
नीलोत्पलैश्च कह्लारैरम्लानैश्च महेश्वरि ।
कल्पितानि च माल्यानि गृहाणामरवन्दिते ॥
पुष्पमालिकाः समर्पयामि ॥

॥ अथांगपूजा ॥

वाग्देवतायै नमः पादौ पूजयामि	स्कन्दपूज्यायै नमः स्कन्धौ पूजयामि
हंसवाहनायै नमः गुल्फौ ,,	लीलाशुकधारिण्यै नमः बाहून् ,,
भक्तवत्सलायै नमः जानुनी ,,	व्याख्यामूर्तये नमः मुखं ,,
त्रैलोक्यवासिन्यै नमः ऊरू ,,	सुनासिकायै नमः नासिकां ,,
शोभनकट्यै नमः कटिं ,,	विम्बोष्ठ्यै नमः ओष्ठौ ,,
जन्महीनायै नमः जघनं ,,	ज्ञानरूपायै नमः चिबुकं ,,
गम्भीरनाभये नमः नाभिं ,,	रत्नताटंकयुतायै नमः श्रोत्रे ,,
लोकमात्रे नमः उदरं ,,	इन्दीवराक्ष्यै नमः नेत्रे ,,
शारदायै नमः स्तनौ ,,	तिलकधारिण्यै नमः फालं ,,
वरदहस्तायै नमः हस्तान् ,,	वागीश्वर्यै नमः गंडस्थलं ,,
विशालवक्षसे नमःवक्षः स्थलं ,,	नीलकुन्तलायै नमः अलकान्
वरदायै नमः हृदयं ,,	श्रीसरस्वत्यै नमः शिरः ,,
गानलोलायै नमः कण्ठं ,,	ब्रह्माण्यै नमः सर्वाण्यंगानि ,,

अथाष्टोत्तरशतनामपूजा ॥

"नमः" इति प्रतिनाम अनुसंधेयम् ॥

ॐ सरस्वत्यै नमः
महाभद्रायै
महामायायै
वरप्रदायै
श्रीप्रदायै
पद्मनिलयायै
पद्माक्ष्यै
पद्मवक्त्रायै
शिवानुजायै
पुस्तकभृते १०
ज्ञानमुद्रायै
रमायै
परायै
कामरूपिण्यै
महाविद्यायै
महापातकनाशिन्यै
महाश्रयायै
मालिन्यै
महाभोगायै
महाभुजायै २०
महाभायै
महोत्साहायै
दिव्याङ्गायै
सुरवन्दितायै
महाकाल्यै
महापाशायै
महाकारायै
महाङ्कुशायै
पीतायै
विमलायै ३०
विश्वस्यै
विद्युन्मालायै
वैष्णव्यै
चन्द्रिकायै
चन्द्रवदनायै
चन्द्रलेखाविभूषितायै
सावित्र्यै
सुरसायै
देव्यै
दिव्यालङ्कारभूषितायै
वाग्देव्यै
वसुधायै
तीव्रायै
महाभद्रायै
महाबलायै
भोगदायै
भारत्यै
भामायै
गोविन्दायै
गोमत्यै ५०
शिवायै
जटिलायै
विन्ध्यवासायै
विन्ध्याचलविराजितायै
चण्डिकायै
वैष्णव्यै
ब्राह्म्यै
ब्रह्मज्ञानैकसाधनायै
सौदामिन्यै
सुधामूर्तये ६०
सुभद्रायै
सुरपूजितायै
सुवासिन्यै
सुनासायै
विनिद्रायै
पद्मलोचनायै
विद्यारूपायै
विशालाक्ष्यै
ब्रह्मजायायै

महाबलायै ७०	सर्वदेवस्तुतायै	कान्तायै
त्रयीमूर्तये	सौम्यायै	कामप्रदायै
त्रिकालज्ञायै	सुरासुरनमस्कृतायै	वन्द्यायै
त्रिगुणायै	कालरात्र्यै	श्वेतस्तनसुपूजितायै
शास्त्ररूपिण्यै	कलाधारायै	श्वेताननायै १००
शुम्भासुरप्रमथिन्यै	रूपसौभाग्यदायिन्यै	नीलभुजायै
शुभदायै	वाग्देव्यै	चतुर्वर्गफलप्रदायै
सर्वात्मिकायै	वरारोहायै ९०	हंसासनायै
रक्तबीजनिहन्त्र्यै	वाराह्यै	रक्तमध्यायै
चामुण्डायै	वारिजासनायै	नीलजंघायै
अम्बिकायै ८०	चित्राम्बरायै	निरञ्जनायै
मुण्डकायप्रहरणायै	चित्रगन्धायै	चतुराननसाम्राज्यायै
धूम्रलोचनमर्दनायै	चित्रमाल्यविभूषितायै	ब्रह्मविष्णुशिवात्मिकायै

श्रीसरस्वत्यै नमः नानाविधपरिमलपत्रपुष्पाणि समर्पयामि ॥

गुग्गुलागरुकस्तूरीगोरोचनसमन्वितम् ।
धूपं गृहाण देवेशि भक्तिं त्वय्यचलां कुरु ॥

सरस्वत्यै धूपमाघ्रापयामि ॥

कामधेनुसमुद्भूतघृतवर्तिसमन्वितम् ।
दीपं गृहाण कल्याणि कमलासनवल्लभे ॥

सरस्वत्यै दीपं दर्शयामि ॥

नैवेद्यं षड्रसोपेतं शर्करामधुसंयुतम् ।
पायसान्नं च भारत्यै ददामि प्रतिगृह्यताम् ॥

ओं भूर्भुवस्सुवः—ब्रह्मणे स्वाहा ॥

सरस्वत्यै नैवेद्यं निवेदयामि ॥

अमृतापिधानमसि ॥ निवेदनानन्तरं आचमनीयं समर्पयामि ॥

ताम्बूलं च सकर्पूरं पूगनागदलैर्युतम् ।
गृहाण देवदेवेशि त्रयीरूपे नमोऽस्तु ते ॥

सरस्वत्यै तांबूलं समर्पयामि ॥

नीराजनं गृहाण त्वं जगदानन्ददायिनि ।
जगत्तिमिरमार्ताण्डमण्डलायै नमोऽस्तु ते ॥

हिरण्य...दधाति ॥ सरस्वत्यै नमः नीराजनं दर्शयामि ॥
नीराजनानन्तरं आचमनीयं समर्पयामि ॥

शारदे लोकमातस्त्वमाश्रिताभीष्टदायिनी ।
पुष्पाञ्जलिं गृहाण त्वं मया भक्त्या समर्पितम् ॥

सरस्वत्यै पुष्पाञ्जलिं समर्पयामि ॥

"योऽपां पुष्पं वेद" इति मन्त्रपुष्पं समर्पयामि ॥

"यानि कानि च" इति प्रदक्षिणं कृत्वा ॥

पाहिपाहि जगद्वन्द्ये नमस्ते भक्तवत्सले ।
नमस्तुभ्यं नमस्तुभ्यं नमस्तुभ्यं नमो नमः ॥

सरस्वति नमस्तुभ्यं वरदे भक्तवत्सले ।
त्राहि मां नरकाद्घोराद्ब्रह्मपत्नि नमोऽस्तु ते ॥

इति नमस्कृतिं कृत्वा ॥

या कुन्देन्दुतुषार हारधवला या शुभ्रवस्त्रावृता
या वीणावरदण्डमण्डितकरा या श्वेतपद्मासना ।
या ब्रह्माच्युतशंकरप्रभृतिभिर्देवैस्सदा पूजिता
सा मां पातु सरस्वी भगवती निश्शेषजाड्यापहा ॥

पाशांकुशधरा वाणी वीणापुस्तकधारिणी ।
मम वक्त्रे वसेन्नित्यं संतुष्टा सर्वदा शिवा ॥

चतुर्दशसु विद्यासु रमते या सरस्वती ।
सा देवी कृपया मह्यं जिह्वासिद्धिं करोतु च ॥

इति सरस्वतीप्रार्थना ॥

शुक्लांबरधरं विष्णुं शशिवर्णं चतुर्भुजं ।
प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये ॥

पूर्वोक्त एवंगुण···तिथौ दुर्गालक्ष्मीसरस्वतीदेवता उद्दिश्य दुर्गा···प्रीत्यर्थं अद्य कृतदुर्गालक्ष्मीसरस्वतीपूजान्ते उपायनदानं करिष्ये ॥

दुर्गा···स्वरूपस्य ब्राह्मणस्य उभाभ्यामिदं वां पाद्यमित्यादि संपूज्य ॥

भारती प्रतिगृह्णातु भारतीयं ददाति च ।
भारती तारकोभाभ्यां भारत्यै ते नमो नमः ॥

दुर्गा...प्रीतिं कामयमानः महाविष्णुस्वरूपाय तुभ्यमहं संप्रददे ॥ इत्युपायनं दत्वा ॥ पवित्रं विसृज्य ॥ आचम्य ॥ दशम्यां प्रातरुत्थाय नित्यकर्माणि परिसमाप्य कल्पोक्तप्रकारेण पुनःपूजां कृत्वा सरस्वतीमुद्वास्य बन्धुभिस्सह भोजयेत् ॥

सरस्वतीपूजाविधिः संपूर्णः ॥

श्रीसूतः—

शृणुध्वं मुनयः सर्वे व्रतानामुत्तमं व्रतम् ।
दुर्गालक्ष्मीमहादेवीपूजनं नाम नामतः ॥
आश्वयुङ्मासि संप्राप्ते प्रतिपच्छुभवासरे ।
तदारभ्य प्रयत्नेन नवरात्रिषु पूजयेत् ॥
अथवा मूलनक्षत्रं समारभ्य प्रपूजयेत् ।
तत्राप्यशक्तो विप्रेन्द्रो नवम्यां तु प्रपूजयेत् ॥
एतद्व्रतं नरः कृत्वा सर्वसिद्धिमवाप्नुयात् ।
नित्यैश्वर्यसमायुक्तो दुर्गालोकमवाप्नुयात् ॥

ऋषयः—

पुरा केन कृतं ह्यत्र केन प्राप्तं महत्सुखम् ।
एतद्ब्रूहि महाभाग कृपाऽस्मासु तवास्ति चेत् ॥

श्रीसूतः—

श्रोतव्यं च प्रयत्नेन कृतं व्रतमनुत्तमम् ।
पुरा कृतयुगे चासीत्सुकेतुरिति विश्रुतः ॥
राजा परमधर्मात्मा प्रजापालनतत्परः ।
नित्यैश्वर्यसमायुक्तो हस्त्यश्वरथसङ्कुलः ॥

तस्य भार्या विशालाक्षी पुरा सा प्राप्तयौवना ।
साऽभून्नाम्ना सुवेदीति सर्वमंगळसंयुता ॥

तस्य राष्ट्रे न दुर्भिक्षं न भयं चापि विद्यते ।
एवं प्रवर्तमाने तु ज्ञातीनां क्रोध आगमत् ॥

सोऽपि राजा महाभागश्चतुरङ्गबलान्वितः ।
ज्ञातयो यत्र वर्तन्ते तत्र यात्रां चकार ह ॥

प्रययौ ज्ञातयो यत्र सुकेतुस्तत्र तैः सह ।
स युद्धं कृतवान् राजा तैश्च सर्वं विनाशितम् ॥

पलायमानस्य ततो सुवेदी सहसाऽभ्ययात् ।
भर्त्रा साकं समागत्य वनान्तरमुपागमत् ॥

वनान्तरं प्रविश्याथ गह्वरं वनमाविशत् ।
निरन्नौ क्षुधितौ श्रान्तौ क्षुत्क्षामेन च संयुतौ ॥

शरनिर्भिन्नगात्रस्तु स राजा रोगितां गतः ।
न च चारयितुं शक्तः पतियुक्ता वनान्तरे ॥

सापि दुःखेन महता विललाप सुदुःखिता ।
सापि स्कन्धे वाहयित्वा विचचार वनाद्वनम् ॥

तस्याः शोकं नाशयितुं मुनिराङ्गीरसोऽभ्यगात् ।
दृष्ट्वा तु शोकसन्तप्तां पतिवाहभरान्विताम् ॥

दयालुराह तां वीक्ष्य मा रोदीर्भद्रमस्तु ते ।

आङ्गीरसः—

कौ युवां दंपती यातौ बहुदुःखसमन्वितौ ।
राज्यबन्धुजनैर्हीनौ क्षुत्क्षामेन च पीडितौ ॥

एकाकिनौ समायातौ किं कार्यं वनगह्वरे ।
एतद्ब्रूहि महाभागे मा शोकं कर्तुमर्हसि ।
रक्षिष्यामि न संदेहो घोरदुःखार्णवादहम् ॥

सुवेदी—

भगवन् देवदेवेश मुनिनाथ महामते ।
राज्यबन्धुविहीनोऽयं स्वजनैश्च निराकृतः ॥
केनोपायेन वै ब्रह्मन् स्वराज्यं केन हेतुना ।
पुत्रसंपत्तिमेवाथ प्राप्नुयात्केन वै सुखम् ।
तद्ब्रूहि मे महाभाग कृपालो दीनवत्सल ॥

आङ्गीरसः—

शीघ्रमेहि मया साकं पञ्चवट्याश्शुभे तटे ॥
दुर्गास्थानं महाक्षेत्रमत्र सन्निहितं सदा ।
तस्यां संपूज्यतां देवी पुत्रपौत्रादिसंपदः ।
राज्यं च महदैश्वर्यं पुनः प्राप्ता भविष्यसि ॥
साऽपि तद्वचनं श्रुत्वा चकार गमने मतिम् ।
स्वपतिं वाहयित्वा च तेन साकं ययौ मुदा ॥
ततः सुदूरमध्वानं गत्वा पञ्चवटीतटम् ।

ततः स्नानं कृतवती सुवेदी पतिना सह ॥
तद्ब्राह्मणेन संयुक्ता दुर्गादेवीं सरस्वतीम् ।
आंगीरसो महातेजाः कारयामास पूजनम् ॥
प्रतिपद्यां समारभ्य नवम्यन्तं सुभक्तितः ।
कुंकुमागरुकस्तूरीकर्पूरैश्च समन्वितम् ॥
नानाविधैस्सुपुष्पैश्च रक्तवस्त्रादिभिः क्रमात् ।
पूजयित्वा महादेवीं षोडशैरुपचारकैः ॥
दशमेऽहनि संप्राप्ते प्रातस्स्नात्वा महामतिः ।
हवनं कारयामास पायसान्नेन मन्त्रितम् ॥
दुर्गादेवीति मन्त्रेण चकार हवनं मुदा ।
आङ्गीरसं महाभागं दम्पतीपूजनं मुदा ॥
दशदानान्यथो कृत्वा ब्राह्मणानां विशेषतः ।
व्रतं समाप्य विधिवदाश्रमं पुनरागमत् ॥
तस्य व्रतस्य माहात्म्यादन्तर्वत्नी बभूव ह ।
दशमे मासि संप्राप्ते सुषुवे लोकसुन्दरम् ॥
पुत्रसंजननं दृष्ट्वा ऋषिरांगिरसो मुनिः ।
जातकर्मादिसंस्कारं चकार भगवानृषिः ॥
सूर्यप्रतापनामेति नाम तस्य चकार ह ।
शुक्लपक्षे यथा चन्द्रो वर्धते च दिनेदिने ॥
तथैव वर्धते बालो मात्रा पित्रा च पोषितः ।
स बालो यौवनं प्राप्तः सर्वशास्त्रविशारदः ॥
ऋषिदत्तप्रभावेन महाबलपराक्रमः ।

बालश्शस्त्रास्त्रसंपन्नो ह्यनुज्ञाप्य महाऋषीन् ॥

स गत्वा शत्रुदेशं तु सुयुद्धं कृतवांस्तदा ।
तेन ध्वस्तं शत्रुसैन्यं पलायनपरं ह्यभूत् ॥

स्वराज्यं प्राप्तवान् बालो मात्रा पित्रा समन्वितः ।
वर्षेवर्षे च सा देव्याश्चकारैतद्व्रतं शुभम् ॥

तेन पुण्यप्रभावेन पुत्रपौत्रादिसंयुता ।
इह सौख्यं समासाद्य परत्र च शुभां गतिम् ॥

तस्मादेतद्व्रतं कार्यं सर्ववर्णाश्रमादिभिः ।
ये च शृण्वन्ति सततं श्रावयन्ति च ये नराः ।
ते सर्वे पापनिर्मुक्ता यास्यन्ति परमां गतिम् ॥

इति श्रीस्कांदे पुराणे सरस्वतीव्रतकल्पः संपूर्णः ॥

॥ श्रीरस्तु ॥

॥ अथ वरलक्ष्मीव्रतम् ॥

स्वगृहे चतुरश्रं मण्टपं निर्माय तन्मध्ये वेदिकां कृत्वा रङ्गवल्ल्यादिभिरलंकृत्य तन्मध्ये धान्यं निक्षिप्य तण्डुलैः पिधाय पङ्कजरेखा उल्लिख्य तदुपरि तण्डुलपूरितकुम्भं निधाय पञ्चपल्लवैः कूर्चेन नालिकेरफलेन चालंकृत्य प्राणप्रतिष्ठां कृत्वा अनुज्ञापूर्वकं पूजां कुर्यात् ॥*

शुक्लांबरधरं विष्णु...शान्तये ॥ ममोपात्त...प्रीत्यर्थं तदेव लग्नं...स्मरामि ॥ शुभे शोभने...शुभतिथौ अस्माकं सहकुटुंबानां क्षेमस्थैर्यवीर्यविजयायुरारोग्यैश्वर्याभिवृद्ध्यर्थं इष्टकाम्यार्थसिद्ध्यर्थं सत्संतानसौभाग्यशुभफलावाप्त्यर्थं दीर्घसौमङ्गल्यावाप्त्यर्थं च वरलक्ष्मीप्रसादसिद्ध्यर्थं कल्पोक्तप्रकारेण ध्यानावाहनादिषोडशोपचारैः वरलक्ष्मीपूजां करिष्ये ॥ तदङ्गं कलशपूजां कृत्वा। तज्जलेन पूजाद्रव्याण्यात्मानञ्च प्रोक्ष्य ॥ करिष्यमाणस्य...विघ्नेश्वरपूजां करिष्ये । विघ्नेश्वरं षोडशोपचारपूजाभिस्संपूज्य ॥ कलशं करे गृहीत्वा

---

*तदुक्तं स्कान्दे—पार्वतीं प्रति ईश्वरणे "शुक्ले श्रावणिके मासे पूर्णिमोपान्त्यभार्गवे । नूतनैस्तण्डुलैः पूर्णे कुम्भे चावाह्य पद्मजां । स्त्रियः प्रसन्नहृदया निर्मलाश्चित्रवाससः । सायं चारुमतीमुख्याश्चक्रुः पूजां प्रयत्नतः ॥ धारयेद्दक्षिणे हस्ते नवसूत्रं सुग्रन्थिकम् । सिध्यन्ति सर्वकार्याणि वरलक्ष्मीप्रसादतः " इति ॥

कलशस्थापने श्लोकः ॥

वरलक्ष्मीर्महादेवी सर्वाभरणभूषिता ।
कलशेऽस्मिन् वसेदस्मद्गेहे सौभाग्यकारिणी ॥

इति कलशं स्थापयेत् ॥

ध्यानम् ॥ लक्ष्मीं क्षीरसमुद्रराजतनयां श्रीरङ्गधामेश्वरीं
दासीभूतसमस्तदेववनितां लोकैकदीपांकुराम् ।
श्रीमन्मन्दकटाक्षलब्धविभवब्रह्मेन्द्रगङ्गाधरां
त्वां त्रैलोक्यकुटुंबिनीं सरसिजां वन्दे मुकुन्दप्रियाम् ॥

या सा पद्मासनस्था विपुलकटितटी पद्मपत्रायताक्षी
गंभीरावर्तनाभिस्स्तनभरनमिता शुभ्रवस्त्रोत्तरीया ।
लक्ष्मीर्दिव्यैर्गजेन्द्रैर्मणिगणखचितैस्स्नापिता हेमकुम्भै-
र्नित्यं सा पद्महस्ता मम वसतु गृहे सर्वमाङ्गल्ययुक्ता ॥

पद्मासने पद्मकरे सर्वलोकैकपूजिते ।
नारायणप्रिये देवि सुप्रीता भव सर्वदा ॥
क्षीरोदार्णवसंभूते कमले कमलालये ।
सुस्थिता भव मे गेहे सुरासुरनमस्कृते ॥

वरलक्ष्मीं ध्यायामि ॥

बालभानुप्रतीकाशे पूर्णचन्द्रनिभानने ।
सूत्रेऽस्मिन् सुस्थिता भूत्वा प्रयच्छ बहुलान्वरान् ॥

इति श्लोकेन दोरस्थापनम् ॥

सर्वमङ्गलमाङ्गल्ये विष्णुवक्षस्स्थलालये ।
आवाहयामि देवि त्वामभीष्टफलदा भव ॥
अस्मिन् कुम्भे वरलक्ष्मीमावाहयामि ॥

अनेकरत्नखचितं मुक्ताहारैर्विभूषितम् ।
स्वर्णसिंहासनं चारु प्रीत्यर्थं प्रतिगृह्यताम् ॥
वरलक्ष्म्यै नमः आसनं समर्पयामि ॥

गङ्गादिसरिदुद्भूतं गन्धपुष्पसमन्वितम् ।
पाद्यं ददाम्यहं देवि प्रसीद परमेश्वरि ॥
वरलक्ष्म्यै नमः पाद्यं समर्पयामि ॥

गङ्गानदीसमानीतं सुवर्णकलशे स्थितम् ।
गृहाणार्घ्यं मया दत्तं पुत्रपौत्रफलप्रदे ॥
वरलक्ष्म्यै नमः अर्घ्यं समर्पयामि ॥

वैष्णवि विष्णुसंयुक्ते असंख्यायुधधारिणि ।
आचम्यतां देवपूज्ये वरदेऽसुरमर्दिनि ॥
वरलक्ष्म्यै नमः आचमनीयं समर्पयामि ॥

दधिक्षीरसमायुक्तं मध्वाज्येन समन्वितम् ।
मधुपर्कं मया दत्तं स्वीकुरुष्व महेश्वरि ॥
वरलक्ष्म्यै नमः मधुपर्कं समर्पयामि ॥

पयःक्षीरघृतैर्मिश्रं शर्करामधुसंयुतम् ।
पञ्चामृतस्नानमिदं गृहाण परमेश्वरि ॥
वरलक्ष्म्यै नमः पञ्चामृतस्नानं समर्पयामि ॥

रत्नकुम्भसमानीतं सर्वतीर्थाहृतं जलम् ।
स्नानार्थं ते प्रयच्छामि गृहाण हरिवल्लभे ॥
वरलक्ष्म्यै नमः शुद्धोदकस्नानं समर्पयामि ॥
स्नानानन्तरमाचमनीयं समर्पयामि ॥

दिव्याम्बरयुगं सूक्ष्मं नवं चातिमनोहरम् ।
त्रैलोक्यजननि त्वन्तु गृहाणेदं मयार्पितम् ॥

वरलक्ष्म्यै नमः वस्त्रयुग्मं समर्पयामि ॥

माङ्गल्यमणिसंयुक्तं मुक्ताफलसमन्वितम् ।
दत्तं मङ्गलसूत्रन्ते गृहाण हरिवल्लभे ॥

वरलक्ष्म्यै नमः कण्ठसूत्रं समर्पयामि ॥

रत्नताटङ्ककेयूरहारकङ्कणमण्डिते ।
भूषणं गृह्यतां देवि नमस्ते विष्णुवत्सले ॥

वरलक्ष्म्यै नमः आभरणानि समर्पयामि ॥

चन्दनागरुकस्तूरीरोचनादिसुमिश्रितम् ।
लेपनार्थं महादेवि दास्यामि हरिवल्लभे ॥

वरलक्ष्म्यै नमः गन्धं समर्पयामि ॥

हरिद्राकुङ्कुमं चैव सिन्धूरं कज्जलान्वितम् ।
सौभाग्यद्रव्यसंयुक्तं गृहाण परमेश्वरि ॥

वरलक्ष्म्यै नमः सौभाग्यद्रव्याणि समर्पयामि ॥

शालीयान् चन्द्रवर्णांश्च स्निग्धमौक्तिकसन्निभान् ।
अक्षतान् प्रतिगृह्णीष्व भक्तानामिष्टदायिनि ॥

वरलक्ष्म्यै नमः अक्षतान् समर्पयामि ॥

मन्दारपारिजाताब्जकेतक्युत्पलपाटलैः ।
मरुमल्लिकजात्यादिपुष्पैस्त्वां पूजयाम्यहम् ॥
वरलक्ष्म्यै नमः पुष्पमालां समर्पयामि ॥

॥ अथांगपूजा ॥

वरलक्ष्म्यै नमः पादौ पूजयामि
महालक्ष्म्यै नमः गुल्फौ ,,
इन्दिरायै नमः जङ्घे ,,
चण्डिकायै नमः जानुनी ,,
क्षीराब्धितनयायै नमः ऊरू ,,
पीतांबरधारिण्यै नमः कटिं ,,
लोकमात्रे नमः जघनं ,,
विष्णुप्रियायै नमः नाभिं ,,
जगत्कुक्ष्यै नमः उदरं ,,
विश्वरूपिण्यै नमः वक्षस्थलं ,,
जगद्धात्र्यै नमः हृदयं ,,
सुस्तन्यै नमः स्तनौ ,,
गजगामिन्यै नमः पार्श्वौ ,,
कम्बुकण्ठ्यै नमः कण्ठं ,,
लोकसुन्दर्यै नमः स्कन्धौ ,,
पद्महस्तायै नमः हस्तान् ,,

पूजयामि
पद्मनाभप्रियायै नमः बाहुम् ,,
चन्द्रवदनायै नमः मुखं ,,
उत्पलाक्ष्यै नमः नेत्रे ,,
चंपकनासिकायै नमः नासिकां
हरिप्रियायै नमः श्रोत्रे ,,
बिम्बोष्ठ्यै नमः ओष्ठं ,,
श्रियै नमः अधरं ,,
चञ्चलायै नमः जिह्वां ,,
सुकपोलायै नमः गण्डस्थलं ,,
अष्टमीचन्द्रफालायै नमः फालं
मन्दस्मितायै नमः चिबुकं ,,
नीलकुन्तलायैनमः अलकान् ,,
कमलवासिन्यै नमः पिठरं ,,
पद्मासनायै नमः शिरः ,,

सर्वेश्वर्यै नमः सर्वाण्यङ्गानि पूजयामि ॥

अथ वरलक्ष्म्यष्टोत्तरशतनामावलिः ॥

"नमः" इति प्रतिनाम अनुसंधेयम्.

ॐ प्रकृत्यै नमः
विकृत्यै
विद्यायै
सर्वभूतहितप्रदायै
श्रद्धायै
विभूत्यै
सुरभ्यै
परमात्मिकायै
वाचे नमः
पद्मालयायै १०
पद्मायै
शुचये
स्वाहायै
स्वधायै
धन्यायै
हिरण्मय्यै
लक्ष्म्यै
नित्यपुष्टायै
विभावर्यै
अदित्यै २०
दित्यै
दीप्तायै
वसुधायै
वसुधारिण्यै
कमलायै
कान्तायै
कामाक्ष्यै
क्रोधसंभवायै
अनुग्रहप्रदायै
बुद्धये ३०
अनघायै
हरिवल्लभायै
अशोकायै
अमृतायै
दीप्तायै
लोकशोकविनाशिन्यै
धर्मनिलयायै
करुणायै
लोकमात्रे
पद्मप्रियायै ४०
पद्महस्तायै
पद्माक्ष्यै
पद्मसुन्दर्यै
पद्मोद्भवायै
पद्ममुख्यै
पद्मनाभप्रियायै
रमायै
पद्ममालाधरायै
देव्यै
पद्मिन्यै ५०
पद्मगन्धिन्यै
पुण्यगन्धायै
सुप्रसन्नायै
प्रसादाभिमुख्यै
प्रभायै
चन्द्रवदनायै
चन्द्रायै
चन्द्रसहोदर्यै
चतुर्भुजायै
चन्द्ररूपायै ६०
इन्दिरायै
इन्दुशीतलायै
आह्लादजनन्यै
पुष्ट्यै
शिवायै
शिवकर्यै
सत्यै
विमलायै
विश्वजनन्यै

पुष्टये नमः ७०
दारिद्र्यनाशिन्यै
प्रीतिपुष्करिण्यै
शान्तायै
शुक्लमाल्यांबरायै
श्रियै नमः
भास्कर्यै
बिल्वनिलयायै
वरारोहायै
यशस्विन्यै
वसुन्धरायै ८०
उदाराङ्गायै
हरिण्यै
हेममालिन्यै
धनधान्यकर्यै
सिद्धये नमः
स्त्रैणसौम्यायै
शुभप्रदायै
नृपवेश्मगतानन्दायै
वरलक्ष्म्यै
वसुप्रदायै ९०
शुभायै
हिरण्यप्राकारायै
समुद्रतनयायै
जयायै
मङ्गलायै
देव्यै
विष्णुवक्षःस्थलस्थितायै
विष्णुपत्न्यै
प्रसन्नाक्ष्यै
नारायणसमाश्रितायै
दारिद्र्यध्वंसिन्यै
सर्वोपद्रववारिण्यै
नवदुर्गायै
महाकाल्यै
ब्रह्मविष्णुशिवात्मिकायै
त्रिकालज्ञानसंपन्नायै
भुवनेश्वर्यै नमः

वरलक्ष्म्यै नमः नानाविधपत्रपुष्पाणि समर्पयामि ॥

धूपं दास्यामि ते देवि गुग्गुलागरुसंयुतम् ।
गृहाण त्वं महालक्ष्मि भक्तानामिष्टदायिनि ॥

वरलक्ष्म्यै नमः धूपमाघ्रापयामि ॥

साज्यं त्रिवर्तिसंयुक्तं वह्निना योजितं मया ।
गृहाण मङ्गलं दीपं वरलक्ष्मि नमोऽस्तु ते ॥

वरलक्ष्म्यै नमः दीपं दर्शयामि ॥

नानाभक्ष्यसमायुक्तं नानाफलसमन्वितम् ।
षड्रसोपायनैर्युक्तं नैवेद्यं प्रतिगृह्यताम् ॥

ओं भूर्भुवस्सुवः···ब्रह्मणे स्वाहा ॥

वरलक्ष्म्यै नमः महानैवेद्यं निवेदयामि ॥

उशीरवासितन्तोयं गन्धपुष्पसमन्वितम् ।
पानीयं गृह्यतां देवि शीतलं सुमनोहरम् ॥

वरलक्ष्म्यै नमः पानीयं समर्पयामि ॥

'पूगीफलेति' ताम्बूलं समर्पयामि ॥

नीराजनं सुमांगल्यं कर्पूरेण समन्वितम् ।
चन्द्रार्कवह्निसदृशं गृहाण हरिवल्लभे ॥

वरलक्ष्म्यै नमः नीराजनं दर्शयामि ॥

पुष्पाञ्जलिं गृहाणेदमिष्टसौख्यप्रदायिनि ।
सर्वदुःखविनाशिन्यै देवि तुभ्यं नमो नमः ॥

वरलक्ष्म्यै नमः पुष्पाञ्जलिं समर्पयामि ॥

"यानि कानि चेति" प्रदक्षिणं कृत्वा ॥

नमस्ते सर्वजननि नमस्त्रैलोक्यमोदिनि ।
हरिकान्ते नमस्तुभ्यं त्राहि मां परमेश्वरि ॥

इति नमस्कृत्य ॥

आयुरारोग्यमैश्वर्यं पुत्रपौत्रादिकान्वरान् ।
शत्रुक्षयं महालक्ष्मि यच्छ मे सर्वसंपदः ॥

इति वरलक्ष्मीं प्रार्थयेत् ॥

अथ दोरग्रन्थिपूजा ॥

कमलायै नमः	प्रथमग्रन्थिं पूजयामि
रमायै नमः	द्वितीयग्रन्थिं "
लोकमात्रे नमः	तृतीयग्रन्थिं "
विश्वजनन्यै नमः	चतुर्थग्रन्थिं "
महालक्ष्म्यै नमः	पञ्चमग्रन्थिं "
क्षीराब्धितनयायै नमः	षष्ठग्रन्थिं "
विश्वसाक्षिण्यै नमः	सप्तमग्रन्थिं "
चन्द्रसहोदर्यै नमः	अष्टमग्रन्थिं "
हरिवल्लभायै नमः	नवमग्रन्थिं "

इति दोरं संपूज्य ॥ दोरग्रहणम् ॥

सर्वमङ्गलमाङ्गल्ये सर्वपापप्रणाशिनि ।
दोरकं प्रतिगृह्णामि सुप्रीता भव सर्वदा ॥

इति दोरं हस्तेन गृहीत्वा ॥

नवतन्तुसमायुक्तं नवसूत्रमिदं शुभम् ।
कुङ्कुमाक्तं महालक्ष्मि बध्नीयां दक्षिणे करे ॥

इति दोरबन्धनम् ॥

अद्य पूर्वोक्त···शुभतिथौ वरलक्ष्मीप्रीत्यर्थं वरलक्ष्मीपूजान्ते क्षीरार्घ्यप्रदानं उपायनदानं च करिष्ये ॥

गोक्षीरेण युतं देवि गन्धपुष्पसमन्वितम् ।
गृहाणार्घ्यं मया दत्तं सुप्रीता वरदा भव ॥

वरलक्ष्म्यै नमः इदमर्घ्यम् ॥ एवं त्रिः ॥

इन्दिरा प्रतिगृह्णाति इन्दिरा वै ददाति च ।
इन्दिरा तारकोभाभ्यामिन्दिरायै नमो नमः ॥

अस्मै ब्राह्मणाय महाविष्णुस्वरूपाय उपायनमिदमहं संप्रददे न मम ॥

इत्युपायनं ब्राह्मणाय दद्यात् ॥

यस्य स्मृत्या च...महेश्वरि॥ अनेन कल्पोक्तप्रकारेण कृतया पूजया वरलक्ष्मीः सुप्रसन्ना वरदा भवतु ॥

इति वरलक्ष्मीव्रतं संपूर्णम् ॥

॥ श्रीरस्तु ॥

सप्तर्षिभ्यो नमः ॥

॥ अथ ऋषिपञ्चमीव्रतम् ॥

अथ भाद्रपदशुक्लपञ्चम्यामृषिपञ्चमीव्रतम् ॥ तच्च मध्याह्नव्यापिन्यां कार्यम् ॥ तथा च माधवीये हारीतः—"पूजाव्रतेषु सर्वेषु मध्याह्नव्यापिनी तिथिः । दिनद्वये च तद्व्याप्तौ पूर्वविद्धा प्रशस्यते" इति मदनरत्नात् ॥

प्राप्य भाद्रपदे मासि शुक्लपक्षस्य पञ्चमीं ।
तस्यां मध्याह्नसमये नद्यादौ विमले जले ॥

कृत्वाऽपामार्गसमिधोऽप्यष्टोत्तरशताधिकाः ।
अथवा कारयेत्सप्त दन्तधावनमादितः ॥

वनस्पतिप्रार्थना ॥

आयुर्बलं यशो वर्चः प्रजाः पशुवसूनि च ।
ब्रह्म प्रज्ञाञ्च मेधाञ्च त्वन्नो देहि वनस्पते ॥

संप्रार्थ्यानेन मन्त्रेण कुर्याद्वै दन्तधावनम् ॥

तत्र मन्त्रः ॥

मुखदुर्गन्धनाशाय दन्तानाञ्च विशुद्धये ।
ष्ठीवनाय च गात्राणां कुर्वेऽहं दन्तधावनम् ॥

अनेन दन्तान् संशोध्य स्नायान्मृत्स्नानपूर्वकम् ॥
रजस्वलादोषनिवृत्त्यर्थं रक्तवस्त्रदानं कृत्वा ॥

॥ पञ्चगव्यविधिः ॥

अथ देशकालौ संकीर्त्य अमुकस्याः कायशुद्ध्यर्थं प्रतिमाशुद्ध्यर्थञ्च पञ्चगव्यसंमेळनं करिष्ये ॥

गायत्र्याऽऽधाय गोमूत्रं गन्धद्वारेति गोमयम् ।
आप्यायस्वेति च क्षीरं दधिक्राव्णेति वै दधि ॥

शुक्रमसीत्याज्यम् ॥ देवस्य त्वेति कुशोदकम् ॥ दर्भैः प्रणवेनालोड्य, प्रणवेनाभिमन्त्र्य पञ्चगव्येन प्रतिमाशुद्धिं कृत्वा प्राशयेत् ॥

प्राशनमन्त्रः ॥

यत्त्वगस्थिगतं पापं देहे तिष्ठति मामके ।
प्राशनं पञ्चगव्यस्य दहत्वग्निरिवेन्धनम् ॥

कृत्वा नैमित्तिकं कर्म गत्वा निजगृहं पुनः ।
वेदिं सम्यक्प्रकुर्वीत गोमयेनोपलिप्य ताम् ।

इति हेमाद्रौ ॥

रङ्गवल्लीसमायुक्ते सर्वतोभद्रमण्डले ।
अव्रणं सजलं कुम्भं ताम्रं मृण्मयमेव वा ।

संस्थाप्य वस्त्रसंयुक्तं कण्ठदेशे सुशोभितम् ।
पञ्चरत्नसमायुक्तं फलगन्धाक्षतैर्युतम् ॥

सहिरण्यं समासाद्य ताम्रेण पटलेन वा ।
वंशमृण्मयपात्रेण यवपूर्णेन चैव हि ॥

आच्छादयेत्तं चेलेन लिखेदष्टदळन्ततः ।
तत्र सप्तऋषीन्दिव्यान् भक्तियुक्ता प्रपूजयेत् ॥

अथ ऋषिपूजार्थं यमुनापूजा ॥

आदावनुज्ञां कृत्वा । नमो ब्रह्मण्यदेवाय...गोविन्दाय नमो नमः ॥ नमस्कृत्य दक्षिणातांबूलं च गृहीत्वा । अशेषे...स्वीकृत्य मम जन्माभ्यासात्...पापक्षयार्थं करिष्यमाणसप्तर्षिपूजाङ्गं यमुनापूजां कर्तुं योग्यतासिद्धिमनुगृहाण । (योग्यतासिद्धिरस्तु) विघ्नेश्वरपूजां कृत्वा । शुभे...शुभतिथौ मया करिष्यमाणऋषिपूजाङ्गं यमुनापूजां करिष्ये । तदङ्गं कलशपूजां च करिष्ये । इति संकल्प्य । कलशपूजां कृत्वा । सर्वोपकरणानि प्रोक्ष्य स्थण्डिलं कल्पयित्वा । कुम्भं प्रतिष्ठाप्य । पुष्पाक्षतान् गृहीत्वा ॥

॥ ध्यानम् ॥

क्षीरोदार्णवसंभूते क्षीरवर्णसमप्रभे ।
प्रसादं कुरु मे देवि यमुने ते नमो नमः ॥

अस्मिन् कुम्भे यमुनादेवीं ध्यायामि ॥

विष्णुपादसमुद्भूते सर्वकामप्रदायिनि ।
सर्वसौभाग्यदे देवि यमुनायै नमोऽस्तु ते ॥

यमुनादेवीं आवाहयामि ॥

देवरूपि नमस्तुभ्यं सर्वलोकैकनायकि ।
सर्वपापप्रशमनि तुङ्गायै ते नमोऽस्तु ते ॥

यमुनायै आसनं समर्पयामि ॥

गिरिपादे नमस्तुभ्यं सर्वलक्षणसंयुते ।
सर्वप्रदे महादेवि भद्रायै ते नमोऽस्तु ते ॥

यमुनायै पाद्यं समर्पयामि ॥

कृष्णवर्णे नमस्तुभ्यं सर्वलक्षणसंयुते ।
कृष्णवर्णे महादेवि भागीरथ्यै नमो नमः ॥

यमुनायै अर्घ्यं समर्पयामि ॥

नन्दिपादे नमस्तुभ्यं शङ्करार्धशरीरिणि ।
सर्वलोकाधिपे देवि भागीरथ्यै नमो नमः ॥

यमुनायै आचमनीयं समर्पयामि ॥

स्नानं पञ्चामृतैर्देवि पयोमधुघृतैर्युतम् ।
शर्कराभिस्समोपेतं गृहाण सुरपूजिते ॥

यमुनायै पञ्चामृतस्नानं समर्पयामि ॥

सिंहपादे नमस्तुभ्यं नरसिंहसमन्विते ।
सर्वलक्षणसंपूर्णे भवनाशिनि ते नमः ॥

यमुनायै शुद्धोदकस्नानं समर्पयामि ॥

स्नानानन्तरमाचनीयं समर्पयामि ॥

देवानामुत्तमं दिव्यमूर्णातन्तुविनिर्मितम् ।
वस्त्रयुग्मं मया दत्तं गृहाण सुरपूजिते ॥

यमुनायै वस्त्रयुग्मं समर्पयामि ॥

गोदावरि नमस्तुभ्यं सर्वाभीष्टप्रदायिनि ।
सर्वपापविनिर्मुक्ते वृद्धगङ्गे नमो नमः ॥

यमुनायै कञ्चुकं समर्पयामि ॥

काञ्चनं ब्रह्मसूत्रं च ब्रह्मणा निर्मितं पुरा ।
अहं दास्यामि ते देवि यमुनायै नमोऽस्तु ते ।
यमुनायै उपवीतं समर्पयामि ॥

रत्नताटंककटकभूषणानि रविप्रभे ।
ददामि च गृहाणेदं सर्वैश्वर्यप्रदायिनि ॥
यमुनायै आभरणानि समर्पयामि ॥

चन्दनागरुकर्पूरगोरोचनसमन्वितम् ।
कस्तूर्यादि जगन्नाथे गन्धं दास्यामि भक्तितः ॥
यमुनायै गन्धान् धारयामि ॥

शालीयांश्चन्द्रवर्णाभान् हरिद्रामिलितान्छुभान् ।
अक्षतांश्च गृहाणैतानक्षय्यफलदायिनि ॥
यमुनायै अक्षतान् समर्पयामि ॥

मन्दारपारिजाताद्यैः केतकीपाटलादिभिः ।
त्वां पूजयामि यमुने वरदे भक्तवत्सले ॥
पुष्पमालां समर्पयामि ॥

॥ अथांगपूजा ॥ पूजयामि

यमुनायै नमः	पादौ पूजयामि	ह्लादिन्यै नमः	भुजान् ,,
कालिन्द्यै नमः	जानुनी ,,	उन्नतकण्ठ्यै नमः	कण्ठं ,,
सूर्यतनयायै नमः	ऊरू ,,	सरस्वत्यै नमः	मुखं ,,
शमनस्वस्रे नमः	कटिं ,,	त्रिलोकजनन्यै नमः	ललाटं ,,
गङ्गायै नमः	नाभिं ,,	भीमरथ्यै नमः	शिरः ,,
तराङ्गिण्यै नमः	स्तनौ ,,		

यमुनायै नमः सर्वाण्यङ्गानि पूजयामि ॥

दशाङ्गं गुग्गुलोपेतं चन्दनागरुमिश्रितम् ।
धूपं दास्यामि देवेशि यमुनायै नमोऽस्तु ते ॥

यमुनायै धूपमाघ्रापयामि ॥

साज्यं त्रिवर्तिसंयुक्तं वह्निना योजितं मया ।
गृहाण मङ्गलं दीपं त्रैलोक्यतिमिरापहम् ॥

यमुनायै दीपं दर्शयामि ॥

धूपदीपानन्तरमाचमनीयं समर्पयामि ॥

नैवेद्यं—भूर्भुवस्सुवः ‡ ब्रह्मणे स्वाहा ॥

सर्वभक्ष्यैश्च भोज्यैश्च रसैष्षड्भिस्समन्वितम् ।
नैवेद्यं गृह्यतां देवि यमुनायै नमोऽस्तु ते ॥

यमुनायै नैवेद्यं निवेदयामि ॥

अमृतापिधानमसि ॥ निवेदनानन्तरमाचनीयम् ॥

पानीयं पावनं श्रेष्ठं गङ्गादिसरिदुद्धृतम् ।
स्वीकुरुष्व महादेवि यमुनायै नमोऽस्तु ते ॥

यमुनायै स्वादूदकम् ॥

पूगीफलसमायुक्तं नागवल्लीदलैर्युतम् ।
कर्पूरचूर्णसंयुक्तं तांबूलं प्रतिगृह्यताम् ॥

यमुनायै कर्पूरतांबूलं समर्पयामि ॥

अज्ञानध्वान्तविध्वंसकर्मदक्षे सुरेश्वरि ।
नीराजयामि देवेशि यमुनायै नमोऽस्तु ते ॥

कर्पूरनीराजनं समर्पयामि ॥

नीराजनानन्तरमाचमनीयं समर्पयामि ॥

यमुने ते नमस्तुभ्यं सर्वैश्वर्यप्रदायिनि ।
मन्त्रपुष्पं प्रदास्यामि स्वीकुरुष्व महेश्वरि ॥

यमुनायै मन्त्रपुष्पं समर्पयामि ॥ सुवर्णपुष्पं समर्पयामि ॥

प्रदक्षिणत्रयं देवि प्रयत्नेन मया कृतम् ।
सर्वदुष्कृतसङ्घांश्च व्यपोहय सदा मम ॥

यमुनायै नमस्कारान् समर्पयामि ॥

त्राहि त्राहि महादेवि सर्वपापहरे शुभे ।
नमामि शिरसा देवि शरणं त्वां व्रजाम्यहम् ॥

नमस्ते वरदे देवि नमस्ते लोकनायकि ।
हरिकान्ते नमस्तुभ्यं त्राहि मां परमेश्वरि ॥

प्रार्थना ॥

करिष्यामि व्रतं देवि त्वद्भक्ता त्वत्परायणा ।
गृहाणेदं महादेवि यमुनायै नमोऽस्तु ते ॥

यमुनापूजा संपूर्णा ॥

अथ ऋषिपञ्चमीव्रतोद्यापनम् ॥

पूर्वेद्युरेकवारं भुक्त्वा परेद्यवि नित्यनैमित्तिकानि परिसमाप्य मध्याह्ने नद्यादिषु स्नात्वा गृहं गत्वा शुभ्रवस्त्रं परिधाय । ब्राह्मणान्नमस्कृत्य । नमो ब्रह्मण्य + गोविन्दाय नमो नमः ॥ दक्षिणां तांबूलं च गृहीत्वा अनुज्ञां कुर्यात् ॥ अशेषे...स्वीकृत्य मम जन्माभ्यासात्...पापक्षयार्थं मम इहजन्मनि जन्मान्तरेषु स्त्रीजन्मप्रादुर्भावसंभूतरजोदर्शनादारभ्य रजोनिवृत्तिपर्यन्तं मध्यवर्तिनि काले मयि ऋतुमत्यां सत्यां मया आचरिततांबूलचर्वणरजोनिर्माणपरपुरुष-निरीक्षणबहिर्निर्गमनचण्डालदर्शनभाण्डादिस्पर्शनभर्तृसहशयनादिभिर्जनितसकलप्रतिबन्धकदोषनिवृत्त्यर्थं ज्ञानतोऽज्ञानतश्च अकालस्नानाकालभोजनपर्युषितान्नभोजनदर्पणनिरीक्षणकटशयनकुङ्कुमादिलेपनभर्तृसंभाषणादिरजस्वलानियमराहित्यादीनां प्रसूतिकामध्ये दशदिवसपर्यन्तेष्वौषधसेवनपलाण्डुलशुनभक्षणमलमूत्रादिसेवनशूद्रादि संभाषणादीनां सर्वेषां पापानां सद्यः अपनोदनद्वारा समस्तपापक्षयार्थं मया आचरितस्य ऋषिपञ्चमीव्रतस्य उद्यापनकर्मणः कल्पोक्तसंपूर्णसाङ्गफलसिद्ध्यर्थं अरुन्धतीसहितकश्यपादिसप्तऋषिप्रीत्यर्थं सप्तर्षिप्रसादसिद्ध्यर्थं आचार्यादिऋत्विङ्मुखपुरस्सरं ब्रह्माण्डपुरणोक्तप्रकारेण ऋषिपञ्चमीव्रतोद्यापनकर्म कर्तुं योग्यतासिद्धिमनुगृहाण (योग्यतासिद्धिरस्तु). विघ्नेश्वरपूजां कृत्वा ॥ सङ्कल्प्य ॥ शुभे शोभने ...शुभतिथौ जन्माभ्यासादित्यादि... ऋषिपञ्चमीव्रतोद्यापनकर्म करिष्ये ॥ विघ्नेश्वरमुद्वास्य । गृहप्रीतिं अभ्युदयं च कृत्वा ॥ अनन्तरम् ॥ गृहस्येशानदिग्भागे गोमयेन गोचर्ममात्रं चतुरश्र

स्थण्डिलमुपलिप्य रङ्गवल्ल्यादिभिरलंकृत्य मध्ये अष्टदलपद्मं विधाय तदुपरि भारत्रीहिं तदर्धं तण्डुलान् तदर्धं माषान् तदर्धं तिलांश्च उपर्युपरि निक्षिप्य तण्डुलानां मध्ये प्रागग्रान् दर्भानास्तीर्य तदुपरि जलपूरितकुम्भं निधाय परितः सप्तकुम्भान् प्रतिष्ठाप्य तान् पंचपल्लवनालिकेरकूर्चादिभिरलंकृत्य तदुपरि प्रतिमां स्थापयित्वा । अथ आचार्यवरणं ऋत्विग्वरणं च कुर्यात् । अस्मिन् मया आचर्यमाणऋषिपञ्चमीव्रतोद्यापनकर्मणि सकलकर्म कर्तुं आचार्यं त्वां वृणे ॥ अस्मिन्···कर्मणि कश्यपप्रतिमापूजार्थं ऋत्विजं त्वां वृणे॥ अत्रये । भरद्वाजाय । विश्वामित्राय । गौतमाय । जमदग्नये । वसिष्ठाय । अरुन्धत्यै । एवं क्रमशः ब्राह्मणान् वृत्वा । मण्टपशुद्ध्यर्थं पुण्याहं वाचयित्वा सर्वोपकरणानि प्रोक्ष्य ऋत्विग्भिस्सह आचार्यः तत्तत्प्रतिमापूजां करिष्य इति संकल्प्य। कलशपूजां कृत्वा । पूजोपकरणानि प्रोक्ष्य आत्मानं च प्रोक्ष्य कुम्भं स्पृष्ट्वा जपेत् । आपो वा इदं···दुरितक्षयकारकाः । कुंभेषु वरुणमावाह्य तदुत्तरि प्रतिमासु कश्यपादीनावाहयेत् ॥

आदौ प्रत्येकमेकैकं ऋषिं संपूज्य तदनन्तरं समष्ट्या सर्वान् ऋषीन् पूजयेत् ॥

अथ सप्तऋषिध्यानम् ॥

कश्यपस्सर्वलोकाद्यस्सर्वशास्त्रार्थकोविदः ।
आत्मयोगबलेनैव सृष्टिस्थित्यन्तकारकः ॥

मध्ये कश्यपं ध्यायामि ॥

अग्निहोत्ररतं दान्तं सदा व्रतपरायणम् ।
सत्कर्मनिरतं शान्तमर्चयेदत्रिमव्ययम् ॥

प्रागादि अत्रिं ध्यायामि ॥

जटिलं तपसा सिद्धं यज्ञसूत्राक्षधारिणम् ।
कमण्डलुधरं नित्यं भरद्वाजं नतोऽस्म्यहम् ॥

भरद्वाजं ध्यायामि ॥

कृष्णाजिनधरं देवं सदण्डपरिधानकम् ।
दर्भपाणिं जटाजूटं विश्वामित्रं सनातनम् ॥

विश्वामित्रं ध्यायामि ॥

योगाढ्यस्सर्वभूतानामन्नदानरतस्सदा ।
अहल्यायाः पतिश्श्रीमान्गौतमस्सर्वपावनः ॥

गौतमं ध्यायामि ॥

अक्षसूत्रधरं देवमृषीणामधिपं प्रभुम् ।
दर्भपाणिं जटाजूटं जमदग्निं मुनिं भजे ॥

जमदग्निं ध्यायामि ॥

शिवध्यानरतं शान्तं त्रिदशैरभिपूजितम् ।
ब्रह्मसूनुं महात्मानं वसिष्ठं पूजयाम्यहम् ॥

वसिष्ठं ध्यायामि ॥

अरुन्धति नमस्तुभ्यं महापुण्यप्रवर्धनि ।
पतिव्रतानां सर्वासां धर्मशीलप्रवर्धनि ॥

अरुन्धतीं ध्यायामि ॥

॥ अथ कश्यपपूजा ॥

जटिलं भस्मदिग्धाङ्गं साक्षसूत्रकमण्डलुम् ।
वल्कलाजिनकौपीनं सातपत्रं सदण्डकम् ॥

ऋषेर्मन्त्रकृतामित्यस्य मन्त्रस्य । कश्यप ऋषिः । कश्यपो देवता । पङ्क्तिश्छन्दः ॥ कश्यपावाहने विनियोगः ॥ ऋषेर्मन्त्रकृतां स्तोमैः कश्यपोद्वर्धयन् गिरः । सोमं नमस्य राजानं यो जज्ञे वीरुधां पतिरिन्द्रायेन्द्रोपरिस्रव ॥ ओं भूः अदितिसहितकश्यपमावाहयामि ॥ ओं भुवः ...यात्—कश्यपाय आसनं समर्पयामि ॥ मरीचुपुत्राय पाद्यं ॥ सूर्यजनकाय अर्घ्यं ॥ इन्द्रताताय आचमनीयम् ॥ वामन-गुरवे मधुपर्कं ॥ अदितिभर्त्रे पञ्चामृतस्नानम् ॥ ब्रह्मनेत्रे शुद्धोदक-स्नानम् ॥ देवप्रियाय वस्त्रद्वयम् ॥ सुवर्चसे यज्ञोपवीतम् ॥ विशा-लाक्षाय आभरणानि ॥ सर्वविदे गन्धम् ॥ महते अक्षतान् ॥

कश्यपाय नमः	वामनगुरवे नमः	विशालाक्षाय नमः
मरीचिपुत्राय नमः	अदितिभर्त्रे नमः	सर्वविदे नमः
कविजनकाय नमः	देवप्रियाय नमः	महते नमः
इन्द्रताताय नमः	सुवर्चसे नमः	विमलाय नमः

इति पुष्पाणि समर्पयामि ॥ धमिते धूपम् ॥ अकल्मषाय दीपम् ॥ सुमनोरथाय नैवेद्यम् ॥ जटिने तांबूलम् ॥ दीप्ततेजसे नीराजनम् ॥ दण्डिने मन्त्रपुष्पाणि ॥

अथ अत्रिपूजा ॥

मरीचितनयं देवं साक्षसूत्रकमण्डलुम् ।
अनसूयापतिं शान्तमात्रिं निष्कल्मषं मुनिम् ॥

जटिलं भस्मदिग्धाङ्गं साक्षसूत्रकमण्डलुम् ।
वल्कलाजिनकौपीनं सातपत्रं सदण्डकम् ॥
सकुशं सोत्तरीयं च सपत्नीकं प्रपूजयेत् ॥

स्वर्भानोरित्यस्य मन्त्रस्य मरीचिपुत्रोऽत्रि ऋषिः । अत्रिर्देवता । त्रिष्टुप्छन्दः । अत्र्यावाहने विनियोगः ॥ मन्त्रः ॥ स्वर्भानो रथ यदिन्द्रमाया आवोदिवा वर्तमाना आवाहन् । गूळहं सूर्यं तमसापवृतेन तुरीयेण ब्रह्मणा विन्ददत्रिः ॥ ओं भूः ॥ अनसूयासमेतमत्रिमावाहयामि ॥ अत्रये नमः आसनम् ॥ धीमते पाद्यम् ॥ योगीन्द्राय अर्घ्यम् ॥ दत्तात्रेयप्रियाय आचमनीयम् ॥ चन्द्रताताय मधुपर्कम् ॥ अनसूयापतये पञ्चामृतम् ॥ नित्यशुद्धाय शुद्धोदकम् ॥ वल्कलधारिणे वस्त्रम् ॥ ब्रह्मिष्ठाय यज्ञोपवीतम् ॥ दीप्ताय आभरणम् ॥ दण्डधारिणे गन्धम् ॥ त्रिमूर्तिजनकाय अक्षतान् ॥ ऊर्ध्वरेतसे पुष्पाणि पूजयामि—

अत्रये नमः	दत्तात्रेयप्रियाय नमः	त्रिमूर्तिजनकाय नमः
धीमते नमः	चन्द्रताताय नमः	मरीचिपुत्राय नमः
योगीन्द्राय नमः	द्युतिमते नमः	

इति पुष्पाणि समर्पयामि ॥

सुगन्धदेहाय नमः धूपम् ॥ द्युतिमते नमः दीपम् ॥ नित्यतृप्ताय नमः नैवेद्यम् ॥ विरागिणे नमः तांबूलम् ॥ अर्चिष्मते नमः नीराजनम् ॥ भ्राजिष्णवे नमः मन्त्रपुष्पम् ॥ संयमिने नमः प्रदक्षिणम् ॥ दमिने नमः नमस्कारान् ॥ कल्मषघ्नाय नमः पुनरर्घ्यं ॥ अत्रये नमः सर्वोपचारान् ॥

३. भरद्वाजपूजा ॥

भरद्वाजं महाशान्तं सुशीलापतिमूर्जितम् ।
अक्षस्रग्गन्धहस्तं च मुनिमाङ्गिरसं भजे ॥

जटिलं भस्मदिग्धाङ्गं साक्षसूत्रकमण्डलुम् ।
वल्कलाजिनकौपीनं सातपत्रं सदण्डकम् ॥
सकुशं सोत्तरीयं च सपत्नीकं प्रपूजयेत् ॥

अविन्दन्नित्यस्य मन्त्रस्य ॥ सौजिको भारद्वाज ऋषिः ॥ त्रिष्टुप् छन्दः ॥ भरद्वाजो देवता। भरद्वाजावाहने विनियोगः ॥ अविन्दतेति हि हितं यदासीद्यज्ञस्य धाम परमं गुहा यत्। धातुर्द्युतानात्सवितुश्च विष्णोर्भरद्वाजो बृहदाचक्रे अग्नेः ॥ ओं भूः ॥ सुशीलासहितं भरद्वाजमावाहयामि ॥ भरद्वाजाय नमः आसनम् ॥भ्राजिष्णवे पाद्यम् ॥ विदुषे अर्घ्यं ॥ अकल्मषाय आचमनीयम् ॥ वल्कलधारिणे मधुपर्कम् ॥ पवित्रदेहाय पञ्चामृतस्नानम् ॥ परिशुद्धाय शुद्धोदकस्नानम् ॥ ज्ञानिने वस्त्रम् ॥ मुनये यज्ञोपवीतम् ॥ ब्रह्मचारिणे आभरणानि ॥ त्रिकालज्ञानिने गन्धं समर्पयामि ॥ मुनये अक्षतान् ॥ पवित्राय पुष्पाणि पूजयामि ॥

भरद्वाजाय नमः	वल्कलधारिणे नमः	मुनये नमः
भ्राजिष्णवे नमः	पवित्रदेहाय नमः	ब्रह्मचारिणे नमः
विदुषे नमः	परिशुद्धाय नमः	त्रिकालज्ञाय नमः
अकल्मषाय नमः	ज्ञानिने नमः	सुप्रसिद्धाय नमः

इति पुष्पाणि समर्पयामि ॥

सुनासिकाय नमः धूपम् ॥ ज्ञानिने दीपम् ॥ अवाप्तसकलकामाय नैवेद्यम् ॥ सुमनस्काय तांबूलम् ॥ तेजसे नीराजनम् ॥

भ्राजिष्णवे मन्त्रपुष्पम् ॥ जितक्रोधाय आत्मप्रदक्षिणम् ॥ अवन्दिने नमस्कारान् ॥ मुमुक्षवे पुनरर्घ्यं ॥ भरद्वाजाय सर्वोपचारान् ॥

४. विश्वामित्रपूजा ॥

हिरण्यगर्भसम्भूतं जटामकुटधारिणम् ।
कुमुद्वतीपतिं शान्तं विश्वामित्रमहं भजे ॥

जटिलं भस्मदिग्धाङ्गं साक्षसूत्रकमण्डलुम् ।
वल्कलाजिनकौपीनं सातपत्रं सदण्डकम् ॥

सकुशं सोत्तरीयं च सपत्नीकं प्रपूजयेत् ।

इमे भोजा इत्यस्य मन्त्रस्य । प्रगाथो विश्वामित्र ऋषिः ॥ त्रिष्टुप् छन्दः ॥ गाधिपुत्रो विश्वामित्रो देवता ॥ विश्वामित्रावाहने विनियोगः ॥ मन्त्रः—इमे भोजा अङ्गीरसो विरूपा दिवस्पुत्रासो असुरस्य वीराः । विश्वामित्राय ददतो मघानि सावे प्रतिरं न आयुः ॥ ओं भूः कुमुद्वतीसहितं विश्वामित्रमावाहयामि ॥ विश्वामित्राय नमः आसनम् ॥ दग्धकल्मषाय पाद्यम् ॥ शुद्धबुद्धये अर्घ्यं समर्पयामि ॥ उग्रतपसे आचमनीयम् ॥ अव्यग्राय नमः मधुपर्कम् ॥ दण्डपाणये पञ्चामृतम् ॥ कमण्डलुधराय शुद्धोदकम् ॥ अजिनाम्बराय वस्त्रम् ॥ तेजस्विने यज्ञोपवीतम् ॥ रम्याय आभरणानि ॥ कुशिकपौत्राय गन्धम् ॥ वरदाय अक्षतान् ॥

गायत्रीप्रियाय नमः	मुमुक्षवे नमः
वेदशास्त्रार्थतत्त्वज्ञानाय नमः	वीराय नमः
अमायिने नमः	दग्धकल्मषाय नमः
ब्रह्मर्षये नमः	अनघतेजसे नमः

बुद्धिप्रदाय नमः	तेजस्विने नमः
उग्रतपसे नमः	रम्याय नमः
अव्यग्राय नमः	कुशिकपौत्राय नमः
दण्डपाणये नमः	वरदाय नमः
कमण्डलुधराय नमः	गाधितनूभवाय नमः
अजिनाम्बराय नमः	

पुष्पाणि समर्पयामि ॥

कमण्डलुधराय नमः धूपम् ॥ तेजसे नमः दीपम् ॥ रम्याय नमः नैवेद्यम् ॥ कौशिकाय नमः तांबूलम् ॥ वरदाय नमः नीराजनम् ॥ गाधितनाय नमः मन्त्रपुष्पम् ॥ रुद्रप्रियाय नमः प्रदक्षिणम् ॥ गायत्रीजपनन्दाय नमः नमस्कारान् ॥ वेदशास्त्रार्थतत्त्वज्ञाय नमः पुनरर्घ्यम् ॥ विश्वामित्राय नमः सर्वोपचारान् समर्पयामि ॥

९. अथ गौतमपूजा ॥

रहोगणात्मजं शान्तं त्रिपुंड्राङ्कितमस्तकम् ।
अक्षस्रक्कुण्डले दण्डान् दधानं गौतमं भजे ॥
जटिलं भस्मदिग्धाङ्गं साक्षसूत्रकमण्डलुम् ।
वल्कलाजिनकौपीनं सातपत्रं सदण्डकम् ॥
सकुशं सोत्तरीयं च सपत्नीकं प्रपूजयेत् ।

अभित्वा गौतम इत्यस्य मन्त्रस्य ॥ गौतमऋषिः ॥ गायत्रीछन्दः ॥ गौतमो देवता ॥ गौतमावाहने विनियोगः ॥ मन्त्रः—अभित्वा गौतमा गिरा जातवेदो विचर्षणे । द्युम्नै रभिप्रणो नुमः ॥ ओं भूः अहल्यापतिं गौतममावाहयामि ॥ गौतमाय नमः आसनम् ॥

भस्मोद्धूलितविग्रहाय नमः पाद्यम् ॥ रुद्राक्षमालिने नमः अर्घ्यम् ॥ रुद्रप्रियाय नमः आचमनीयम् ॥ देवपूजानिरताय नमः मधुपर्कं समर्पयामि ॥ अहल्यापतये नमः पञ्चामृतम् ॥ ध्वस्तपापाय नमः शुद्धोदकस्नानम् ॥ कमण्डलुधराय नमः वस्त्रम् ॥ सुवर्चसे नमः यज्ञोपवीतम् ॥ निष्कल्मषाय नमः आभरणानि ॥ निरुपद्रवाय नमः गन्धान् ॥ निरहंकाराय नमः अक्षतान् समर्पयामि ॥

गौतमाय नमः	ध्वस्तपापाय नमः	निरहंकाराय नमः
भस्मोद्धूलितविग्रहाय	कमण्डलुधराय नमः	वल्कलाम्बराय नमः
रुद्राक्षमालिने नमः	सुवर्चसे नमः	नित्यतृप्ताय नमः
शिवलिङ्गार्चकाय नमः	निष्कल्मषाय नमः	निर्मोहाय नमः
अहल्यापतये नमः	निरुपद्रवाय नमः	

पुष्पाणि समर्पयामि ॥

विमलाय नमः धूपम् ॥ द्युतिमते नमः दीपम् ॥ नित्यतृप्ताय नमः नैवेद्यम् ॥ अक्लेशाय नमः तांबूलम् ॥ वरदाय नमः नीराजनम् ॥ जटिने नमः मन्त्रपुष्पम् ॥ संयमिने नमः प्रदक्षिणम् ॥ मुमुक्षवे नमः नमस्कारान् ॥ गौतमाय नमः पुनरर्घ्यम् ॥ गौतमाय नमः सर्वोपचारान् ॥

६. जमदग्निपूजा ॥

शान्तं जितारिषड्वर्गं भृगुपुत्रं महाद्युतिम् ।
दण्डाक्षसूत्रपाणिं च जमदग्निं नमाम्यहम् ॥

जटिलं भस्मदिग्धाङ्गं साक्षसूत्रकमण्डलुम् ।
वल्कलाजिनकौपीनं सातपत्रं सदण्डकम् ॥

सकुशं सोत्तरीयं च सपत्नीकं प्रपूजयेत् ॥

प्रसूतो भक्षमित्यस्य मन्त्रस्य । प्रगाधो जमदग्नि ऋषिः ॥ जगतीछन्दः ॥ जमदग्निर्देवता ॥ जमदग्न्यावाहने विनियोगः ॥ मन्त्रः ॥ प्रसूतो भक्ष मकरं चरामः स्तोमं चेमं प्रथमः सूरिरुन्मृजे ॥ सुते सातेन यद्यागमं वां प्रति विश्वामित्र जमदग्नीदमे ॥ ओं भूः ॥ रेणुकापतिं जमदग्निमावाहयामि ॥ जमदग्नये नमः आसनम् ॥ निर्मदाय नमः पाद्यम् ॥ वीतरागाय नमः अर्घ्यम् ॥ कान्तिमते नमः आचमनीयम् ॥ शान्ताय नमः मधुपर्कम् ॥ दान्ताय नमः पञ्चामृतम् ॥ शुचये नमः शुद्धोदकम् ॥ रामप्रियाय नमः वस्त्रम् ॥ अकामाय नमः यज्ञोपवीतम् ॥ भक्तप्रियाय नमः आभरणानि ॥ दण्डिने नमः गन्धम् ॥ चण्डाय नमः अक्षतान् ॥

कमण्डलुधराय नमः	इष्टाय नमः	इष्टाय नमः
साक्षस्रजे नमः	विमलाय नमः	पुष्टाय नमः
दयालवे नमः	कल्मषापहराय नमः	तुष्टाय नमः
दोषवर्जिताय नमः	इष्टप्रदाय नमः	जमदग्नये नमः

त्वगम्बराय नमः पुष्पाणि ॥ दोषवर्जिताय नमः धूपम् ॥ ज्ञानिने नमः दीपम् ॥ विमलाय नमः नैवेद्यम् ॥ कल्मषापहराय नमः तांबूलम् ॥ इष्टप्रदाय नमः नीराजनम् ॥ शिष्टाय नमः मन्त्रपुष्पम् ॥ श्रेष्ठाय नमः प्रदक्षिणम् ॥ पुष्टाय नमः नमस्कारान् ॥ विशिष्टाय नमः पुनरर्घ्यम् ॥ जमदग्नये सर्वोपचारपूजां समर्पयामि ॥

७. अथ वसिष्ठपूजा ॥

तपोनिधिं दयासिन्धुं ब्रह्मण्यं ब्रह्मसम्भवम् ।
स्रग्गन्धपाणिं वरदं वसिष्ठं प्रणमाम्यहम् ॥

जटिलं भस्मदिग्धाङ्गं साक्षसूत्रकमण्डलुम् ।
वल्कलाजिनकौपीनं सातपत्रं सदण्डकम् ॥
सकुशं सोत्तरीयं च सपत्नीकं प्रपूजयेत् ॥

श्वित्यञ्चोमा इत्यस्य मन्त्रस्य ॥ मैत्रावरुणो वसिष्ठ ऋषिः ॥ त्रिष्टुप् छन्दः ॥ वसिष्ठो देवता ॥ वसिष्ठावाहने विनियोगः ॥ मन्त्रः- श्वित्यञ्चोमादक्षिणतस्कपर्दा धियं जिन्वासो अभिहिप्रमन्दुः । उत्तिष्ठ-न्वोचे परिबर्हिषो नृन्नमेदूरादवितवे वसिष्ठाः ॥ ओं भूः ॥ अरुन्धती-पतिं वसिष्ठमावाहयामि ॥ वसिष्ठाय नमः आसनम् ॥ वरिष्ठाय नमः पाद्यम् ॥ गरिष्ठाय नमः अर्घ्यम् ॥ धर्मिष्ठाय नमः आचमनीयम् ॥ अरुन्धतीपतये नमः मधुपर्कम् ॥ दीप्तिमते नमः पञ्चामृतस्नानम् ॥ त्रिकालज्ञाय नमः शुद्धोदकस्नानम् ॥ योगिने नमः वस्त्रम् ॥ राम-प्रियाय नमः यज्ञोपवीतम् ॥ शरणागतवत्सलाय नमः आभरणम् ॥ मनोरथफलप्रदाय नमः अक्षतान् ॥

वसिष्ठाय नमः	अरुन्धतीपतये नमः	रामप्रियाय नमः
वरिष्ठाय नमः	दीप्तिमते नमः	शरणागतवत्सलाय
गरिष्ठाय नमः	त्रिकालज्ञाय नमः	मनोरथफलप्रदाय
धर्मिष्ठाय नमः	योगिने नमः	भक्ताभीष्टप्रदाय

पुष्पाणि समर्पयामि ॥

निष्कल्मषाय नमः धूपम् ॥ मैत्रावरुणाय नमः दीपम् ॥ ब्रह्म-चारिणे नमः नैवेद्यम् ॥ विरागिणे नमः तांबूलम् ॥ ज्ञानिने नमः नीराजनम् ॥ जटिने नमः पुनरर्घ्यम् ॥ वेदविदे नमः मन्त्रपुष्पम् ॥ दान्ताय नमः प्रदक्षिणम् ॥ शान्ताय नमः नमस्कारन् ॥ ब्रह्मिष्ठाय नमः पुनरर्घ्यम् ॥ वसिष्ठाय नमः सर्वोपचारपूजाः समर्पयामि ॥

अथ अगस्त्यपूजा ॥

लोपामुद्रापतिं देवमगस्त्यमृषिसत्तमम् ।
दक्षिणाशापतिं रामतारकप्रियमूर्जितम् ॥
जटिलं भस्मदिग्धाङ्गं साक्षसूत्रकमण्डलुम् ।
वल्कलाजिनकौपीनं सातपत्रं सदण्डकम् ॥
सकुशं सोत्तरीयं च सपत्नीकं प्रपूजयेत् ॥

अगस्त्यः खनमान इत्यस्य मन्त्रस्य । अगस्त्य ऋषिः ॥ त्रिष्टुप् छन्दः ॥ अगस्त्यो देवता ॥ अगस्त्यावाहने विनियोगः ॥ मन्त्रः ॥ अगस्त्यः खनमानः खनित्रैीहि प्रजामप्यतं बलमिच्छमानाः ॥ उभौ वर्णावृषिरुग्रः पुपोष सत्यादेवेष्वाशिष्यो जिगाय ॥ ओं भूः ॥ लोपामुद्रासमेतमगस्त्यमावाहयामि ॥ लोपामुद्रापतये नमः आसनम्॥ आत्मवते नमः अर्घ्यम् ॥ इच्छापुष्टये नमः पाद्यम् ॥ ईषणत्रयवर्जिताय नमः आचमनीयम् ॥ उत्तमाय नमः मधुपर्कं समर्पयामि ॥ ऊर्जिततपसे नमः पञ्चामृतस्नानम् ॥ ऋग्यजुस्सामपारगाय नमः शुद्धोदकस्नानम् ॥ ऋणमोचनाय नमः वस्त्रम् ॥ लुप्तपापाय नमः यज्ञोपवीतम् ॥ ओंकारप्रियाय नमः आभरणानि ॥ उदाराय नमः मालिकाः ॥

अगस्त्याय नमः	साक्षिणे नमः	ताराय नमः
लोकपूजिताय नमः	सनातनाय नमः	तापसप्रियाय नमः
लोपामुद्रापतये नमः	रामप्रियाय नमः	विन्ध्यगुरवे नमः
कुम्भसम्भवाय नमः	रञ्जिततपसे नमः	वीतरागाय नमः
समुद्रपायिने नमः	तारकाय नमः	विष्णुरताय नमः

विश्वात्मने नमः ॥ इति पुष्पाणि समर्पयामि ॥

गन्धज्ञाय नमः धूपम् ।। ज्योतिष्मते नमः दीपं दर्शयामि ।। सारग्राहिणे नमः नैवेद्यम् ।। शुचये नमः तांबूलम् ।। प्रकाशरूपाय नमः नीराजनम् ।। धनदाय नमः दक्षिणाम् ।। सुवर्चसे नमः मन्त्र-पुष्पम् ।। सुरेन्द्रवन्दिताय नमः प्रदक्षिणम् ।। ऋषिवर्याय नमः नमस्कारान् ।। प्रसन्नाय नमः पुनरर्घ्यम् ।। श्री अगस्त्याय नमः सर्वोपचारपूजाः ।।

अथ अरुन्धतीपूजा ।।

अरुन्धत्यै नमः ध्यानम् ।। वसिष्ठपत्न्यै नमः आवाहनम् ।। सत्यै नमः आसनम्।। पतिव्रतायै नमः पाद्यम्।। सौमङ्गल्यहेतवे नमः अर्घ्यम् ।। तपस्विन्यै नमः आचमनीयम् ।। मुनिधर्मप्रवर्तिन्यै नमः मधुपर्कम् ।। नित्यनिर्मलायै नमः स्नानम् ।। मानिन्यै नमः वस्त्रम् ।। गोप्यै नमः कञ्चुकम् ।। धर्मरतायै नमः गन्धम् ।। अक्षतव्रतायै नमः अक्षतान् ।। सुमङ्गल्यै नमः हरिद्राचूर्णम् ।। वसिष्ठप्रियायै नमः कुङ्कुमम् ।। सुगुणोज्ज्वलायै नमः आभरणानि ।। पावन्यै नमः पुष्पाणि।। हविर्गन्धप्रियायै नमः धूपम् । ज्योतिर्मयायै नमः दीपम् ।। धर्म-ब्रह्मानन्दवत्यै नमः नैवेद्यम् ।। सर्वभूतानुरागिण्यै नमः तांबूलम् ।। ऋतुदक्षिणायै नमः दक्षिणाम् ।। ऋषिपत्नीसमाश्रितायै नमः नीरा-जनम् ।। मन्त्रज्ञायै नमः मन्त्रपुष्पम् ।। शिशुमारगतये नमः प्रदक्षि-णम् ।। सर्वलोकनमस्कृतायै नमः नमस्कारान् ।। वसिष्ठकुटुंबिन्यै नमः पुनरर्घ्यम् ।।

स्मृतिमात्रेण भक्तानां सर्वपापविनोदिनि ।
सूक्ष्मात्सूक्ष्मतरे मातर्दर्शनात्पुण्यदायिनि ।।

पतिव्रताग्रगण्ये त्वं सौमङ्गल्यसुखप्रदे ।
अरुन्धति महादेवि ब्रह्मशक्ते चिरंतनि ।
जय त्वं नित्यकल्याणि वसिष्ठैककुटुम्बिनि ॥

पावनत्वं च सौभाग्यं सुखं शाश्वतमेव च ।
महादेवि जगद्वन्द्ये व्रतसंपूर्णतां कुरु ॥

इति संप्रार्थ्य ॥

आगच्छन्तु महाभागाश्चतुर्वेदपरायणाः ।
यावद्व्रतमिदं कुर्वे कृपया भवतामहम् ॥

अरुन्धतीसहितकश्यपादिसप्तर्षीनावाहयामि ॥

इत्यावाह्य ॥ अथ प्राणप्रतिष्ठां कुर्यात् ॥

ऋग्यजुस्सामवेदानां स्वरूपेभ्यो नमो नमः ।
पुराणपुरुषेभ्यो हि देवर्षिभ्यो नमो नमः ॥

अरुन्धतीसहितकश्यपादिसप्तर्षिभ्यो नमः आसनं समर्पयामि ॥

गन्धपुष्पाक्षतैर्युक्तं पाद्यं गृह्णन्तु वै द्विजाः ।
प्रसादं कुर्वतां प्रीतास्तुष्टास्सन्तु सदा मम ॥

अरुन्धती...भ्यो नमः पाद्यं समर्पयामि ॥

नभस्ये शुक्लपञ्चम्यामर्चिता ऋषिसत्तमाः ।
दहन्तु पापं मे सर्वे गृह्णन्त्वर्घ्यं नमो नमः ॥

अरुन्धती...भ्यो नमः अर्घ्यं समर्पयामि ॥

लोकानां तुष्टिकर्तारो यूयं सर्वे तपोधनाः ।
नमो वो धर्मविज्ञेभ्यो महर्षिभ्यो नमो नमः ॥

अरुन्धती...भ्यो नमः आचमनीयं समर्पयामि ॥

पयो दधि घृतं चैव शर्करामधुसंयुतम् ।
पञ्चामृतेन स्नपनं करोमि मुनिसत्तमाः ॥

अरुन्धती...भ्यो नमः पञ्चामृतस्नानं समर्पयामि ॥

मन्दाकिन्यास्समानीतं यमुनागौतमीजलम् ।
कृष्णामरुद्वृधानर्मदाभ्यः स्नानार्थमाहृतम् ॥

अरुन्धती...भ्यो नमः शुद्धोदकस्नानं समर्पयामि ॥
स्नानानन्तरमाचमनीयं समर्पयामि ॥

सर्वे नित्यं तपोनिष्ठा ब्रह्मज्ञास्सत्यवादिनः ।
वस्त्राणि प्रतिगृह्णन्तु मुक्तिदासन्तु मे सदा ॥

अरुन्धती...भ्यो नमः वस्त्रं समर्पयामि ॥

नानामन्त्रैस्समुद्भूतं त्रिवृतं ब्रह्मसूत्रकम् ।
प्रत्येकं च प्रयच्छामि मुनयः प्रतिगृह्यताम् ॥

अरुन्धती...भ्यो नमः उपवीतानि ॥

कुङ्कुमागरुकर्पूरसुगन्धैर्मिश्रितं शुभम् ।
गन्धाढ्यं चन्दनं दिव्यं गृह्णन्तु मुनिसत्तमाः ॥

अरुन्धती...भ्यो नमः गन्धं समर्पयामि ॥

शुभ्राक्षताश्च संपूर्णाः प्रक्षाल्य च नियोजिताः ।
शोभायै वो मया दत्ता गृह्यन्तां मुनिसत्तमाः ॥

अरुन्धती...भ्यो नमः अक्षतान् समर्पयामि ॥

मालतीचंपकामल्लीकेतक्यादीनि वै द्विजाः ।
समर्पयामि पुष्पाणि पूजार्थं वः पदांभुजे ॥

अरुन्धती···भ्यो नमः पुष्पमालां समर्पयामि ॥

——

॥ अथांगपूजा ॥

तीर्थपादेभ्यो नमः	पादौ पूजयामि
सर्वभूतहितेभ्यो नमः	गुल्फौ ,,
विमलचरित्रेभ्यो नमः	जङ्घे ,,
सर्वलोकहितेभ्यो नमः	ऊरू ,,
अजिनधारिभ्यो नमः	कटिं ,,
जितेन्द्रियेभ्यो नमः	गुह्यान् ,,
योगीश्वरेभ्यो नमः	नाभिं ,,
परार्थैकप्रयोजनेभ्यो नमः	पार्श्वान् ,,
सर्वशास्त्रविशारदेभ्यो नमः	उदरं ,,
परोपकारिभ्यो नमः	हृदयं ,,
रुद्राक्षधारिभ्यो नमः	कण्ठं ,,
सर्वामरवन्दितेभ्यो नमः	नासिकां ,,
श्रुतिपारगेभ्यो नमः	श्रोत्रे ,,
तत्त्वविद्याविशारदेभ्यो नमः	ललाटं ,,
जटामण्डलमण्डितेभ्यो नमः	शिरः ,,

सप्तर्षिभ्यो नमः सर्वाण्यङ्गानि पूजयामि ॥

——

अथ ऋष्यष्टोत्तरशतनामानि ॥

"नमः" इति प्रतिनाम अनुसंधेयम् ॥

ॐ ब्रह्मर्षिभ्यो नमः
वेदविद्भ्यो
तपस्विभ्यो
महात्मभ्यो
मान्येभ्यो
ब्रह्मचर्यरतेभ्यो
सिद्धेभ्यो
कर्मठेभ्यो
योगिभ्यो
अग्निहोत्रपरायणेभ्यो
सत्यव्रतेभ्यो
धर्मात्मभ्यो
नियताशिभ्यो
ब्रह्मण्येभ्यो
ब्रह्मास्त्रविद्भ्यो
ब्रह्मदण्डधरेभ्यो
ब्रह्मशीर्षविद्भ्यो
गायत्रीसिद्धेभ्यो
सावित्रीसिद्धेभ्यो
सरस्वतीसिद्धेभ्यो २०
यजमानेभ्यो
याजकेभ्यो
ऋत्विग्भ्यो
अध्वर्युभ्यो
यज्वभ्यो
यज्ञदीक्षितेभ्यो
पूतेभ्यो
पुरातनेभ्यो
सृष्टिकर्तृभ्यो
स्थितिकर्तृभ्यो ३०
लयकर्तृभ्यो
जपकर्तृभ्यो
होतृभ्यो
प्रस्तोतृभ्यो
प्रतिहर्तृभ्यो
उद्गातृभ्यो
धर्मप्रवर्तकेभ्यो
आचारप्रवर्तकेभ्यो
संप्रदायप्रवर्तकेभ्यो
अनुशासितृभ्यो ४०
वेदवेदान्तपारगेभ्यो
वेदाङ्गप्रचारकेभ्यो
लोकशिक्षकेभ्यो
शापानुग्रहशक्तेभ्यो
स्वतन्त्रशक्तिभ्यो
स्वाधीनचित्तेभ्यो
स्वरूपसुखिभ्यो
प्रवृत्तिधर्मपालकेभ्यो
निवृत्तिधर्मदर्शकेभ्यो
भगवत्प्रसादिभ्यो ५०
देवगुरुभ्यो
लोकगुरुभ्यो
सर्ववन्द्येभ्यो
सर्वपूज्येभ्यो
गृहिभ्यो
सूत्रकृद्भ्यो
भाष्यकृद्भ्यो
महिमसिद्धेभ्यो
ज्ञानसिद्धेभ्यो
निर्दुष्टेभ्यो ६०
शमधनेभ्यो
तपोधनेभ्यो
शापशक्तेभ्यो
मन्त्रमूर्तिभ्यो
अष्टांगयोगिभ्यो
अणिमादिसिद्धेभ्यो
जीवन्मुक्तेभ्यो
शिवपूजारतेभ्यो
व्रतिभ्यो

मुनिमुख्येभ्यो ७०
जितेन्द्रियेभ्यो
शान्तेभ्यो
दान्तेभ्यो
तितिक्षुभ्यो
उपरतेभ्यो
श्रद्धालुभ्यो
विष्णुभक्तेभ्यो
विवेकिभ्यो
विज्ञेभ्यो
ब्रह्मिष्ठेभ्यो ८०
ब्रह्मनिष्ठेभ्यो
भगवद्भ्यो
भस्मधारिभ्यो
रुद्राक्षधारिभ्यो
स्नायिभ्यो
तीर्थेभ्यो
शुद्धेभ्यो
आस्तिकेभ्यो
विप्रेभ्यो
द्विजेभ्यो ९०
ब्राह्मणेभ्यो
उपवीतिभ्यो
मेधाविभ्यो
पवित्रपाणिभ्यो
संस्कृतेभ्यो
सत्कृतेभ्यो
सुकृतिभ्यो
सुमुख्येभ्यो
वल्कलाजिनधारिभ्यो
बृसीनिष्ठेभ्यो १००
जटिलेभ्यो
कमण्डलुधारिभ्यो
सपत्नीकेभ्यो
सांगेभ्यो
वेदवेद्येभ्यो
स्मृतिकर्तृभ्यो
मन्त्रकृद्भ्यो
दीनबन्धुभ्यो
श्रीकश्यपादिसप्तमहर्षिभ्यो नमः
अरुन्धत्यादिसप्तर्षिपत्नीभ्यो नमः

अरुन्धती···भ्यो नमः नानाविधपरिमलपत्रपुष्पाणि समर्पयामि ॥

वनस्पतिरसोद्भूतो गन्धाढ्यस्सुमनोहरः ।
आघ्रेयस्सर्वदेवानां धूपोऽयं प्रतिगृह्यताम् ॥

अरुन्धती···भ्यो नमः धूपमाघ्रापयामि ॥

साज्यं त्रिवर्तिसंयुक्तं वह्निना योजितं मया ।
गृहाण मङ्गलं दीपं त्रैलोक्यतिमिरापहम् ॥

अरुन्धती···भ्यो नमः दीपं दर्शयामि ॥

ओं भूर्भुवस्सुवः...ब्रह्मणे स्वाहा ॥

नानापक्वान्नसंयुक्तं रसैष्षड्भिस्समन्वितम् ।
गृह्णन्तु मुनयस्सर्वे नैवेद्यं वसुदायकाः ॥

अरुन्धती...भ्यो नमः नैवेद्यं निवेदयामि ॥

अमृतापिधानमसि ॥ निवेदनानन्तरमाचमनीयं समर्पयामि ॥

रसालजम्बूद्राक्षेक्षुकपित्थकदलीफलम् ।
खर्जूरपनसादीनि नालिकेरफलानि च ॥

अरुन्धती...भ्यो नमः नानाविधफलानि समर्पयामि ॥

'पूगीफलेति' ताम्बूलं समर्पयामि ॥

नीराजनं मुनिश्रेष्ठाः कोटिसूर्यसमप्रभाः ।
अहं भक्त्या प्रदास्यामि स्वीकुरुध्वमृषीश्वराः ॥

अरुन्धती...भ्यो नमः कर्पूरनीराजनं दर्शयामि ॥

नीराजनानन्तरमाचमनीयं समर्पयामि ॥

यानि कानि च पापानि ब्रह्महत्यासमानि च ।
तानि तानि विनश्यन्ति प्रदक्षिणपदेपदे ॥

अरुन्धती...भ्यो नमः प्रदक्षिणानि समर्पयामि ॥

नमो महर्षिबृन्देभ्यो देवर्षिभ्यो नमो नमः ।
सर्वपापहरेभ्योऽस्तु वेदविद्भ्यो नमो नमः ॥

अरुन्धती...भ्यो नमः नमस्कारान् समर्पयामि ॥

साक्षसूत्राश्च मुनयस्सर्वे वल्कलधारिणः ।
मन्त्रपुष्पं प्रदास्यामि स्वीकुरुध्वं मुनीश्वराः ॥

अरुन्धती···भ्यो नमः मन्त्रपुष्पं समर्पयामि ॥

सुवर्णपुष्पं समर्पयामि ॥

॥ प्रार्थना ॥

एते सप्तर्षयस्सर्वे भक्त्या संपूजिता मया ।
सर्वे पापं व्यपोहन्तु ज्ञानतोऽज्ञानतः कृतम् ॥

इति संप्रार्थ्य ॥ अद्य पूर्वोक्त···शुभतिथौ मया आचरित-ऋषिपञ्चमीव्रतोद्यापनकर्मणि ऋषिपूजान्ते क्षीरार्घ्यप्रदानं उपायन-दानं च करिष्ये ॥ इति संकल्प्य ॥

अर्घ्यश्लोकाः ॥

प्रसन्नहृदयाश्शान्ता जटामण्डलमण्डिताः ।
भक्त्या चार्घ्यं मया दत्तं स्वीकुर्वन्तु मुनीश्वराः ॥

अरुन्धतीसहितकश्यपादिसप्तर्षिभ्यो नमः

इदमर्घ्यम् ॥ एवं त्रिः ॥

जितकामाद्यरिचयाश्शमादिगुणभूषिताः ।
इदमर्घ्यं प्रदास्यामि प्रसन्नास्सन्तु मे सदा ॥ इदमर्घ्यं ॥ त्रिः ॥

ऋषयो ज्ञानसंसिद्धा ब्रह्मिष्ठा ब्रह्मवादिनः ।
इदमर्घ्यं प्रदास्यामि मत्पापशमनाय च ॥ इदमर्घ्यं ॥ त्रिः ॥

ब्रह्मदण्डधराश्शान्ताः कर्मठा वीतकल्मषाः ।
मत्पापपरिहारार्थं इदमर्घ्यं मुनीश्वराः ॥ इदमर्घ्यं ॥ त्रिः ॥

अनेन अर्घ्यप्रदानेन भगवन्तस्सर्वात्मकाः अरुन्धतीसहित-कश्यपादिसप्तर्षयः प्रीयंताम् ॥

उपायनदानम् ॥ ब्राह्मणान् संपूज्य ॥

सपात्रं फलसंयुक्तं सघृतं दक्षिणान्वितम् ॥
उपायनं प्रदास्यामि व्रतसंपूर्तिहेतवे ॥
भवन्तः प्रतिगृह्णन्तु तेजोरूपास्तपोधनाः ।
ऋषयस्तारकास्सन्तूपायनस्य प्रदानतः ॥

इत्युपायनदानं कृत्वा ॥

न्यूनातिरिक्तकर्माणि मया यानि कृतानि च ।
क्षमध्वं तानि सर्वाणि यूयं सर्वे तपोधनाः ॥

इति संप्रार्थ्य ॥

एवं संपूज्य विधिवद्भक्तियुक्तेन चेतसा ।
श्रोतव्यमग्रतस्तेषां शुभं पूर्वकथादिकम् ।

इति ऋषिपूजाविधिः ॥

एवं प्रतियामं पूजां कृत्वा उपायनानि दत्वा कथां च श्रुत्वा ततः परेद्युः नित्यकर्म समाप्य ऋषिपञ्चमीव्रतोद्यापनहोमं करिष्ये इति संकल्प्य स्वगृह्योक्तविधानेनाग्निमुखान्तं कृत्वा सहस्तोमा इति मन्त्रेण पायसान्नसमिदाज्यैरष्टोत्तरशतसंख्यया अष्टाविंशत्या वा जुहुयात् । ततः स्विष्टकृदादिहोमशेषं समापयेत् ॥ ततः पुनःपूजां करिष्य इति संकल्प्य आसनादि षोडशोपचारपूजां कृत्वा, "यज्ञेन यज्ञ" मिति ऋषीनुद्वास्य "तत्वाया" मीति वरुणमुद्वास्य कुम्भजलेन "देवस्य"त्वेति मन्त्रेण त्रिपदगायत्र्या व्याहृतीभिश्च यजमानं परिवारं

चप्रोक्षयेयुः ॥ कुम्भजलेन यजमानमभिषिच्य ततो धौतवस्त्रपुण्ड्रधारणानि कृत्वा तीर्थं प्राश्य संकल्प्य ॥ अद्य पूर्वोक्त···शुभतिथौ मया आचरितऋषिपञ्चमीव्रतोद्यापनकर्मान्ते कलशवस्त्रप्रतिमादानानि करिष्ये ॥ इति संकल्प्य ॥ प्रधानकलशवस्त्रप्रतिमादिद्रव्याणि तत्तदृत्विजे दानमन्त्रेण दत्वा ।

॥ दानमन्त्रः ॥

प्रतिमां वस्त्रसंयुक्तां कुम्भोपकरणैर्युताम् ।
तुभ्यं दास्यामि विप्रेन्द्र यथोक्तफलदो भव ॥

इमां कश्यपप्रतिमां सदक्षिणाकां सतांबूलां कश्यपप्रीतिं कामयमाना तुभ्यमहं संप्रददे ॥ एवं क्रमशः दत्वा ॥ अनन्तरं दशदानषड्दानमनसोद्दिष्टदानानि स्वशक्त्या विस्तरतः कृत्वा अनन्तरं दंपतिपूजनं कृत्वा ब्राह्मणान्भोजयित्वा तांबूलानन्तरं आशिषः प्राप्य तैरनुज्ञातः पुत्रमित्रकलत्राद्यैस्सह स्वयं भुञ्जीत ॥ इति ब्रह्माण्डपुराणोक्तऋषिपञ्चमीव्रतोद्यापनविधिस्संपूर्णः ॥

॥ अथ ऋषिपञ्चमीव्रतकथा ॥

हेमाद्रौ ब्रह्माण्डे—

श्रुतानि देवदेवेश व्रतानि सुबहूनि च ।
सांप्रतं मे समाचक्ष्व व्रतं पापप्रणाशनम् ॥

ब्रह्मोवाच—

शृणु राजन् प्रवक्ष्यामि व्रतानामुत्तमं व्रतम् ।
ऋषिपञ्चमीति विख्यातं सर्वपापहरं परम् ॥

येन चीर्णेन राजेन्द्र नरकं नैव पश्यति ।
अत्रैवोदाहरन्तीममितिहासं पुरातनम् ॥
वैदर्भे च द्विजश्रर उदङ्को नाम नामतः ।
तस्य भार्या सुशीलेति पतिव्रतपरायणा ॥
तस्या अपत्ययुगलं पुत्रो हि सुविभीषणः ।
अधीतवान् सुतस्तस्य वेदान् साङ्गपदक्रमान् ॥
समानेन कुलीनेन सुता चापि विवाहिता ।
नवोढात्वेऽपि सा दैवाद्वैधव्यं प्राप सत्तमा ॥
सतीत्वं पालयन्ती सा आस्ते निजपितुर्गृहे ।
तस्या दुःखेन सन्तप्तस्सुतं संस्थाप्य वेश्मनि ॥
गङ्गातीरवनं प्राप्तः कदाचित्तु तया सह ।
स तत्राध्यापयामास शिष्यान् वेदं द्विजोत्तमः ॥
सुता च कुरुते तस्य पितुश्शुश्रूषणं परम् ।
पितुश्शुश्रूषणं कृत्वा परिश्रान्ता कदाचन ॥
निशीथे किल सुप्तायां क्रिमिराशिरजायत ।
शिष्यास्तथाविधां दृष्ट्वा विवस्त्रां प्रस्तरे स्थिताम् ॥
गत्वा निवेदयामासुस्तन्मातुः करुणां गताः ।
न जानीमो वयं किञ्चिद्देवि साध्वी तथाविधा ।
क्रिमिराशिमयी जाता मातस्संप्रति दृश्यते ॥
वज्रपातसमं श्रुत्वा तच्छिष्यैस्समुदाहृतम् ।
सा श्रान्तमानसा शीघ्रं तत्समीपमुपागमत् ॥
सुतां तथाविधां दृष्ट्वा विललाप सुदुःखिता ।
उरश्च ताडयामास सुतरां मोहमाप च ॥

क्षणेन प्राप्य चैतन्यमुत्थाप्य परिमृज्य च ।
समालिङ्ग्य च बाहुभ्यां निन्ये तत्पितुरन्तिकम् ॥
स्वामिन् कथय मे साध्वी केन दुष्कृतकर्मणा ।
निशीथे च प्रसुप्तेयं जायते क्रिमिसङ्कुला ॥
एवं श्रुत्वा ततो वाक्यमृषिद्धर्यानपरायणः ।
ज्ञात्वा निवेदयामास तस्याः प्राग्जन्मचेष्टितम् ॥

ऋषिरुवाच—

प्रागियं सप्तमेऽतीते जन्मनि ब्राह्मणी ह्यभूत् ।
रजस्वला च संजाता भाण्डादीनस्पृशत्तदा ॥
अस्यास्तु पाप्मना तेन जायते क्रिमिवद्वपुः ।
रजस्वलायाः पापेन युक्ता भवति साऽनघे ॥
प्रथमेऽहनि चण्डाली द्वितीये ब्रह्मघातिनी ।
तृतीये रजकी प्रोक्ता चतुर्थेऽहनि शुद्ध्यति ॥
तदा तया सखीसङ्घाद्व्रतं दृष्ट्वाऽवमानितम् ।
दृष्टव्रतप्रभावेन जाता द्विजकुलेऽमले ॥
अवमानाद्व्रतस्यास्य क्रिमिराशिरिवाधुना ।
एतत्ते कथितं सर्वं कारणं दुष्कृतस्य च ॥

सुशीलोवाच—

दर्शनादपि जन्तोस्स्याद्विप्राणां निर्मले कुले ।
जन्म युष्मद्विधानां हि जायते ब्रह्मतेजसाम् ॥
अवज्ञया प्रजायन्ते निशीथे क्रिमिराशयः ।
महाश्चर्यं कथं नाथ तद्व्रतं कथयस्व मे ॥

उदङ्क उवाच—

सुशीले शृणु तत्सम्यक् व्रतनामुत्तमं व्रतम् ।
येन चीर्णेन सहसा पापादस्मात् प्रमुच्यते ॥
दुःखत्रयाच्च मुच्येत नारी सौभाग्यमाप्नुयात् ।
कल्याणानि विवर्धन्ते संपदश्च निरापदः ॥

युधिष्ठिर उवाच—

श्रुतानि देवदेवेश व्रतानि सुबहूनि च ।
सांप्रतं त्वन्यदाचक्ष्व व्रतं पापप्रणाशनम् ॥

श्रीकृष्ण उवाच—

अथान्यदपि राजेन्द्र पञ्चम्यामृषिपूजनम् ।
कथयिष्यामि यत्कृत्वा नारी पापात् प्रमुच्यते ॥

युधिष्ठिर उवाच—

कीदृशी पञ्चमी कृष्ण कथं तदृषिपूजनम् ॥
पातकान्मुच्यते कस्मान्नारी यदुकुलोद्भव ॥
पापानि च बहून्यत्र विद्यन्ते किल केशव ।
कथं वा ऋषिपञ्चम्यां नारी कस्मात् प्रमुच्यते ॥

श्रीकृष्ण उवाच—

अज्ञानात् ज्ञानतो वापि या स्त्री जाता रजस्वला ।
दुष्टा स्पृशति भाण्डानि गृहकर्मणि संस्थिता ॥
प्राप्नोति सा महापापं सर्वा नार्यो रजस्वलाः ।
शृणु तत् कारणं येन वर्जनीया रजस्वला ॥
प्रोत्सार्या गृहतो दूरं चातुर्वर्ण्येन भारत ।

ब्रह्महत्यां पुरा शक्रो वृत्रं हत्वा ह्यवाप च ॥
तया वै राजशार्दूल पीडितो वृत्रसूदनः ।
ब्रह्माणं समुपागच्छदात्मनश्शुद्धिकारणात् ॥
शुद्ध्यै शक्रस्य राजेन्द्र प्रहृष्टेनान्तरात्मना ॥
विभज्य ब्रह्महत्यां तु चतुर्धा स चतुर्मुखः ।
प्राक्षिपद्राजशार्दूल चतुस्स्थानेषु वै तदा ।
वह्नौ प्रथमजिह्वासु नदीनां प्रथमोदके ॥
गिरिवृक्षादिभूमौ च नारीरजसि पार्थिव ।
ततो रजस्वला नारी प्रोत्सार्या च प्रयत्नतः ॥
ब्रह्मणश्शासनात् पार्थ चातुर्वर्ण्येन सर्वदा ॥
प्रथमेऽहनि चण्डाली द्वितीये ब्रह्मघातिनी ।
तृतीये रजकी प्रोक्ता चतुर्थेऽहनि शुद्ध्यति ॥
अज्ञानात् ज्ञानतो वापि जातं संपर्कपातकम् ।
तत्पापसंक्षयार्थे वै कार्येयमृषिपञ्चमी। ।
सर्वपापप्रशमनी सर्वोपद्रवनाशिनी ।
ब्रह्मक्षत्रियविट्छूद्रस्त्रीभिः कार्या विशेषतः ॥

कृष्ण उवाच—

अत्रार्थे यत्पुरा वृत्तं प्रवक्ष्यामि कथात्मकम् ।
पुरा कृतयुगे राजा विदर्भाणां बभूव ह ॥
श्येनजिन्नाम राजर्षिश्चातुर्वर्ण्यानुपालकः ।
तस्य देशे वसन्विप्रो वेदवेदाङ्गपारगः ॥
सुमित्रो नाम राजेन्द्रः सर्वभूतहिते रतः ।
कृषिवृत्त्या सदा युक्तः कुटुम्बपरिपालकः ॥

तस्य भार्या सुसाध्वी च पतिशुश्रूषणे रता ।
जयश्रीर्नाम विख्याता बहुभृत्यसुहृज्जना ॥

अतिचिन्तान्विता सा च प्रावृट्काले सुमध्यमा ।
क्षेत्रादिषु रता साध्वी चाकुलीकृतमानसा ॥

एकदा साऽऽत्मनः प्राप्तमृतुकालं व्यलोकयत् ।
रजस्वलाऽपि सा राजन् गृहकर्म चकार ह ॥

भाण्डादीन्यस्पृशद्राजन् प्राप्तर्तुरपि भामिनी ।
कालेन बहुना साध्वी पञ्चत्वमगमत्तदा ॥

तस्या भर्ताऽपि विप्रोऽसौ कालधर्ममुपेयिवान् ।
एवं तौ दंपती राजन् स्वकर्मवशगौ तदा ॥

भार्या तस्य जयश्रीस्सा ऋतुसंपर्कदोषतः ।
शुनीयोनिसमुत्पन्ना शुनी चाभून्नरेश्वर ॥

तस्यास्संपर्कदोषेण बलीवर्दो बभूव सः ।
एवं तौ दंपती राजन् स्वकर्मवशगौ तदा ॥

ऋतुसंपर्कदोषेण तिर्यग्योनिमुपागतौ ।
स्वधर्माचरणाज्जातावुभौ जातिस्मरौ तदा ॥

सुतस्यैव गृहे राजन् स्मरन्तौ पूर्वपातकम् ।
सुमित्रस्य च पुत्रोऽभूद्गुरुशुश्रूषणे रतः ॥

सुमतिर्नाम धर्मज्ञो देवतातिथिपूजकः ।
कथं क्षयाहे संप्राप्ते पितुस्तु सुमतिस्तदा ।
भार्यां चन्द्रवतीं प्राप्य पैतृकश्रद्धयाऽन्वितः ॥

अद्य सांवत्सरदिनं पितुर्मे चारुहासिनि ।
भोजनीया द्विजा भीरु पाकशुद्धिर्विधीयताम् ॥

तया कृता पाकशुद्धिस्सुमतेश्शासनाद्गृहे ।
मुक्तं पायसभाण्डे वै सर्पेण गरलं ततः ॥

दृष्ट्वा ब्रह्मवधाद्भीता शुनी भाण्डानि साऽस्पृशत् ।
द्विजभार्या च तां दृष्ट्वा उल्मुकेन जघान ह ॥

भाण्डादीनि च प्रक्षाल्य त्यक्त्वा पाकं सुमध्यमा ।
पुनः पाकं च कृत्वा तु श्राद्धं कृत्वा विधानतः ॥

ततो भुक्तेषु विप्रेषु नोच्छिष्टं च ददौ बहिः ।
भूमौ क्षिप्तं तया शुन्या उपवासस्ततोऽभवत् ॥

ततो रात्र्यां प्रवृत्तायां सा शुनी क्षुधिता भृशम् ।
बलीवर्दमुपागत्य भर्तारमिदमब्रवीत् ॥

बुभुक्षिता गृहे भर्तर्न दत्तं भोजनादिकम् ।
ग्रासादिकं च न प्राप्तं क्षुधा मां बाधते भृशम् ॥

अन्यस्मिन् दिवसे पुत्रो मम लेह्यं ददात्यसौ ।
अद्य मह्यं किमप्येष उच्छिष्टमपि नो ददौ ॥

पायसान्ने पपाताद्य गरलं सर्पसंभवम् ।
मया विचिन्त्य मनसा मरिष्यन्ति द्विजोत्तमाः ॥

संस्पृष्टं पायसं गत्वा तत्राहं ताडिता भृशम् ।
दुःखितं तेन मे गात्रं कटिर्भग्ना करोमि किम् ॥

ततः प्राह स चानड्वान् भद्रे ते पापजं फलम् ।
किं करोमि ह्यशक्तोऽहं भारवाहोऽद्य सुस्थितः ॥

अद्याहमात्मजक्षेत्रे वाहितस्सकलं दिनम् ।
मारितश्चात्मजेनाहं मुखं बद्ध्वा बुभुक्षितः ॥
वृथा श्राद्धं कृतं तेन जाताऽद्य मम कष्टता ॥

श्रीकृष्ण उवाच—

तयोस्संवदतोरेव मातापित्रोश्च भारत ।
श्रुत्वा पुत्रस्तदा वाक्यं यदुक्तं च तदोभयोः ॥
ततो रजन्यां तत्कालं ददौ तस्यैव भोजनम् ।
पितरौ तौ विदित्वा तु दत्तवान् सुमतिस्तदा ॥
ततोऽसौ दुःखितः पुत्रो ज्ञात्वाऽवस्थां तदा तयोः ।
मातापित्रोस्तु राजेन्द्र दुःखात्मा प्रस्थितो वनम् ॥
ज्ञातुमिच्छामि कष्टं वै मातापित्रोश्च भारत ॥
तत्र गत्वा ज्ञानवृद्धानृषीन् सप्त वनाश्रितान् ।
प्रणिपत्याब्रवीद्वाक्यं हितं चैव तदा तयोः ॥

सुमतिरुवाच—

कथयध्वं विप्रवर्याः प्रश्नमेकं समाहिताः ।
केन कर्मविपाकेन पितरौ मे तपोधनाः ॥
इमामवस्थां संप्राप्तौ मुच्येते पातकात्कथम् ॥

श्रीकृष्ण उवाच—

तदाकर्ण्य वचस्तस्य सुमतेर्दुःखितस्य च ।
ऋषिस्सर्वतपा नाम सर्वज्ञः करुणान्वितः ॥
सुमतिं प्रत्युवाचेदं तत्पित्रोर्मुक्तये तदा ॥

ऋषिरुवाच—

तव माता पुरा विप्र स्वगृहे बालभावतः ।
ऋतुं प्राप्तं विदित्वा तु संपर्कमकरोद्द्विज ॥
तेन कर्मविपाकेन शुनीयोनिमुपागता ।
पिताऽपि स्पर्शदोषेण बलीवर्दो बभूव ह ॥

एतयोर्मुक्तिकामार्थं कुरु त्वमृषिपञ्चमीम् ।
भार्यया सह विप्रेन्द्र ऋषीन् संपूज्य यत्नतः ।

आचरस्व व्रतं तत्र सप्तवर्षं द्विजोत्तम ।
अन्ते चोद्यापनं कुर्याद्वित्तशाठ्यविवर्जितः ॥

शाकाहारस्तु कर्तव्यो नीवारैश्श्यामकैस्तदा ।
कन्दं वाऽथ फलं मूलं हलकृष्टं न भक्षयेत् ॥

प्राप्य भाद्रपदे मासि शुक्लपक्षस्य पञ्चमीम् ।
तस्यां मध्याह्नसमये नद्यादौ विमले जले ।
कृत्वाऽपामार्गसमिधा दन्तधावनमादितः ॥

"आयुर्बलं यशो वर्चः प्रजाः पशुवसूनि च ।
ब्रह्म प्रज्ञां च मेधाञ्च त्वन्नो देहि वनस्पते ॥"
संप्रार्थ्यानेन मन्त्रेण कुर्याद्वै दन्तधावनम् ॥

मुखदुर्गन्धनाशाय दन्तानां च विशुद्धये ।
ष्ठीवनाय च गात्राणां कुर्वेऽहं दन्तधावनम् ॥
अनेन दन्तान् संशोध्य स्नायान्मृत्स्नानपूर्वकम् ।
तिलामलककल्केन केशान् संशोध्य यत्नतः ॥

परिधाय नवं शुद्धं वासोयुग्मं समाहितः ।
विधाय नित्यकर्माणि गत्वा द्वारवतीमृषीन् ॥

स्थापयेद्विधिवद्भक्त्या पञ्चामृतरसैश्शुभैः ।
चन्दनागरुकर्पूरैर्विलिप्य च सुगन्धिभिः ॥

पूजयेद्विविधैः पुष्पैर्गन्धधूपादिदीपकैः ।
समाच्छाद्य शुभैर्वस्त्रैस्सोपवीतैर्यथाविधि ॥

ततो नैवेद्यसंपन्नैरर्घ्यं दद्याच्छुभैः फलैः ।

पूजयस्व ऋषीन् दिव्यानरुन्धत्या समन्वितान् ॥
कश्यपोऽत्रिर्भरद्वाजो विश्वामित्रोऽथ गौतमः ।
जमदग्निर्वसिष्ठश्च साध्वी चैवाप्यरुन्धती ॥
मन्त्रेणानेन सप्तर्षीन् पूजयेत्सुसमाहितः ॥
व्रतेन ऋषिपञ्चम्याः कृतेनैव द्विजोत्तम ।
ऋतुसंपर्कजो दोषः क्षयं याति न संशयः ॥

श्रीकृष्ण उवाच—

तच्छ्रुत्वा सुमतिर्वाक्यं परमं मुनिभाषितम् ।
गृहमेत्य व्रतं चक्रे सभार्यः श्रद्धयाऽन्वितः ॥
व्रतं तु ऋषिपञ्चम्यास्सर्वपापप्रणाशनम् ।
कृत्वा सर्वं यथोक्तं च मातापित्रोः फलं ददौ ॥
व्रतपुण्यप्रभावेन माता तस्य श्वयोनितः ।
मुक्ता नृपतिशार्दूल विमानवरमास्थिता ॥
दिव्याम्बरधरा भूत्वा गता स्वर्गं च भारत ।
पिताऽपि स मृतोऽगच्छत् सुमतेः पशुयोनितः ॥
स्वर्गं प्राप्तो महाराज व्रतस्यास्य प्रभावतः ।
दिव्याम्बरधरो भूत्वा गतस्स्वर्गं स भारत ॥
कायिकं वाचिकं वापि मानसं यच्च दुष्कृतम् ।
तत्सर्वं विलयं याति व्रतस्यास्य प्रभावतः ॥
तस्य यज्जायते पुण्यं तच्छृणुष्व नृपोत्तम ॥
सर्वव्रतेषु यत्पुण्यं सर्वतीर्थेषु यत्फलम् ।
सर्वदानेषु दत्तेषु तदेतद्व्रतचारणात् ॥
कुरुते या व्रतं नारी सा भवेत्सुखभागिनी ।

रूपलावण्ययुक्ता च पुत्रपौत्राभिसंयुता ॥
इह लोके सुखं यायात् परत्र च परां गतिम् ।
एतत्ते कथितं राजन् व्रतानामुत्तमं व्रतम् ।
सर्वसंपत्प्रदं चैव नारीणां पापनाशनम् ॥
धनं यशश्च स्वर्गं च पुत्रानपि युधिष्ठिर ।
पठतां शृण्वतां चापि दद्यात्पापप्रणाशनम् ॥

इति श्रीभविष्योत्तरपुराणे ऋषिपंचमीव्रतकथा समाप्ता ॥

॥ श्रीरस्तु ॥

॥ अथ शुक्लषष्ठीव्रतम् ॥

पुत्रार्थी कारयेद्धीमान् वन्ध्यात्रयनिवृत्तये ।
कारयित्वा सुवर्णेन नागदेवं यथाविधि ॥

प्रतिष्ठावाहनाद्यैश्च कारयेद्ब्राह्मणेन तु ।
पुत्रार्थी पूजयेन्नित्यं स्वयं वा ब्राह्मणेन वा ।

एवं संपूज्य विधिना वर्षं वर्षार्धमेव वा ॥
पुत्रार्थी पुत्रलाभं च धनार्थी लभते धनम् ।

कन्यार्थी लभते कन्यां जयार्थी लभंते जयम् ॥
इति कर्मविपाकसमुच्चये वन्ध्यात्रयहरशुक्लषष्ठीव्रतविधिः ॥

अथ पूजाप्रकारः ॥

अथ व्रती मध्याह्ने नद्यादिषु स्नात्वा गृहं गत्वा शुभ्रवस्त्रं परिधाय यथोक्तपुंड्रं धृत्वा ब्राह्मणान्नमस्कृत्य दक्षिणां तांबूलञ्च गृहीत्वा अशेषे···स्वीकृत्य मम जन्माभ्यासात्···पापक्षयार्थं मम इह जन्मनि जन्मान्तरे च ज्ञानाज्ञानकृतैस्संभावितानां संतानप्रतिबन्धकीभूतानां गुरुद्वेषण बालघातन बालताडन बालतर्जन गोवत्सवियोजन परहृत्क्लेशकरण प्राण्यण्डभेदन अन्यसुतविद्वेषण मृगशावहनन गर्भध्वंसादिभिस्संभावितानां चतुर्विधवन्ध्यात्वहेतुभूतानां सर्वेषां पा-

पानां सद्यः अपनोदनद्वारा अचिरादेव जीवत्सुपुत्रावाप्त्यर्थं नागराजप्रसादसिद्ध्यर्थं शुक्लषष्ठीव्रतारंभकर्म कर्तुं योग्यतासिद्धिमनुगृहाण। (योग्यतासिद्धिरस्तु) विघ्नेश्वरपूजां कृत्वा, सङ्कल्पः। शुभे शोभने... शुक्लषष्ठीव्रतारम्भकर्म करिष्ये इति सङ्कल्प्य। विघ्नेश्वरमुद्वास्य॥ ग्रहप्रीतिं कृत्वा, अद्य पूर्वोक्त...प्रीत्यर्थं शुक्लषष्ठीपुण्यकाले नागराजपूजां करिष्ये। तदङ्गं कलशपूजां च करिष्ये इति सङ्कल्प्य। कलशपूजां कृत्वा। पूजोपकरणानि प्रोक्ष्य। आत्मानञ्च प्रोक्ष्य।

अथ ध्यानम्॥

एहि सर्प महाभाग बिंबेऽस्मिन् सन्निधिं कुरु।
पूजार्थं त्वां महाभक्त्या प्रार्थयामि समाहितः॥
आवाहयामि सर्पेशं द्विभुजं पीतवाससम्।
फणापञ्चकसंयुक्तं सर्वाभरणभूषितम्॥

आवाहनम्॥

नमोऽस्तु कालरूपाय सर्परूप नमोऽस्तु ते।
सर्वपापहर स्वामिन्नासनं प्रतिगृह्यताम्॥

आसनं समर्पयामि॥

नागाय नागरूपाय सर्परूपाय ते नमः।
पुत्रप्रद गृहाणेदं इदमर्घ्यं नमोऽस्तु ते॥

अर्घ्यं समर्पयामि॥

नमोऽस्तु सर्पराजाय पुत्रप्रद नमोऽस्तु ते।
सर्वपापहरं देव पाद्यं संप्रतिगृह्यताम्॥

पाद्यं समर्पयामि॥

कर्कोटक महानाग कालकूटविषप्रभो ।
काद्रवेय गृहाणेदं शुभं त्वाचमनीयकम् ॥
आचमनीयं समर्पयामि ॥

अनन्तशेषसर्पाणां नाथस्त्वं परमो मतः ।
स्नानं पञ्चामृतं दिव्यं गृहाण पवनाशन ॥
पञ्चामृतस्नानं समर्पयामि ॥

गङ्गादिसर्वतीर्थेभ्यस्समाहृतमिदं जलम् ।
स्नानार्थं गृह्यतां देव शेषाशेषजगत्पते ॥
स्नानम् ॥ स्नानानन्तरमाचमनीयं समर्पयामि ॥

सहस्रशिरसे तुभ्यमादिशेषाय ते नमः ।
वस्त्रं गृहाण नागानामधिपाय नमो नमः ॥
वस्त्रं समर्पयामि ॥

धौतयज्ञोपवीताय तक्षकाय महात्मने ।
उपवीतं प्रदास्यामि स्वीकुरुष्व प्रसीद मे ॥
उपवीतं समर्पयामि ॥

महापद्म महानाग शङ्खपाल महीधर ।
गन्धं तु कुङ्कुमोपेतं गृहाण त्वञ्च वासुके ।
गन्धान् धारयामि ॥

अक्षतान् धवलान् दिव्यान् शालीयांस्तिलसंश्रितान् ।
भक्त्या दत्तं महादेव गृहाण पुरुषोत्तम ॥
अक्षतान् समर्पयामि ॥

कपिलाय नमस्तुभ्यं मणिभूषाय ते नमः ।
पुष्पाणीह सुगन्धीनि पूजार्थं प्रतिगृह्यताम् ॥
पुष्पाणि समर्पयामि ॥

॥ अथांगपूजा ॥

अनन्ताय नमः पादौ पूजयामि	विषधराय नमः कण्ठं पूजयामि
नागेशाय नमः गुल्फौ ,,	फणावक्राय नमः वक्रं ,,
वासुकिने नमः जङ्घे ,,	चक्षुश्श्रवसे नमः श्रोत्रे ,,
काद्रवेयाय नमः ऊरू ,,	दशनेत्राय नमः नेत्राणि ,,
शेषाय नमः कटिं ,,	सुललाटाय नमः ललाटं ,,
अनन्ताय नमः नाभिं ,,	सहस्रशिरसे नमः शिरः ,,
सर्पराजाय नमः हृदयं ,,	

शिवाभरणाय नमः सर्वाण्यङ्गानि पूजयामि ॥

वनस्पतिरसोद्भूतं कालागरुसमन्वितम् ।
धूपं गृहाण नागेश प्रीत्यर्थं च मयार्पितम् ॥
धूपमाघ्रापयामि ॥ साज्यन्त्रिवर्तीति दीपः ॥

नानाभक्ष्यैश्च भोज्यैश्च रसैष्षड्भिस्समन्वितम् ।
नैवेद्यममृतप्रख्यं गृहाण सुरपूजित ॥
नैवेद्यं निवेदयामि ॥

'पूगीफलेति' ताम्बूलं समर्पयामि ॥

नीराजनं महादेव निर्मलं स्वप्रकाशकम् ।
महाभक्त्या प्रदास्यामि नमस्ते शिवभूषण ॥
नीराजनं ॥ प्रदक्षिणम् ॥

प्रकृष्टपापनाशाय प्रकृष्टफलसिद्धये ।
प्रदक्षिणं करोमीश प्रसीद शिवभूषण ॥

नमस्कारान् ॥

नमस्करोमि देवेश नागेन्द्र हरभूषण ।
अभीष्टदायिने तुभ्यं नागराज नमोऽस्तु ते ॥

॥ प्रार्थना ॥

नागाय नागरूपाय सर्वरूपाय ते नमः ॥
देहि मे पुत्रसौभाग्यं मम वंशाभिवृद्धये ॥

अर्घ्यश्लोकः ॥

नागराज नमस्तुभ्यं पुत्रप्रद नमोऽस्तु ते ।
अर्घ्यं गृहाण भगवन् चिन्तिताभीष्टसिद्धये ॥

नागराजाय नमः ॥ इदमर्घ्यं ॥ त्रिः ॥

उपायनदानम् ॥

सर्पेशः प्रतिगृह्णातु सर्पेशो वै ददाति च ।
सर्पेशस्तारको द्वाभ्यां सर्पेशाय नमो नमः ॥ इति ॥

क्षीरप्राशनमन्त्रः ॥

शङ्खमध्यस्थितं क्षीरं निवेदितमिदन्तु ते ।
पिबामि कृपया देहि पुत्रभाग्यं फणीश्वर ॥

इति प्रार्थयेत् ॥

शुक्लषष्ठीव्रतं समाप्तम् ॥

अथ नागराजाष्टोत्तरशतनामावलिः ॥

“नमः” इति प्रतिनाम अनुसंधेयम्.

ॐ अनंताय नमः
वासुदेवाय
तक्षकाय
कर्कोटकाय
पद्माय
महापद्माय
शङ्खाय
गुलिकाय
आदिदेवाय
धृतराष्ट्राय १०
शङ्खपालाय
शिवप्रियाय
नागराजेन्द्राय
पुराणपुरुषाय
सर्वैश्वर्यप्रदाय
सुरनायकाय
प्रकृष्टफलसिद्धये
दोषवर्जिताय
शिवभूषणाय
अभीष्टफलदाय २०
पापहराय
विश्वतोमुखाय
दुःखप्रियाय
ॐ राजराजाय नमः
दिग्वासिने नमः
चक्षुश्श्रवसे
जिह्मगाय
गणप्रियाय
गणाधिपाय
महासेनभक्ताय ३०
पुण्यमूर्तये
सर्पाणामधीश्वराय
पवनाशाय
यज्ञमूर्तये
यज्ञानां फलप्रदात्रे
सर्वापद्भञ्जनाय
उरगाय
विश्वरूपाय
महाराजाय
पुरुषोत्तमाय ४०
प्रभवे नमः
सहस्रफणाय
पद्मनाभाय
सुरार्चिताय
पन्नगाधीश्वराय
अनन्तैश्वर्यरूपिणे
ॐ सुरश्रेष्ठाय नमः
सर्पराजाय
ईश्वराय
नारायणाय ५०
मधुसूदनाय
शुचिहासाय
कोटिसूर्यप्रदीपकाय
बिलद्वारवासिने नमः
त्रिकालज्ञाय
अचिन्त्यशक्तये
अनघाय
अच्युताय
अमितविक्रमाय
अनन्ताय ६०
अन्नदाय
अन्नप्रियदेवाय
सच्चिदानन्दविग्रहाय
दक्षाय
वटरूपिणे
स्वर्गदात्रे
त्रिविष्टपाय
दामोदराय
लोकहिताय

असते नमः　७०	योगीन्द्राय	अनन्तश्रिये
स्कन्दप्रियाय	इन्द्राय	अक्षराय
पुत्रदायिने नमः	वैवस्वताय	अमेयाय
ऋणमोचिने नमः	पुराणाय	अवनीधराय
पूर्णाकृतये	धनदाय	अवनीपतये　१००
भीतिदाय	वैश्वानराय	अनादये
भुवनेश्वराय	कर्बुराय	अमृताय
भूतिभूषणाय	सदागतये　९०	अपरिमितमाहात्म्याय
भूम्ने नमः	पशुपतये	अरण्यवासिने नमः
योगाय	परमेष्ठिने नमः	अतिसुन्दराय
योगदाय　८०	विष्टरश्रवसे	अनन्तरूपिणे
योगगम्याय	गुरवे नमः	अपवर्गप्रदाय
योगरताय	गृहरूपिणे	सर्पराजाय　१०८

नानाविधपत्रपुष्पाणि समर्पयामि ॥

॥ श्रीरस्तु ॥

॥ अथ अमासोमवारव्रतम् ॥

अमावास्या यदा पार्थ सोमवारान्विता भवेत् ।
तदा पुण्यतमः कालो देवनामपि दुर्लभः ॥ इति ॥

आदावनुज्ञां कृत्वा । अशेषे...स्वीकृत्य । मम जन्माभ्यासादित्यादि...मम इह जन्मनि जन्मान्तरे वा अवैधव्यसंततिचिरंजीविकासंपत्सौभाग्यसिद्ध्यर्थं पुत्रपौत्राभिवृद्ध्यर्थं अश्वत्थमूले ब्रह्मविष्णुशिवस्वरूपाश्वत्थनारायणमुद्दिश्य तत्प्रीत्यर्थं अमासोमवारव्रतारंभं कर्तुं योग्यतासिद्धिमनुगृहाण । विघ्नेश्वरपूजां कृत्वा । अमासोमवारव्रतारंभं करिष्ये। इति संकल्प्य ॥ विघ्नेश्वरमुद्वास्य । ग्रहप्रीतिं कृत्वा ॥ पुनस्संकल्पः । अमासोमवारपुण्यकाले अश्वत्थनारायणपूजां करिष्ये इति संकल्प्य । कलशपूजां कृत्वा । सर्वोपकरणानि प्रोक्ष्य । वैदिकमन्त्रैःकल्पोक्तप्रकारेण वा अश्वत्थमूले ब्रह्मविष्णुशिवस्वरूपं अश्वत्थनारायणं संपूज्य । अनन्तरं फलैः पुष्पैः भक्ष्यैः वस्त्राद्यैर्वा अष्टोत्तरशतसंख्याकानि अश्वत्थप्रदक्षिणानि करिष्ये इति सङ्कल्प्य। मूलतो ब्रह्म...नमः इत्यष्टोत्तरशतप्रदक्षिणानि कृत्वा अनन्तरमश्वत्थनारायणं पुनः पूजयित्वा आचार्याय उपायनदानं कुर्यात् ॥ एवं प्रतिसोमवत्यमावास्यायां कार्यम् ॥ इत्यारंभविधिः ॥

अथ अमासोमवारव्रतोद्यापनविधिः ॥

अथ सोमवत्यमायां व्रती प्रातरुत्थाय पुण्यतीर्थे स्नात्वा नित्यनैमित्तिकानि परिसमाप्य अश्वत्थसमीपं गत्वा ब्रह्मविष्णुरुद्रात्मकं

अश्वत्थनारायणं संपूज्य प्रदक्षिणादिकं कृत्वा उद्यापनार्थमनुज्ञां कुर्यात् ।। अशेषे...स्वीकृत्य मम जन्माभ्या...द्वारा मया आचरितस्य अमासोमवारव्रतस्य उद्यापनकर्मणः कल्पोक्तसाङ्गफलसिद्ध्यर्थं अश्वत्थनारायणप्रसादसिद्ध्यर्थं एभिर्ब्राह्मणैस्सह कल्पोक्तप्रकारेण आचार्यमुखेन ऋत्विङ्मुखेन च अमासोमवारव्रतोद्यापनकर्म कर्तुं योग्यतासिद्धिमनुगृहाण। विघ्नेश्वरपूजां कृत्वा। अनुज्ञावत्सङ्कल्पः।।अमासोमवारव्रतोद्यापनकर्म करिष्ये। विघ्नेश्वरमुद्वास्य, अभ्युदयं, ग्रहप्रीतिं च कृत्वा। अथ आचार्यादिवरणम्।। अस्मिन् अमासोमवारव्रतोद्यापनकर्मणि सकलकर्म कर्तुं, अश्वत्थनारायणप्रतिमापूजार्थं च ऋत्विजं त्वां वृणे ।। एवं ब्रह्मा। विष्णुः। रुद्रः। नागराजः। इति प्रागादि क्रमशः ऋत्विजो वृणुयात्। अथ षोडशस्तम्भनिर्मितमण्टपे स्थण्डिलं कल्पयित्वा मध्ये अश्वत्थनारायणकुम्भं प्रतिष्ठाप्य परितः चतुरः कुम्भान्प्रतिष्ठाप्य तदुपरि वृक्षरूपप्रतिमां निधाय मण्टपशुद्ध्यर्थं पुण्याहं कृत्वा सर्वोपकरणानि प्रोक्ष्य। अथाचार्यः ऋत्विग्भिस्सह तत्तत्प्रतिमापूजां करिष्य इति सङ्कल्प्य। कलशपूजां कृत्वा। पूजोपकरणानि प्रोक्षयेत्।।

अथ ध्यानम् ।।

"अतो देवा अवन्तु नो यतो विष्णुर्विचक्रमे, पृथिव्यास्सप्तधामभिः ।।"

इति मन्त्रेण अश्वत्थमूले विष्णुं ध्यात्वा स्पृष्ट्वा पूजयेत् ।।

"अश्वत्थे वो निषदनं पर्णे वो वसतिः कृता । गोभाय इत्किलासथ यत्सनवधपूरुषम्." इति मन्त्रेण,

"मूलतो ब्रह्मरूपाय मध्यतो विष्णुरूपिणे, अग्रतः शिवरूपाय वृक्षराजाय ते नमः"

इति पुराणमन्त्रेण अश्वत्थस्य षोडशोपचारान् कुर्यात् ॥

सर्वव्यापक विश्वेश कृपया दीनवत्सल ।
मयोपपादितां पूजां गृहाणेमां जगत्पते ॥
मूलानि ब्राह्मणा यस्य ऋग्वेदोऽङ्गानि पल्लवाः ।
फलानि यज्ञाश्शाखाश्च नारायण दयां कुरु ॥

सहस्रशीर्षेत्यावाहनम् ॥ प्राणप्रतिष्ठां कुर्यात् ॥

सूर्यकोटिप्रतीकाश सर्वव्यापिन् जगत्पते ।
आसनं कल्पितं शक्त्या गृहाण परमेश्वर ॥

अश्वत्थ···स्वामिने नमः आसनं समर्पयामि ॥

महादेव जगद्व्यापिन् जगदानन्दकारक ।
विष्णुक्रान्तादिसंयुक्तं तव पाद्यं मयार्पितम् ॥

अश्वत्थ···स्वामिने नमः पाद्यं समर्पयामि ॥

फलगन्धाक्षतैर्युक्तं पुष्पदर्भाग्रसम्मितम् ।
अर्घ्यं गृहाण भगवन् विष्णो सर्वफलप्रद ॥

अश्वत्थ···स्वामिने नमः अर्घ्यं समर्पयामि ॥

कर्पूरैलादिसुरभि शीतलं सलिलं प्रभो ।
उमारमण देवेदमाचम्यं प्रतिगृह्यताम् ॥

अश्वत्थ···स्वामिने नमः आचमनीयं समर्पयामि ॥

पञ्चामृतं मया नीतं पयो दधि घृतं मधु ।
शर्करागुडसंयुक्तं स्नानार्थं प्रतिगृह्यताम् ॥

अश्वत्थ···स्वामिने नमः पञ्चामृतस्नानं समर्पयामि ॥

गङ्गा कृष्णा गौतमी च कावेरी च पिनाकिनी ।
सलिलं ताभ्य आनीतं स्नानार्थं प्रतिगृह्यताम् ॥

अश्वत्थ...स्वामिने नमः स्नानं समर्पयामि ॥

पीतवासस्तव विभो व्याघ्राजिन मयाऽऽहृतम् ।
वासः प्रीत्या गृहाणेदं पुरुषोत्तम शङ्कर ॥

अश्वत्थ...स्वामिने नमः वस्त्रं समर्पयामि ॥

उपवीतं सोत्तरीयं मया दत्तं सुशोभनम् ।
विश्वमूर्ते गृहाणेदं नारायण शिव प्रभो ॥

अश्वत्थ...स्वामिने नमः यज्ञोपवीतम् ॥

अश्वत्थ हुतभुग्वास गोविन्दस्य सदाप्रिय ।
अशेषं हर मे पापं वृक्षराज नमोऽस्तु ते ॥

अश्वत्थ...स्वामिने नमः अलङ्कारम् ॥

मलयाचलसंभूतं घनसारं मनोहरम् ।
विलेपनं सुरश्रेष्ठ चन्दनं प्रतिगृह्यताम् ॥

अश्वत्थ...स्वामिने नमः गन्धान् समर्पयामि ॥

अक्षताश्च सुरश्रेष्ठ कुङ्कुमाक्तास्सुशोभनाः ।
मया निवेदिताः भक्त्या त्वदर्थं परमेश्वर ॥

अश्वत्थ...स्वामिने नमः अक्षतान् समर्पयामि ॥

तुलसीजातिकमलमल्लिकाचंपकानि च ।
बिल्वानि हर गोविन्द गृहाण परमेश्वर ॥

अश्वत्थ...स्वामिने नमः पुष्पाणि समर्पयामि ॥

ॐ परमात्मने नमः	छन्दःपर्णाय नमः
परमेश्वराय नमः	अव्ययाय नमः
परब्रह्मणे नमः	पापघ्नाय नमः
नारायणाय नमः	ज्ञानवृक्षाय नमः
विरिञ्चये नमः	भूतावासाय नमः
शिवाय नमः	पुण्याय नमः
रुद्राय नमः	शिवङ्कराय नमः
विभूतये नमः	महामूलाय नमः
वनस्पतये नमः	ऋषिसेविताय नमः
वृक्षराजाय नमः	तपःफलाय नमः
वेदात्मने नमः	अग्निगर्भाय नमः
प्रकृतये नमः	अरणये नमः
देवात्मने नमः	समिदाकराय नमः
त्रिमूर्त्यात्मने नमः	सूर्याश्वजाय नमः
ऊर्ध्वमूलाय नमः	शमीपतये नमः
अवाक्छाखाय नमः	अश्वत्थाय नमः

अश्वत्थ...स्वामिने नमः नानाविध...मि ॥

एतैर्नामभिः केशवादिनामभिश्च पूजां कुर्यात् ॥

वनस्पतिरसोद्भूतो गन्धाढ्योऽतिमनोहरः ।
आघ्रेयस्सर्वदेवानां धूपोऽयं प्रतिगृह्यताम् ॥

अश्वत्थ...स्वामिने नमः धूपं आघ्रापयामि ॥

चक्षुर्दं सर्वलोकानां तिमिरस्य निवारणम् ।

आर्तिक्यं कल्पितं भक्त्या गृहाण जगदीश्वर ॥
अश्वत्थ...स्वामिने नमः दीपं दर्शयामि ॥
भक्ष्यं भोज्यं लेह्यपेये चोष्यं खाद्यं मयाऽऽहृतम् ।
प्रीतये परमेशस्य दत्तं मे स्वीकुरु प्रभो ॥
अश्वत्थ...स्वामिने नमः नैवेद्यं निवेदयामि ॥
निवेदनानन्तरमाचमनीयम् ॥
पूगीफलेति तांबूलम् ॥
त्वद्भासा भासते लोकः कोटिसूर्यसमप्रभ ।
नीराजयिष्ये त्वां विष्णो कृपां कुरु मयीश्वर ॥
नीराजनम् ॥ नीराजनानन्तरमाचमनीयं समर्पयामि ॥
यानि कानि चेति प्रदक्षिणम् ॥
कायेन मनसा वाचा मम जन्मशतार्जितम् ।
पापं प्रशमय स्वामिन् प्रदक्षिणपदेपदे ॥
अश्वत्थ...स्वामिने नमः प्रदक्षिणानि ॥
व्यक्ताव्यक्तस्वरूपाय सृष्टिस्थित्यन्तकारिणे ।
आदिमध्यान्तशून्याय विष्टरश्रवसे नमः ॥
अश्वत्थ...स्वामिने नमः नमस्कारान् ॥
मूलतो ब्रह्मरूपाय मध्यतो विष्णुरूपिणे ।
अग्रतश्शिवरूपाय वृक्षराजाय ते नमः ॥
अश्वत्थ...स्वामिने नमः मन्त्रपुष्पम् ॥ सुवर्णपुष्पं समर्पयामि ॥
त्रिमूर्तिरूपिन् विश्वेश वृक्षरूप नमोऽस्तु ते ।
मत्कृतं दुरितं शोध्वा ज्ञानं मे देहि शाश्वतम् ॥

अद्य पूर्वोक्त···तिथौ मया आचरितामासोमवारव्रतोद्यापनान्ते क्षीरार्घ्यप्रदानमुपायनदानञ्च करिष्ये । अक्षतपुष्पाणि गृहीत्वा ।

लक्ष्मीश सर्वलोकेश सर्वसंपत्प्रदो भव ।
गृहाणार्घ्यं मया दत्तं कृपया परया मुदा ॥

अश्वत्थनारायणस्वामिने नमः इदमर्घ्यं ॥ एवं त्रिः ।
अनेनार्घ्यप्रदानेन अश्वत्थनारायणस्वामी प्रीयताम् ॥

अथ उपायनम् ॥

अमासोमव्रतस्यास्य संपूर्णफलहेतवे ।
वायनं द्विजवर्याय सहिरण्यं ददाम्यहम् ॥
यन्मया मनसा वाचा नियमात्पूजनं कृतम् ।
सर्वं संपूर्णतां यातु तद्विप्राणां प्रसादतः ॥

प्रार्थना ॥

अनन्तरं कुम्भस्येशानदिग्भागे स्वगृह्योक्तविधानेन मुखान्तं कृत्वा सघृतपायसान्नाज्यैः इदं विष्णुरिति मन्त्रेण अष्टोत्तरशतं हुत्वा स्विष्टकृदादिहोमशेषं समापयेत्। पुनःपूजां कृत्वा, कुम्भानुद्वास्य यजमानं सपरिवारं देवस्य त्वेति मन्त्रेण द्विपदगायत्र्या च प्रोक्ष्याभिषिच्य॥ कर्ता धौतवस्त्रपुण्ड्रधारणानि कृत्वा। सङ्कल्पः ॥ मया आचरिते अमासोमवारव्रतोद्यापनकर्मान्ते अपूपदानं करिष्ये । महाविष्णुस्वरूपिणं ब्राह्मणं संपूज्य अपूपसहितं कांस्यपात्रं दद्यात् । पुनस्संकल्पः—मया आचरिते अमासोमवारव्रतोद्यापनकर्मणि कलशवस्त्रप्रतिमादानानि करिष्य इति सङ्कल्प्य । प्रतिमादानानि कृत्वा । दशदानषड्दानमन-

सोद्दिष्टदानानि च दत्वा आशिषः प्राप्य ब्राह्मणान्भोजयित्वा तैरनुज्ञातः बन्धुभिस्सह स्वयमपि भुञ्जीत ॥

इति भविष्योत्तरपुराणे भीष्मयुधिष्ठिरसंवादे
सोमवत्यमावास्याव्रतोद्यापनं संपूर्णम् ॥

अथ कथा ॥

शरतल्पगतं भीष्ममुपगम्य युधिष्ठिरः । कृतप्रणामो धर्मात्मा हितं वचनमब्रवीत् ॥ १ ॥ युधिष्ठिरः—हतेषु कुरुमुख्येषु भीमसेनेन कोपिना । तथाऽपरेषु भूतेषु हतेषु युधि जिष्णुना ॥ २ ॥ दुर्योधनकुमन्त्रेण जातोऽस्माकं कुलक्षयः । न सन्ति भुवि भूपालाः बालवृद्धातुरानृते ॥ ३ ॥ अवशिष्टा वयं पंच वंशे भारतसंज्ञके । एकातपत्रमपि च राज्यं मह्यं न रोचते ॥ ४ ॥ जीवितेऽपि जुगुप्सा स्यान्मृतेन सुगतिः क्वचित् । दृष्ट्वा संततिविच्छेदं संतापो हृदयेऽनिशम् ॥ ५ ॥ अश्वत्थामास्त्रनिर्दग्धस्तूत्तरागर्भसंभवः । अतो मे द्विगुणं दुःखं पिण्डविच्छेददर्शनात् ॥ ६ ॥ किं करोमि क्व गच्छामि पितामह वदाधुना । येन संपद्यते सद्यस्संततिश्चिरजीविनी ॥ ७ ॥ भीष्मः—शृणु राजन् प्रवक्ष्यामि व्रतानामुत्तमं व्रतम् । यस्यानुष्ठानमात्रेण संततिश्चिरजीविनी ॥ ८ ॥ अमावास्या यदा पार्थ सोमवारयुता भवेत् । तस्यामश्वत्थमागत्य पूजयेच्च जनार्दनम् ॥ ९ ॥ अष्टोत्तरशतं कुर्यात्तस्मिन्वृक्षे प्रदक्षिणान् । तावत्संख्यान्युपादाय रत्नधातुफलानि च ॥ १० ॥ व्रतराजमिदं राजन् विष्णोः प्रीतिकरं शुभम् । रुद्रादिलयकर्तारः प्रसीदन्ति तदात्मकाः ॥ ११ ॥ मूर्तित्रया-

त्मकोऽश्वत्थः सर्वदेवमयस्तथा । पूजया वेदवृक्षस्य सर्वेष्टार्थानवाप्नुयात् ॥ १२ ॥ उत्तरां कारय प्राज्ञ गर्भो जीवितमाप्स्यति । भविष्यति गुणैः पुत्रस्त्रिषु लोकेषु विश्रुतः ॥ श्रुत्वा पितामहप्रोक्तं प्रत्युवाच युधिष्ठिरः॥ १३ ॥ युधिष्ठिरः—तद्व्रतं व्रतराजाख्यं विस्तरेण प्रकाशय। केन प्रकाशितं मर्त्ये केनेदं विहितं विभो॥ भीष्मः—अस्ति या सर्वविख्याता कांचीसंज्ञा महापुरी ॥ रजताचलसंकाशसौधसंघैर्विराजिता। सुवेषैर्नागरजनैर्नारीभिरुपसेविता॥ ब्रह्मक्षत्रियविट्छूद्रैः स्वस्वकर्मरतैर्वृता । रूपचातुर्ययुक्ताभिर्वेश्याभिः समलंकृता ॥ १७॥ अत्र राजा महासेनो बभूवामितविक्रमः। तस्मिन् वसति भूपाले जनानन्दकरे शुभे ॥ १८ ॥ तस्य राज्येऽवसद्विप्रः देवस्वामीति विश्रुतः । तस्य स्त्री रूपसंपन्ना नाम्ना धनवती शुभा ॥ १९ ॥ यथार्थनामधेया सा लक्ष्मीरिव सुविग्रहा। तस्यां संजनयामास सप्त पुत्रान् गुणान्वितान् ॥ २० ॥ एकां दुहितरं रम्यां नाम्ना गुणवतीं नृप। कृतदाराश्च ते पुत्रा विहरन्ति यथासुखम् ॥ २१ ॥ कन्या कुमारिका चासीदनुरूपप्रियार्थिना। अत्रान्तरे द्विजः कश्चिद्भिक्षार्थं समुपागतः ॥ २२ ॥ दीप्यमानः स्वतेजोभिर्मूर्तिमानिव पावकः । द्वारदेशमुपागत्य प्रयुयोजाशिषं तदा ॥ २३ ॥ देवस्वामिस्तुषास्सप्त समुत्थाय ससम्भ्रमम्। भिक्षां प्रत्येकमानिन्युर्ददुस्तस्मै द्विजन्मने ॥ २४ ॥ अवैधव्याशिषं प्रादात्ताभ्यः सौभाग्यसंपदः। ततो गुणवती मात्रा प्रहिता सह भिक्षया ॥ २५॥ विप्राय भिक्षां प्रददौ कृत्वा पादाभिवन्दनम्। आशिषं च ददौ विप्रः शुभे धर्मवती भव ॥ २६ ॥ सा वैलक्ष्यं गुणवती श्रुत्वा गत्वा ययौ गृहं। मात्रे निवेदयामास चाशिषं तेन योजिताम् ॥२७॥

श्रुत्वा धनवती पुत्रीं करे धृत्वा समाययौ। प्रणतिं कारयामास पुनस्तस्मै द्विजन्मने ॥ २८ ॥ तथैवाशिषमुच्चार्य पुनस्तामभ्यनन्दयत् । श्रुत्वाऽशिषं धनवती सचिन्ता प्रत्युवाच ह ॥ २९ ॥ धनवती—प्रसीद भगवन् विप्र वचनं मेऽवधारय । स्नुषाभ्यः प्रणताभ्यो मे त्वया दत्ता वराशिषः ॥ ३० ॥ अवैधव्यकराः पुत्रसुखसौभाग्यदायकाः । सुतायां प्रणतायां मे विपरीतं त्वयोदितम् ॥ ३१ ॥ भद्रे धर्मवती भूया इत्युदीर्य पुनः पुनः । आशीः प्रयुक्ता विप्रर्षे कारणं वद सत्वरम् ॥३२॥ धन्यासि त्वं धनवति प्रख्यातचरिता भुवि । यथायोग्यं प्रयुक्तेयं मयाऽऽशीर्दुहितुस्तव ॥३३॥ इयं सप्तपदीमध्ये वैधव्यं समवाप्स्यति। धर्माचरणमत्यर्थं कर्तव्यमनया शुभे ॥३४॥ अतो मयाऽऽशीर्दत्तेयं शुभे धर्मवती भव । श्रुत्वा धनवती वाक्यं चिन्ताकुलितचेतसा ॥३५॥ उवाच वचनं दीनं प्रणिपत्य पुनः पुनः ॥ धनवती—उपायनं वेत्सि विप्रेन्द्र वद शीघ्रं दयां कुरु ॥३६॥ अपायं वेत्सि चेद्विप्र किं करोमि दयानिधे ॥ द्विजः—यदाऽऽगता भवेत्सोमा गृहे वै तव सुन्दरि ॥३७॥ तस्याः पूजनमात्रेण भवेद्वैधव्यनाशनम् ॥ धनवती—का सा सोमा त्वया प्रोक्ता का जातिः कुत्र संस्थितिः ॥३८॥ यस्या आगममात्रेण भवेद्वैदव्यभंजनम् । एतद्वद महाभाग सकलं विस्तरस्व मे ॥ ३९ ॥ द्विजः—सोमा सा रजकी जात्या स्थितिस्तस्याश्च सिंहले । सा चेदायाति ते वेश्म भवेद्वैधव्यभंजनम् ॥ ४० ॥ इत्युक्त्वा ब्राह्मणोऽन्यत्र गतो भिक्षाप्रतीक्षया । धनवत्यपि पुत्रेभ्यः प्रोवाच वचनं तदा ॥ ४१ ॥ इयं दुर्ललिता पुत्राः स्वसा गुणवती शुभा । सोमागमनमात्रेण भवेद्वैधव्यभंजनम् ॥ ४२ ॥ यस्यास्ते भक्तिः पितरि मातुर्वचनगौरवम् । स प्रयातु सह स्वस्रा सा मामानं-

यितुं ध्रुवम् ॥४३॥ पुत्रा ऊचुः—ज्ञातं मातस्तव स्वान्तं पुत्रीस्नेहवशंगतम् । यात देशान्तरं पुत्राः प्रख्यापयसि दुर्गमम् ॥ ४४ ॥ अन्तरे दुस्तरस्सिंधुः शतयोजनविस्तरः । अशक्यं गमनं तत्र न क्षमा गमने वयम् ॥४५॥ देवस्वाम्युवाच—अपुत्रस्सप्तभिः पुत्रैरहं यास्यामि सिंहलम् । आनयिष्यामि तां सोमां पुत्रीवैधव्यनाशिनीम् ॥४६॥ एवंवादिनि सक्रोधे देवस्वामिनि तत्क्षणम् । शिवस्वामी कनिष्ठस्तु पुत्रः प्रोवाच सम्मतः ॥ ४७ ॥ तात मा वद चैवं त्वं रोषावेशवशं गतः । मयि तिष्ठति कश्शक्तो गन्तुं द्वीपं हि सिंहलम् ॥४८॥ इत्युक्त्वा सहसोत्थाय प्रणम्य शिरसा मुदा । प्रतस्थे सहितः स्वस्रा द्वीपं सिंहलसंज्ञितम् ॥४९॥ स कियद्भिर्दिनैर्गत्वा तीरं प्राप सरित्पतेः । ततुँ तमम्बुधिं तत्र प्रयत्नमकरोद्द्विजः ॥५०॥ स ददर्श सुविस्तीर्णं न्यग्रोधद्रुममन्तिके । तत्कोटरे सुखासीना गृध्रराजस्य बालकाः ॥५१॥ तत्पादपतले स्थित्वा ताभ्यां नीतं तु तद्दिनम् । शावकानां कृते गृद्ध्रो गृहीत्वा शिशुभोजनम्॥५२॥ प्रादान्न शावका गृद्ध्राद्भोजनं जगृहुर्भृशम् । पप्रच्छ बालकान् गृद्ध्रश्चिन्ताकुलितमानसान् ॥५३॥ गृद्ध्र उवाच—कथं न भुञ्जते पुत्रा भवन्तः क्षुधिता अपि । आनीतं कोमलं मांसं भवद्योग्यमिदं मया ॥५४॥ एतद्वृक्षतले तात मानवावत्र तिष्ठतः । अभुञ्जतोस्तयोरद्य कथं भुञ्जामहे वयम् ॥५५॥ एतच्छ्रुत्वा तु गृद्ध्रस्तु करुणाहृष्टचेतसः । तयोरन्तिकमागत्य वचनं समभाषत ॥ ५६ ॥ गृद्ध्रः—जातस्तु युवयोः कामो वक्तव्योऽत्र मम द्विज । क्रियते सर्वथा विप्र भोजनं कर्तुमर्हसि ॥ ५७ ॥ द्विज उवाच—सिंहलं गन्तुकामोऽहं जलधेः पारमद्य वै । सोमानयनमिच्छामि स्वसृवैधव्यनाशनम् ॥५८॥ गृद्ध्रः—त्वामहं

पारयिष्यामि जलधेः प्रातरेव हि॥ सोमागृहमपि ब्रह्मन् दर्शयिष्यामि सिंहले॥५९॥ततो रात्र्यां व्यतीतायामुदिते च दिवाकरे। पारमुत्तारितौ तौ तु गृध्रराजेन वेगिना ॥६०॥ सिंहलद्वीपमागत्य स्थितौ सोमागृहान्तिके ॥ ततः प्रत्यूषसमये संमृज्याङ्कणमण्डलम् ॥ ६१ ॥ लेपनं चक्रतुस्तस्या दिवसे दिवसे शुभम्। एवं विदधतोस्तत्र पूर्णस्संवत्सरो गतः ॥ ६२ ॥ स्नुषाः पुत्रान् समाहूय सोमा पप्रच्छ विस्मिता ॥ मार्जनं लेपनं कोऽत्र करोति मम कथ्यताम्। एकथैवाथ जगदुस्सर्वाः कृत्यमिदं हि नः ॥ ततः कदाचिद्रजकी निभृता संस्थिता निशि ॥६४॥॥ ददर्श ब्राह्मणीं कन्यां मार्जयन्तीं गृहाङ्गणम्॥ लिम्पन्तमङ्कणं प्राप्तं भ्रातरं च शुचिव्रतम् ॥६५॥ सोमा पप्रच्छ तौ गत्वा कौ युवां कथ्यतां मम । ऊचतुस्तौ तदा सोमामावां ब्राह्मणपुत्रकौ ॥ ६६ ॥ सोमोवाच—दग्धास्मि ! बत ! नष्टास्मि !! ब्राह्मणौ गृहमार्जकौ ॥ कां गतिं बत यास्यामि पापादस्मादसंशयम् ॥ ६७ ॥ पापजातिरहं ख्याता रजकी सर्वथा द्विज। कथं त्वं ब्राह्मणो भूत्वा विरुद्धं मे चिकीर्षसे ॥ ६८ ॥ शिवस्वाम्युवाच—एषा गुणवती नाम्ना स्वसा मम सुमध्यमा ॥ अस्याः सप्तपदीमध्ये वैधव्यं संप्रपत्स्यते ॥ ६९ ॥ तव सान्निध्यमात्रेण भवेद्वैधव्यभंजनम ॥ अतो हेतोः सह स्वस्रा पापकर्म करोमि ते॥७०॥ सोमोवाच—इतःपरं न कर्तव्यमायामि तव शासनात् ॥ इत्युक्त्वा सा समागत्य स्नुषाभ्यः प्रत्युवाच ह ॥ ७१ ॥ यः कश्चिन्मम गेहेऽस्मिन् म्रियते मानवः क्वचित्। तथैव रक्षणीयोऽसौ यावदागम्यते मया ॥७२॥कस्यचिद्वचनात्कोऽपि नैव दाह्यः कथंचन। तथेत्युक्ता स्नुषाभिस्सा सोमा याता महांबुधिं ॥ ७३ ॥ पारमुत्तारयामास क्षणेन द्विजपुत्रकौ। स्वयमाकाशमार्गेण सोत्ततार महार्णवम् ॥

॥ ७४ ॥ प्राप्ताः काञ्चीपुरीं सर्वे निमेषात्तत्प्रभावतः ॥ सोमां दृष्ट्वा धनवती हृष्टा पूजामथाकरोत् ॥ ७५ ॥ अत्रान्तरे शिवस्वामी तदा देशान्तरात्स्वसुः ॥ सदृशं वरमानेतुं जगामोज्जयिनीं प्रति ॥ ७६ ॥ आनिनाय वरं तत्र देवशर्मसुतं सुधीः । ब्राह्मणं रुद्रशर्माणं गुणिनं सदृशं स्वसुः ॥७७॥ ततः सा रजकी सोमा वैवाहिकमथाकरोत् । सुलग्ने च सुनक्षत्रे देवस्वामी तु कन्यकाम् ॥ ७८ ॥ ददौ तस्मै गुणवतीं गुणिने रुद्रशर्मणे । ततो वैवाहिकैर्मन्त्रैर्हूयमाने हुताशने ॥७९॥ ततः सप्तपदीमध्ये रुद्रशर्मा मृतस्तदा । रुरुदुर्बान्धवाः सर्वे स्थिता सोमा निराकुला ॥८०॥ आक्रन्दश्च महानासील्लोकानां तत्र पश्यताम्। गुणवत्यै च सा तूर्णं व्रतराजप्रभावजम् ॥ ८१ ॥ पुण्यं संकल्प्य विधिवद्ददौ मृत्युनिरासनम् । रुद्रशर्मापि तस्माच्च व्रतराजप्रभावतः ॥ ॥ ८२ ॥ आससाद तदा जीवं सुप्तवत्सहसोत्थितः । एवं विवाहं निर्वर्त्य व्रतराजं निवेद्य च ॥ ८३ ॥ आमन्त्र्य तां धनवतीं सोमा प्रायाद्गृहं प्रति। एवं सा रजकी सोमा जीवयित्वा मृतं द्विजम् ॥८४ ॥ चचाल हर्षसंपूर्णा पूर्णकामा स्वमन्दिरम् । अत्रान्तरे गृहे तस्याः प्रथमं तनया मृताः॥८५॥पुनस्स्वामी मृतस्तस्या जामाता च ततो मृतः ॥८६॥ आगच्छन्त्यास्तदा तस्याः सोमवारान्विता तिथिः । अमावास्या बभूवाथ मृतसंजीविनी तिथिः ॥८७॥ सा ददर्श जलोपान्ते वृद्धां कांचित् स्त्रियं तदा । तूलभारभराक्रान्तां क्रन्दमानां सुदुःखिताम् ॥८८॥ वृद्धोवाच—अवतारय मे पुत्रि तूलभारं शिरः स्थितं । एतद्भारभराक्रान्तां क्रन्दमानां सुदुःखिताम् ॥ ८९ ॥ सोमोवाच—अमावास्याद्य हे बृद्धे सोमवारयुता तिथिः । तूलकं न स्पृशाम्यद्य नियमोऽयं मया कृतः ॥ ९० ॥ पुनर्ददर्श यान्तीं सा मूलभारवतीं

स्त्रियम् । सा चोवाच ततः पुत्री मूलभारो महानिति ॥९१॥ अवतीर्य क्षणं तिष्ठ सङ्गे यास्याम्यहं तव । अद्य मूलं तथा तूलं न स्पृशामि कदाचन ॥९२॥ ततोऽश्वत्थतरुं प्राप्य नदीतीरभवं शुभम्। स्नात्वा देवं समभ्यर्च्य शर्कराभिः प्रदक्षिणान् ॥९३॥ सा चकार महाभागा तथैवाष्टोत्तरं शतम् ॥ भीष्मः—यदा प्रदक्षिणशतं कृतं शर्करहस्तया ॥९४॥ तदा जीवितवन्तस्ते जामातृपतिपुत्रकाः । नगरं श्रीसमाकीर्णं तद्गृहं च विशेषतः ॥ ९५ ॥ अथ याता महाभागा सोमा स्वभवनं प्रति । जीवितं वीक्ष्य भर्तारं पुत्रान् जामातरं तथा ॥९६॥ अभिज्ञातान् समासाद्य जगाम कृतकृत्यताम्। प्रणिपत्य स्नुषाः सर्वाः प्रपच्छुस्तां तपस्विनीम् ॥९७॥ मृतास्ते तनया देवि पतिजामातृबान्धवाः । जीवितास्ते कथं सोमे मृतास्ते च कथं वद ॥ ९८ ॥ सोमोवाच—गुणवत्यै मया दत्तं व्रतराजस्य पुण्यकम् । मृतास्ते तद्विपाकेन पतिजामातृपुत्रकाः ॥९९॥ तूलकं न मया स्पृष्टं मूलकं च तथा स्नुषाः । अश्वत्थे देवमभ्यर्च्य कृतास्तत्र प्रदक्षिणाः ॥ १०० ॥ शर्कराहस्तया तत्र कृतमष्टोत्तरं शतम् । जीवितास्तत्प्रसादेन ह्यद्यजामातृपुत्रकाः ॥१०१॥ सर्वाभिः क्रियतामद्य व्रतराजो विधानतः । भविष्यति न वैधव्यं सौभाग्यं संभविष्यति ॥१०२॥ स्नुषास्ताः कारयामास तथा सोमा व्रतेश्वरम् । भुक्त्वा भोगान्बहूंस्तत्र पुत्रपौत्रादिभिस्सह ॥१०३॥ तैश्च सर्वैः परिवृता विष्णुलोकमवाप सा । इत्येतत्कथितं पार्थ विस्तरेण मया तव ॥ १०४ ॥ युधिष्ठिरः—माहात्म्यं व्रतराजस्य को विधिर्वद विस्तरात् । कर्तव्यं केन भीष्मेदं नारीभिः पुरुषेण वा ॥१०५॥ अमावास्या यदा पार्थ सोमवारान्विता भवेत् । तदा पुण्यतमः कालो

देवानामपि दुर्लभः ॥१०६॥ प्रातरुत्थाय विधिना स्नानं कार्यं जलाशये । स्नात्वा मौनेन कौशेयं परिधाय व्रती ततः ॥१०७॥ गत्वा चाश्वत्थवृक्षस्य समीपं कुरुनन्दन । अश्वत्थमूले कर्तव्यं विष्णवाद्यमरपूजनम्॥१०८॥ व्यक्ताव्यक्तस्वरूपाय सृष्टिस्थित्यन्तकारिणे। आदिमध्यान्तहीनाय विष्टरश्रवसे नमः॥१०९॥ इति विष्णुमुखान्देवानर्चयेद्विधिपूर्वकम॥ छन्दोमये वृक्षराजे सर्वे देवाः समाहिताः॥११०॥ मूर्तित्रयात्मन्यश्वत्थनारायणसमाह्वये। पूजिते विश्वरूपेऽसौ पूज्यते भगवान् हरः ॥१११॥ अश्वत्थे वो निषदनं त्वारात्ते अग्निरस्तु ते । समगृत्स्यते चोर्ध्वमूलं तद्विष्णोरिति मन्त्रतः ॥११२॥ आत्वावहन्तु देवावै ब्रह्मजज्ञानमित्यपि । पूजयेत्सर्वदेवांश्च विष्णुं सर्वात्मकं तथा ॥११३॥ मूलतो ब्रह्मरूपाय मध्यतो विष्णुरूपिणे । अग्रतः शिवरूपाय वृक्षराजाय ते नमः ॥११४॥ एवं संपूज्य देवेशं पीतवस्त्राक्षतैः फलैः । कुसुमैर्विविधैश्चैव भक्ष्यभोज्यैस्तथाविधैः ॥११५॥ अश्वत्थपूजनं कार्यं प्रोक्तमन्त्रेण पांडव। अश्वत्थ हुतभुग्वास गोविन्दस्य सदा प्रिय॥११६॥ अशेषं हर मे पापं वृक्षराज नमोऽस्तु ते। प्राणिसंजीवकं स्वामिन् भूतावास वनस्पते ॥११७॥ अश्वत्थ रुद्ररूपोऽसि वृक्षरूप नमोऽस्तु ते। एवं पूजाविधिं कृत्वा ततः कुर्यात्प्रदक्षिणान्॥११८॥ मौक्तिकैः कांचनै रौप्यैर्हीरकैर्मणिभिस्तथा । कांस्यपात्रैस्ताम्रपात्रैः भक्ष्यपूर्णैः पृथक्पृथक् ॥११९॥ गृहीत्वा भ्रमणं कार्यं यावदष्टोत्तरं शतम् । समर्पितं च यद्द्रव्यमर्पयेद्गुरवे शुभम् ॥१२०॥ सुवासिन्यश्च संपूज्याः सोमासंतुष्टिहेतवे । दद्याच्चान्नं तु विप्रेभ्यः स्वयं भुञ्जीत वाग्यतः ॥१२१॥ एष ते कथितो भूप व्रतराजविधिर्मया । द्रौपदी

च सुभद्रां च कारयस्व तथोत्तराम् ॥ १२२॥उत्तरागर्भसंस्थस्तु जीवितं च लभेच्चिरात् । युधिष्ठिरः—या स्वल्पविभवा नारी कांचनाद्यैर्विनाकृता ॥ १२३ ॥ सा कथं लभते पूर्णं व्रतराजफलं वद । फलैः पुष्पैस्तथा भक्ष्यैर्वस्त्राद्यैरपि पांडव ॥१२४॥ कुर्यात्प्रदक्षिणावर्तं सापि पूर्णं लभेत्फलम् ॥१२५॥ व्रतमिदमखिलं नरेन्द्र विष्णोर्विबुधगणस्य च कीर्तितं मयाद्य । पतिसुतधनमिच्छती पुरन्ध्री सपदि करोतु फलानि सन्तु नित्यम् ॥१२६॥ अथोद्यापनविधिः ॥ शृणु पार्थ प्रवक्ष्याभि ह्युद्यापनविधिं शुभम्। यं विना पूर्णता न स्याद्व्रतराजस्य वै नृप॥१२७॥ कारयेत्सर्वतोभद्रं तन्मध्ये कुंभमुत्तमम् ॥ वृक्षराजं सुवर्णस्य पञ्चरत्नस्य वेदिकाम् ॥१२८॥ तन्मूले प्रतिमां विष्णोः सौवर्णीं च चतुर्भुजाम्। लक्ष्मीं वाहनसंयुक्तां माषद्वयफलावधि ॥१२९॥ब्रह्मरुद्रादिदेवानां यथाशक्ति तु कारयेत् । रिक्तस्य सर्वदेवात्मा विष्णुरेव विशिष्यते ॥१३०॥ उपचारैरनन्तैश्च यथाविभवविस्तरैः । नैवेद्यैः पुष्पधूपैश्च दीपैश्च परितः स्थितः ॥१३१ ॥ रात्रौ जागरणं कुर्यात्प्रभाते होममाचरेत् । समिद्भिः पैप्पलाभिश्च पायसेन तिलैस्तथा ॥१३२॥ इदं विष्णिवति मन्त्रेण हुत्वा च प्रणवेन च। विष्णवष्टाक्षरमन्त्रेग शिवपंचाक्षरेण वा ॥ १३३॥ सर्वदैवतमन्त्रैश्च विष्णुरत्र विशिष्यते ॥ मूर्तित्रयात्मकाश्वत्थवृक्षं पूर्णाहुतिं चरेत् ॥ आचार्यं पूजयेत्पश्चाद्गां च दद्यात्पयस्विनीम् । ब्रह्माणं वस्त्रभूषाद्यैस्सदस्यं च प्रपूजयेत् ॥१३५॥ ब्रह्मणे कलशश्चैको विष्णोरेकः प्रधानकः । रुद्रादिसर्वदेवानां दशानुगमतः स्मृताः ॥ १३६ ॥ एवं द्वादश दद्याद्वै तदशक्तो द्वयं तथा । ऋत्विजोऽत्र क्रमात्पूज्या घृतपायसभोजनैः ॥ १३७ ॥ उपवीतानि

वस्त्राणि तेभ्यो दद्याच्च दक्षिणाम् ॥ प्रणम्य दण्डवद्भूमौ प्रार्थयित्वा विसर्जयेत् ॥१३८॥ एवं द्वादशवर्षेषु मध्ये चादौ समाचरेत्॥ कृत्वा ह्युद्यापनं सम्यग्व्रतराजफलं भवेत् ॥ १३९ ॥ सर्वं निवेदयेत्पीठमाचार्याय सदक्षिणम् ॥ अच्छिद्रं वाचयेत्पश्चात्स्वयं भुञ्जीत वाग्यतः ॥

इति श्रीभविष्योत्तरपुराणे सोमवत्यमावास्याव्रतकथा संपूर्णा ॥

॥ श्रीरस्तु ॥

॥ अथ महाप्रदोषव्रतम् ॥

आदावनुज्ञां कृत्वा। ब्राह्मणान्नमस्कृत्य दक्षिणां तांबूलञ्च गृहीत्वा अशेषे...स्वीकृत्य मम जन्माभ्यासात्...अपनोदनार्थं पुत्रपौत्राभिवृद्ध्यर्थं आयुरभिवृद्ध्यर्थमपमृत्युपरिहारार्थं सर्वारिष्टनिवृत्त्यर्थं सर्वाभीष्टसिद्ध्यर्थं सांबपरमेश्वरवरप्रसादसिद्ध्यर्थं मया आचरितस्य महाप्रदोषव्रतस्य उद्यापनकर्मणः कल्पोक्तसाङ्गफलसिद्ध्यर्थं आचार्यमुखेन ऋत्विङ्मुखेन च महाप्रदोषव्रतोद्यापनं कर्तुं योग्यतासिद्धिमनुगृहाण ॥ विघ्नेश्वरपूजां कृत्वा ॥ अनुज्ञावत्संकल्पः ॥ व्रतोद्यापनकर्म करिष्ये इति संङ्कल्प्य । विघ्नेश्वरमुद्वास्य । ग्रहप्रीतिमभ्युदयं च कृत्वा । आचार्यादिवरणं कृत्वा । सद्योजातरूपिणमाचार्यं वृत्वा वामदेवं, अघोरं, तत्पुरुषं, ईशानं, एवं क्रमशः ब्राह्मणान् वृत्वा शुचौ समे देशे चतुरश्रं स्थण्डिलं कल्पयित्वा तन्मध्ये व्रीहीन्निक्षिप्य तदुपरि तण्डुलान्निक्षिप्य तन्मध्ये पद्मं लिखित्वा तदुपरि प्रागग्रान्दर्भान् संस्तीर्य तेषु कुम्भं प्रतिष्ठाप्य परितः चतुरः कुम्भान्प्रतिष्ठाप्य तान् वस्त्रादिभिरलंकृत्य प्रतिमाः स्थापयित्वा मण्डपशुद्ध्यर्थं पुण्याहं वाचयित्वा सर्वोपकरणानि प्रोक्ष्य। ऋत्विग्भिस्सह आचार्यः तत्तत्प्रतिमापूजां करिष्ये, तदङ्गं कलशपूजां च करिष्य इति संङ्कल्प्य । कलशपूजां कृत्वा पूजोपकरणानि प्रोक्ष्य । सर्वे कुम्भं स्पृष्ट्वा जपेयुः ॥ आपो वा...दुरितक्षयकारकाः ॥ इति जपित्वा कुम्भेषु 'इमं मे वरुण' 'तत्त्वायामी'ति द्वाभ्यां वरुणमावाह्य। प्रतिमासु ईशानादीनावाह्य ॥

अथ ध्यानम् ॥

ध्यायेच्चैतन्यमात्मानं सर्वज्ञं सर्वकारणम् ।
व्याघ्रचर्माम्बरधरं नीलग्रीवं त्रिलोचनम् ॥

ध्यानम् ॥

आवाहयेदुमाकान्तं सद्योजातादिमन्त्रकैः ।
मुक्ताप्रवालसहिते जांबूनदपरिष्कृते ॥
उपविष्टमुमाकान्तं स्फाटिके वृषवाहने ।
गङ्गाधरं चन्द्रमौलिं व्यालयज्ञोपवीतिनम् ॥

अस्यां प्रतिमायां ईशानमावाहयामि ॥

एवमेव सर्वासु प्रतिमासु तत्तन्मन्त्रैस्तत्तद्देवता आवाह्य प्राणप्रतिष्ठां कुर्यात् ॥

अनेकरत्नसंयुक्तं मुक्तामणिविभूषितम् ।
ध्यात्वा तेनैव रूपेण आसनं परिकल्पये ॥

ईशानाय नमः आसनं समर्पयामि ॥

पाद्यं ददामि भगवन् भक्त्या तुभ्यं मया प्रभो ।
त्राहि मां सर्वलोकेश मम पापं च नाशय ॥

ई...य नमः पाद्यं समर्पयामि ॥

पञ्चवक्त्राय देवाय पञ्चाक्षरस्वरूपिणे ।
नानापरिमलैर्युक्तं तुभ्यमर्घ्यं ददाम्यहम् ॥

ई...य नमः अर्घ्यं समर्पयामि ॥

कर्पूरचन्दनैर्युक्तं निर्मलं तु कुशोदकम् ।

चन्द्रमौले मया दत्तं गृहाणाचमनीयकम् ॥
ईशानाय नमः आचमनीयं समर्पयामि ॥

शूलिने च नमस्तुभ्यं शङ्कराय नमोऽस्तु ते ।
मध्वाज्यदधिसंयुक्तं मधुपर्कं च गृह्यताम् ॥
ई...य नमः मधुपर्कं समर्पयामि ॥

मध्वाज्यशर्करायुक्तं फलक्षीरसमन्वितम् ।
पञ्चामृतं प्रदास्यामि स्नानं स्वीकुरु शङ्कर ॥
ई...य नमः पञ्चामृतस्नानं समर्पयामि ॥

बालेन्दुशेखरेशान सोमसूर्याग्निलोचन ।
गन्धोदकं मयाऽनीतं स्नानार्थं प्रतिगृह्यताम् ॥
ई...य नमः गन्धोदकस्नानं समर्पयामि ॥

नमः कैलासवासाय नमः कालान्तकाय च ।
तोयं शुद्धं मया दत्तं स्नानार्थं प्रतिगृह्यताम् ॥
ई...य नमः शुद्धोदकस्नानं समर्पयामि ॥

दिगंबराय देवाय नमस्ते कृत्तिवाससे ।
वस्त्रद्वयं दुकूलञ्च समाच्छादय शङ्कर ॥
ई...य नमः वस्त्रं समर्पयामि ॥

ब्रह्मसूत्रमिदं ब्रह्मन् त्रिगुणं त्रिगुणात्मकम् ।
वांछितार्थप्रसिद्ध्यर्थमुपवीतञ्च गृह्यताम् ॥
ई...य नमः उपवीतं समर्पयामि ॥

किरीटं कटकं चैव वलयं हारकुण्डलम् ।
गृहाणाभरणं शंभो शरणागतवत्सल ॥
ई...य नमः आभरणानि समर्पयामि ॥

श्रीगन्धं कुङ्कुमोपेतं कर्पूरेण समन्वितम् ।
गृहाण सर्वदेवेश सद्योजात नमो नमः ॥
ईशानाय नमः गन्धं समर्पयामि ॥

गिरिधन्वन् गिरिपते गिरिजापतये नमः ।
पुत्रपौत्राभिवृद्ध्यर्थमक्षतांश्च गृहाण भो ॥
ई...य नमः अक्षतान् समर्पयामि ॥

नानाविधानि पुष्पाणि चंपकादीनि सुव्रत ।
मया दत्तानि संगृह्य पुत्रपौत्रान् प्रवर्धय ॥
ई...य नमः पुष्पाणि पूजयामि ॥

॥ अथांगपूजा ॥

शिवाय नमः शिवायै नमः	पादौ	पूजयामि
शर्वाय नमः शर्वाण्यै नमः	गुल्फौ	,,
ईश्वराय नमः ईश्वर्यै नमः	जङ्घे	,,
रुद्राय नमः, रुद्राण्यै नमः	जानुनी	,,
परमात्मने नमः परमेश्वर्यै नमः	ऊरू	,,
व्याघ्रचर्मधराय नमः, पीतांबरधारिण्यै नमः	कटिं	,,
गौरीपतये नमः, गौर्यै नमः	जघनं	,,
शङ्कराय नमः, शङ्कर्यै नमः	नाभिं	,,
जगदीश्वराय नमः, जगदीश्वर्यै नमः	उदरं	,,
महेश्वराय नमः, महेश्वर्यै नमः	हृदयं	,,
भवाय नमः, भवान्यै नमः	वक्षःस्थलं	,,

महादेवाय नमः, महादेव्यै नमः स्तनौ पूजयामि
त्र्यम्बकाय नमः, त्र्यम्बकायै नमः स्कन्धौ ,,
त्रिपुरारये नमः, त्रिपुरसुन्दर्यै नमः बाहून् ,,
शूलपाणये नमः, शूलपाण्यै नमः हस्तान् ,,
कालकण्ठाय नमः, कंबुकण्ठ्यै नमः कण्ठं ,,
भगवते नमः, भगवत्यै नमः चुबुकं ,,
पञ्चवक्त्राय नमः, सुवक्त्रायै नमः मुखं ,,
त्रिणेत्राय नमः, इन्दीवराक्ष्यै नमः नेत्राणि ,,
सर्पकुण्डलधराय नमः, रत्नताटङ्कधारिण्यै नमः कर्णौ ,,
चंपकनासाय नमः, सुनासायै नमः नासिकां ,,
फालनेत्राय नमः, कस्तूरीतिलकायै नमः ललाटं ,,
जटाधराय नमः, पूर्णकुन्तलधरायै नमः शिरः ,,
चन्द्रशेखराय नमः, चन्द्रशेखर्यै नमः जटाकलापं ,,
सर्वेश्वराय नमः, सर्वेश्वर्यै नमः सर्वाण्यङ्गानि पूजयामि ॥

शिवाष्टोत्तरशतनामावलिप्रारंभः ॥

"नमः" इति प्रतिनाम अनुसंधेयम्.

ॐ शिवाय नमः
महेश्वराय
शंभवे नमः
पिनाकिने
शशिशेखराय
वामदेवाय

ॐ विरूपाक्षाय नमः
कपर्दिने नमः
नीललोहिताय
शङ्कराय १०
शूलपाणये
खट्वाङ्गिने

विष्णुवल्लभाय नमः
शिपिविष्टाय
अंबिकानाथाय
श्रीकण्ठाय
भक्तवत्सलाय
भवाय नमः

शर्वाय
त्रिलोकेशाय २०
शितिकण्ठाय
शिवाप्रियाय
उग्राय
कपर्दिने
कामारये
अन्धकासुरसूदनाय
गङ्गाधराय
ललाटाक्षाय
कालकालाय
कृपानिधये ३०
भीमाय
परशुहस्ताय
मृगपाणये
जटाधराय
कैलासवासिने
कवचिने
कठोराय
त्रिपुरान्तकाय
वृषाङ्काय
वृषभारूढाय ४०
भस्मोद्धूलितविग्रहाय
सामप्रियाय
स्वरमयाय
त्रयीमूर्तये

अनीश्वराय
सर्वज्ञाय
परमात्मने
सोमसूर्याग्निलोचनाय
हविषे
यज्ञमयाय ५०
सोमाय
पञ्चवक्त्राय
सदाशिवाय
विश्वेश्वराय
वीरभद्राय
गणनाथाय
प्रजापतये
हिरण्यरेतसे
दुर्धर्षाय
गिरीशाय ६०
गिरिशाय
अनघाय
भुजङ्गभूषणाय
भर्गाय
गिरिधन्वने
गिरिप्रियाय
कृत्तिवाससे
पुरारातये
भगवते
प्रमथाधिपाय ७०

मृत्युञ्जयाय
सूक्ष्मतनवे
जगद्व्यापिने
जगद्गुरवे
व्योमकेशाय
महासेनजनकाय
चारुविक्रमाय
रुद्राय
भूतपतये
स्थाणवे ८०
अहिर्बुध्न्याय
दिगंबराय
अष्टमूर्तये
अनेकात्मने
सात्त्विकाय
शुद्धविग्रहाय
शाश्वताय
खण्डपरशवे
अजाय
पापविमोचनाय ९०
मृडाय
पशुपतये
देवाय
महादेवाय
अव्ययाय
हरये

पूषदन्तभिदे	भगनेत्रभिदे	अपवर्गप्रदायकाय
अव्यग्राय	अव्यक्ताय	अनन्ताय
दक्षाध्वरहराय	सहस्राक्षाय	तारकाय
हराय १००	सहस्रपदे	परमेश्वराय १०८

नानाविधपत्रपुष्पाणि समर्पयामि ॥

दशाङ्गं च पटीरं च एलागुग्गुलसंयुतम् ।
धूपं गृहाण देवेश विरूपाक्ष नमोऽस्तु ते ॥

सांबाय महेश्वराय नमः धूपं आघ्रापयामि ॥

इन्द्वर्कवह्निनेत्राय पुरत्रयमथे नमः ।
घृतवर्तिसुसंयुक्तं दीपोऽयमवलोक्यताम् ॥

सांबाय महेश्वराय नमः दीपं दर्शयामि ॥

शुद्धान्नं पायसादीनि नानाशाकयुतानि च ।
षड्रसादीनि देवेश भुक्त्वा शं कुरु मे सदा ॥

सांबाय महेश्वराय नमः नैवेद्यं निवेदयामि ॥

नमस्ते शान्तमनसे सोमनाथाय शंभवे ।
एलालवङ्गकर्पूरतांबूलं प्रतिगृह्यताम् ॥

सांबाय महेश्वराय ताम्बूलं समर्पयामि ॥

चन्द्रादित्यौ च धरणिर्विद्युदग्निस्त्वमेव च ।
त्वमेव सर्वज्योतींषि भज नीराजनं प्रभो ॥

सांबाय महेश्वराय नमः नीराजनं दर्शयामि ॥

यो वेदादौ स्वरः प्रोक्तो वेदान्ते च प्रतिष्ठितः ।
तस्य प्रकृतिलीनस्य यः परस्स महेश्वरः ॥

सांबाय महेश्वराय नमः मन्त्रपुष्पं समर्पयामि ॥

नानारत्नसमायुक्तं वज्रनालसमन्वितम् ।
मुक्ताकेसरसंयुक्तं स्वर्णपुष्पं ददाम्यहम् ॥

सां···राय नमः सुवर्णपुष्पं समर्पयामि ॥

चन्द्रशेखर भूतेश त्रिलोचन वृषध्वज ।
प्रदक्षिणं करिष्यामि प्रकृष्टफलसिद्धये ॥

सां···राय नमः प्रदक्षिणानि समर्पयामि ॥

नमस्ते देवदेवेश सृष्टिस्थित्यन्तहेतवे ।
सोमसूर्याग्निनेत्राय नमस्सोमार्धमौलये ॥

सां···राय नमः नमस्कारान् ॥

ऋणपातकदौर्भाग्यदारिद्र्यविनिवृत्तये ।
अशेषाघविनाशाय प्रसीद मम शङ्कर ॥

दुःखशोकाग्निसन्तप्तं संसारभयपीडितम् ॥
बहुपापकृतं दीनं पाहि मां वृषवाहन ॥

इति प्रार्थना ॥

अर्घ्यप्रदानम् ॥ अद्य पूर्वोक्त···प्रीत्यर्थं प्रदोषव्रतोद्यापनकर्मणि प्रथमयामपूजान्ते क्षीरार्घ्यप्रदानमुपायनदानं च करिष्ये ॥

कुबेरमित्र देवेश भूतेश त्रिपुरान्तक ।
पार्वतीहृदयानन्द प्रथमार्घ्यं गृहाण भो ॥

परमेश्वराय नमः इदमर्घ्यं ॥ त्रिः ॥

उमाकान्त नमस्तुभ्यं जटामकुटमण्डित ।
चन्द्रमौले त्रिनेत्र त्वं गृहाणार्घ्यं द्वितीयकम् ॥

परमेश्वराय नमः इदमर्घ्यं ॥

कैलासवासिन् देवेश भुवनत्रयपालक ।
पञ्चब्रह्मस्वरूप त्वं गृहाणार्घ्यं तृतीयकम् ॥

परमेश्वराय नमः इदमर्घ्यं ॥

समुद्रमथनोद्भूत चण्डहालाहलाशन ।
तुरीयार्घ्यं गृहाणेदं मया दत्तं दयानिधे ॥

शिवाय नमः इदमर्घ्यम् ॥

एतानि चत्वार्यर्घ्याणि प्रतियाममेकैकं दद्यात् ॥

उत्तराणि सर्वेषु यामेषु ॥

अंबिकायै नमस्तुभ्यं नमस्ते देवि पार्वति ।
गृहाणार्घ्यं मया दत्तं सर्वसिद्धिप्रदा भव ॥

पार्वत्यै नमः इदमर्घ्यम् ॥

सुब्रह्मण्य महाभाग कार्तिकेय सुरेश्वर ।
इदमर्घ्यं प्रदास्यामि सुप्रीतो भव सर्वदा ॥

सुब्रह्मण्याय नमः इदमर्घ्यम् ॥

नन्दिकेश महाभाग शिवध्यानपरायण ।
इदमर्घ्यं प्रदास्यामि सुप्रीतो भव सर्वदा ॥

नन्दिकेश्वराय नमः इदमर्घ्यम् ॥ चण्डिकेश्वराय इदमर्घ्यम् ॥

अनेनार्घ्यप्रदानेन सांबपरमेश्वरः प्रीयताम् ॥

अथ उपायनदानं कुर्यात् ॥

एवं प्रतियामपूजां कृत्वा अन्ते उपायनानि दद्यात् ॥ रात्रौ जागरणं कृत्वा कथां च श्रुत्वा प्रभाते नित्यकर्माणि परिसमाप्य, आचार्यः स्वगृह्योक्तविधानेन मुखान्तं कृत्वा बिल्वसमित्तिलान्नाज्यैः प्रत्येकं त्र्यंबकमन्त्रेणाष्टोत्तरशतं हुत्वा होमशेषं परिसमाप्य पुनःपूजां कृत्वा, कुंभानुद्वास्य, तत्तीर्थेन, आपोहिष्ठेत्यादिमन्त्रैस्स्नापयित्वा वस्त्र पुंड्रादीन् धृत्वा तीर्थं प्राश्य अनन्तरं कलशवस्त्रप्रतिमादानानि करिष्ये इति संकल्प्य प्रतिमादानानि दशदानादीनि च कृत्वा, पार्वतीपरमेश्वरं संपूज्य ब्राह्मणान् भोजयित्वा आशिषो वाचयित्वा, बन्धुभिस्सह भोजयेत् ॥

इति प्रदोषव्रतोद्यापनविधिः ॥

प्रदोषव्रतकथा ॥

अगस्त्यः—पक्षेपक्षे प्रदोषे तु महेश्वरसमर्चनम् । त्रैवर्णिकाः प्रकुर्वन्ति नित्यं वेदविदो द्विजाः ॥ दधीचिः—पक्षप्रदोषपूजां यो न करोति द्विजोऽपि सन् । स तु स्वदैवतं त्यक्त्वा संसारमधिगच्छति ॥ सनत्कुमारः—पक्षेपक्षे वैदिकस्य प्रदोषे शिवपूजनम् । अग्निहोत्रं यथा नित्यं पापघ्नं मोक्षदायकमिति ॥ सूत उवाच—काचिच्च विप्रवनिता सपुत्रा दुःखकर्शिता । शाण्डिल्येनोपदिष्टा त्वं प्रदोषे शिवमर्चय॥ इत्युक्ता मुनिना साध्वी सा विप्रवनिता पुनः ॥ तं प्रणम्याथ पप्रच्छ शिवपूजाविधेः क्रमम् ॥ शाण्डिल्य उवाच—पक्षद्वये त्रयोदश्यां निराहारो भवेद्दिवा । घटीत्रयादस्तमयात् पूर्वं स्नानं समाचरेत् ॥ शुक्लांबरधरो भूत्वा वाग्यतो नियमान्वितः । कृतसन्ध्याजपविधिः

शिवपूजां समारभेत् ॥ देवस्य पुरतस्सम्यगुपकल्प्य नवांभसा । विधाय मण्टपं दिव्यं धौतवस्त्रादिभिर्वृतम् ॥ वितानाद्यैरलंकृत्य फलपुष्पनवाङ्कुरैः । विचित्रपत्रशोभाढ्यं वर्णपञ्चकसंयुतम् ॥ तत्र प्रविश्यतु शुभे सूपविष्टश्शुभासने । सम्यक्संपादिताशेषपूजोपकरणश्शुचिः ॥ आगमोक्तेन मन्त्रेण पीठमामन्त्रयेत् सुधीः । ततः कृत्वाऽत्मशुद्धिं च भूतशुद्ध्यादिकं क्रमात् ॥ प्राणायामत्रयं कुर्याद्बीजमन्त्रैस्सबिन्दुकैः । मातृकान्यस्य विधिवद्ध्यात्वा तां देवतां पराम् ॥ समाप्य मातृकां भूयो महान्यासादिकं चरेत् । मुहूर्तं स्वस्वरूपेण ध्यात्वा चैवं परं शिवम् ॥ वामभागे शुभं नत्वा दक्षिणे गणपं यजेत् । अंसोरुयुग्मे धर्मादीन् सव्यनाभौ च पार्श्वयोः ॥ अधर्मादीननन्तादीन् हृदि पीठमनु न्यसेत् । आधारशक्तिमारभ्य ज्ञानात्मानमनुक्रमात् ॥ उक्तक्रमेण विन्यस्य हृदये साधु भाविते । नवशक्तिमये रम्ये ध्यायेद्देवमुमापतिम् ॥ चन्द्रकोटिप्रतीकाशं त्रिनेत्रं चन्द्रभूषणम् । आपिङ्गलजटाजूटं रत्नमौलिविराजितम् ॥ भस्मरुद्राक्षबिल्वादिसुभगं सुन्दरेश्वरम् । नीलग्रीवमुदाराङ्गं नानाहारोपशोभितम् ॥ वरदाभयहस्तं च हरिणं च परश्वथम् । दधानं नागवलयं केयूराङ्गदभूषणम् ॥ व्याघ्रचर्मपरीधानं रत्नसिंहासने स्थितम् । सर्वभूतगुहावासं सर्वज्ञं सर्वसाक्षिणम् ॥ सर्वाधिष्ठानमद्वैतं मायया सगुणं पुनः । ध्यात्वा तद्वामभागे च गिरिजां भक्तवत्सलाम् ॥ भास्वज्जपाप्रसूनाभामुदयार्कसमप्रभाम् । विद्युत्पुञ्जनिभां तन्वीं मनोनयननन्दिनीम् ॥ बालेन्दुशेखरां स्निग्धां नीलकुञ्चितकुन्तलाम् । भृङ्गसङ्घातरुचिरनीलालकविराजिताम् ॥ मणिकुण्डलविद्योतन्मुखमण्डलविभ्रमाम् । नवकुङ्कुमपङ्काभां कपोलतलदर्पणाम् ॥ मधुरस्मितविभ्राजदरुणाधरपल्लवाम् । कंबुकण्ठीं शिवामुद्यत्कुचपङ्कजकुद्मलाम् ॥ पाशा-

ङ्कुशाभयाभीष्टविलसन्तीं चतुर्भुजाम्। अनेकरत्नविलसत्कङ्कणाङ्गदमुद्रि-
काम् ॥ वलित्रयेण विलसद्धेमत्काञ्चीगुणान्विताम्। रक्तमाल्यांबर-
धरां दिव्यचन्दनचर्चिताम् ॥ दिक्पालवनितामौलिसन्नतांघ्रिसरो-
रुहाम्। रत्नसिंहासनारूढां सर्वराजपरिच्छदाम् ॥ पञ्चब्रह्मासनासी-
नां परमेशकुटुंबिनीम्। अनेककोटिब्रह्माण्डजननीं शिवसुन्दरीम् ॥
सर्वशक्तिं महेशस्य प्रसन्नां सर्वदेवताम्। सर्वानुल्लंघ्यमुद्रां च सु-
मुखीं सर्वमङ्गलाम् ॥ एवं ध्यात्वा महादेवं देवीं च गिरिजां
शुभाम्। गणेशस्कन्दनद्यादिपरिवारसमन्वितम्। स्वात्मलिङ्गं बाह्य-
लिङ्गे ध्यात्वा वेदान्तलक्षणैः। न्यासक्रमेण संपूज्य देवं गन्धादिभिः
क्रमात् ॥ पञ्चभिर्ब्रह्मभिःकुर्यात् प्रोक्तस्थानेषु वा हृदि। पृथक्पुष्पाञ्जलिं
देहे मूलेन च हृदि त्रयम् ॥ पुनस्स्वयं शिवो भूत्वा मूलमन्त्रेण साधकः।
ततस्संपूजयेद्देवं बाह्यपीठे पुनः क्रमात् ॥ सङ्कल्पं प्रवदेत्तत्र पूजारंभे
समाहितः। कृताञ्जलिपुटो भूत्वा चिन्तयेद्धृदि शङ्करम् ॥ ऋणपातक
दौर्भाग्यदारिद्र्यविनिवृत्तये। अशेषाघविनाशाय प्रसीद मम शङ्कर ॥
दुःखशोकाग्निसन्तप्तं संसारभयपीडितम्। बहुरोगाकुलं दीनं त्राहि
मां वृषवाहन ॥ आगच्छ देवदेवेश महादेवाभयंकर। गृहाण सह
पार्वत्या त्वं च पूजां मया कृताम् ॥ इति सङ्कल्प्य विधिवद्बाह्यपूजां
समाचरेत्। गुहं गणपतिं चैव यजेत्सव्यापसव्ययोः। क्षेत्रेशमीश-
कोणे तु यजेद्वास्तोष्पतिं क्रमात्। वाग्देवीं च यजेत्तत्र ततः कात्या-
यनीं यजेत्॥धर्मं ज्ञानं च वैराग्यमैश्वर्यं च नमोन्तकैः। स्वरैरीशादि-
कोणेषु पीठपादाद्यनुक्रमात् ॥ आभ्यां बिन्दुविसर्गाभ्यां पुमर्थाभ्यां
प्रपूजयेत्। गात्ररूपं चतुर्दिक्षु मध्येऽनन्तं सतारकम् ॥ सत्वादित्रि-
गुणान् तंतुरूपान् पीठेषु विन्यसेत्। अत ऊर्ध्वं छदे माया लक्ष्म्या

दव्या शिवेन च ॥ तदन्ते चांबुजं भूयस्सकलं मण्डलोत्तमम्। पत्र-केसरकिंजल्कव्याप्तं तत्राक्षरैः क्रमात्। आत्मत्रयमथाभ्यर्च्य मध्ये मण्टपमादरात्। वामां ज्येष्ठां च गौरीं च भावार्थे दिक्षु पूजयेत् ॥ वामाद्या नवशक्तीश्च नवस्वरयुता जपेत्। हृदि बीजत्रयाद्यैश्च पीठ-मन्त्रेण चार्चयेत् ॥ आवृत्तिप्रथमाङ्गैस्तु पञ्चभिर्मूर्तिपङ्क्तिभिः। त्रि-शद्भिर्मूर्तिभिश्चान्यैर्निधिद्वयसमन्वितैः ॥ अनन्ताद्यैः परार्थान्यमातृ-भिश्च वृषादिभिः। सिद्धिभिश्चाणिमाद्याभिरिन्द्राद्यैश्च तदायुधैः ॥ वृषभ क्षेत्रचण्डेशदुर्गांश्च स्कन्दनन्दनौ। गणेशसैन्यपौ चैव स्वस्वलक्षण-लक्षितौ ॥ अणिमा महिमा चैव गरिमा लघिमा तथा। ईशत्वं च वशित्वं च प्राप्तिः प्राकाम्यमेव च ॥ अष्टैश्वर्याणि चोक्तानि तेजो-रूपाणि केवलम्। पञ्चभिर्ब्रह्मभिः पूर्वं हृल्लेखाद्यादिभिः क्रमात् ॥ अङ्गैरुमाद्यैरिन्द्राद्यैः पूर्वोक्तैर्मुनिभिस्तुतैः ॥ उमा चण्डेश्वरादींश्च पूजये-दुत्तरादितः। एवमावरणैर्युक्तं तेजोरूपं सदाशिवम् ॥ उमया सहितं देवमुपचारैः प्रपूजयेत्। सुप्रतिष्ठितशङ्खस्य तीर्थैः पञ्चामृतैरपि ॥ अभिषिच्य महादेवं रुद्रसूक्तैस्समाहितः। पञ्चब्रह्मशिरोभिश्च पञ्च-रुद्रैर्यथाविधि॥ कल्पयेद्वैदिकैर्मन्त्रैरासनाद्युपचारकान्। आसनं कल्प-येद्धैमं दिव्यवस्त्रसमन्वितम् ॥ अर्घ्यमष्टगुणोपेतं पाद्यं शुद्धोदकेन च। तेनैवाचमनं दद्यान्मधुपर्कं मधूत्तमम् ॥ पुनराचमनं दत्वा स्नानं मन्त्रैः प्रकल्पयेत्। वसनं चोपवीतं च भूषणानि निवेदयेत् ॥ ततश्च बिल्वमन्दारकल्हारसरसीरुहम्। धुत्तूरं कर्णिकारं च द्रोणपुष्पं च मल्लिकाम् ॥ अपामार्गं च तुलसीं माधवीं चंपकादिकम्। बृहतीं करवीराणि यथालब्धानि भामिनि ॥ निवेदयेत् सुगन्धीनि माल्यानि विविधानि च। धूपं कालागरूत्पन्नं दीपं च विमलं शुभम् ॥ अथ

पायसनैवेद्यं सघृतं सोपदंशकम्। मोदकापूपसंयुक्तं शर्करागुडसंयुतम्।। मधुरान्नं दधियुतं जलपानसमन्वितम्। तेनैव हविषा वह्नौ जुहुयान्मन्त्रभाविते ।। आगमोक्तेन विधिना गुरुवाक्यनियन्त्रितः। नैवेद्यं शंभवे भूयो दत्वा तांबूलमुत्तमम् ।। फलं नीराजनं दिव्यं छत्राद्यं दर्पणादिकम्। समर्पयेच्च विधिवन्मन्त्रैर्वैदिकतान्त्रिकैः ।। यद्यशक्तः स्वयं निःस्वो यथाविभवमर्चयेत्। शक्त्या दत्तेन गौरीशः पुष्पमात्रेण तुष्यति।। अथाङ्गभूतान् सकलान् गणेशादीन् प्रपूजयेत्। स्तवैर्नानाविधैः स्तुत्वा साष्टाङ्गं प्रणमेद्बुधः ।। ततः प्रदक्षिणीकृत्य वृषं गण्डेश्वरादिकम्। पूजां समर्च्य विधिवत् प्रार्थयेद्गिरिजापतिम् ।। जय देव जगन्नाथ जय शङ्कर शाश्वत। जय सर्वसुराराध्य जय सर्वसुरार्चित ।। जय सर्वगुणातीत जय सर्ववरप्रद। जय नित्य निराधार जय विश्वंभराव्यय ।। जय विश्वैकवन्द्येश जय नागेन्द्रभूषण। जय गौरीपते शंभो जय नित्य निरञ्जन ।। जय नाथ कृपासिन्धो जय भक्तार्तिभंजन। जय दुस्तरसंसारसागरोत्तारण प्रभो ।। प्रसीद मे महादेव संसारादतिखिद्यतः। सर्वपापक्षयं कृत्वा रक्ष मां परमेश्वर ।। महादारिद्र्यदग्धस्य महापापहतस्य च। महाशोकनिविष्टस्य महारोगातुरस्य च। ऋणभारपरीतस्य खिद्यमानस्य कर्मभिः। ग्रहैः प्रपीड्यमानस्य प्रसीद मम शङ्कर ।। दरिद्रः प्रार्थयेदेवं पूजान्ते गिरिजापतिम्। अभाग्यो वाऽपि राजा वा प्रार्थयेद्देवमीश्वरम् ।। दीर्घमायुस्सदाऽऽरोग्यं कोशवृद्धिर्बलोन्नतिः। ममास्तु नित्यमानन्दः प्रसादात्तव शङ्कर ।। शत्रवश्च क्षयं यांतु प्रसीदंतु मम प्रजाः। नश्यन्तु दस्यवो राज्ये जनास्सन्तु निरापदः।। दुर्भिक्षमग्निसन्तापश्शमं यान्तु महीतले। सर्वसस्यसमृद्धिश्च भूयस्सुखमया दिशः ।। एवमाराधयेद्देवं प्रदोषे गिरिजापतिम्।

विष्णुब्रह्मादिभिर्देवैः कश्यपाद्यैर्महर्षिभिः ॥ महाप्रदोषसमये नृत्त-गीतादितोषितम् । ब्राह्मणान् भोजयेत् पश्चाद्दक्षिणाभिश्च पूजयेत् ॥ सर्वपापक्षयकरा सर्वदारिद्र्यनाशिनी । शिवपूजेयमाख्याता सर्वाभीष्ट-फलप्रदा ॥ महापातकसङ्घातमधिकं चोपपातकम् । शिवद्रव्यापहर-णात् सर्वमन्यद्विनाशयेत् ॥ ब्रह्महत्यादिपापानां पुराणेषु स्मृतिष्वपि । प्रायश्चित्तानि दृष्टानि न शिवद्रव्यहारिणाम् ॥ शिवो ब्राह्मणवर्गस्य कीर्तितः कुलदैवतम् ॥ प्रदोषसमये यस्माद्विष्णुब्रह्मादयस्सुराः । अर्चयन्ति शिवं तस्माच्छिव एव जगत्पतिः ॥ जिज्ञास्योऽपि च जन्मा-दिश्शास्त्रयोनिस्सदाशिवः । तस्मात् प्रदोषे कर्तव्यमवश्यं शिवपूज-नम् ॥ कामिनां च मुमुक्षूणां भुक्तिमुक्तिप्रदं ध्रुवम् । सद्यस्सिद्धिकरं लोके सर्वपापहरं परम् ॥ बहुनाऽत्र किमुक्तेन लोकार्थेन ब्रवीम्यहम् । ब्रह्महत्याशतं वाऽपि शिवपूजा विनाशयेत् ॥ मया कथितमेतत्ते प्रदोषे शिवपूजनम् । रहस्यं सर्वजन्तूनामत्रास्त्येव न संशयः ॥ एता-भ्यामपि पुत्राभ्यां शिवपूजा विधीयताम् । अतस्संवत्सरादेव परां सिद्धिमवाप्स्यसि ॥ इति शाण्डिल्यवचनमाकर्ण्य द्विजभामिनी । ताभ्यां तु सह बालाभ्यां प्रणनाम मुनेः पदे ॥ स्त्र्युवाच—अहमद्य कृतार्थाऽस्मि तव दर्शनमात्रतः । एतौ कुमारौ भगवन् त्वामेव शरणं गतौ ॥ एष मे तनयो ब्रह्मन् शुचिव्रत इतीरितः । एष राजसुतो नाम्ना धर्मगुप्तः कृतो मया ॥ एतावहं च भगवन् भवच्चरणकिङ्कराः । समुद्धरास्मान् पतितान् घोरे दारिद्र्यसागरे ॥ इति प्रपन्ना शरणं द्विजाङ्गना तस्याथ वाक्यैरमृतोपमानैः । उपादिदेशापि तयोः कुमारयोर्मुनिश्शिवाराधनमन्त्रविद्याम् ॥ अथोपदिष्टौ मुनिना कुमारौ सा ब्राह्मणी शांभवदीक्षिताश्च । शिवप्रसादेन महेशभक्तास्तद्गौरवात्

सर्वजनाभिवन्द्याः ॥ तं प्रणम्य समामन्त्र्य जग्मुस्ते शिवमन्दिरम् । ततः प्रभृति तौ बालौ मुनिवर्योपदेशतः ॥ प्रदोषे पार्वतीशस्य पूजां चक्रतुरञ्जसा । एवं पूजयतोर्देवं द्विजराजकुमारयोः ॥ सुखेनैव व्यतीताय तयोर्मासचतुष्टयम् ॥ कदाचिद्राजपुत्रेण विनाऽसौ द्विजनन्दनः । स्नातुं गतो नदीतीरे चचार बहु लीलया ॥ तत्र निर्झरनिष्पातनिर्भिन्ने च प्रकर्दमे । निधानकलशं स्थूलं प्रस्फुरन्तं ददर्श ह ॥ तं दृष्ट्वा सहसाऽऽगत्य हर्षकौतुकविह्वलः । देवोपपन्नं मन्वानो गृहीत्वा शिरसा दधौ ॥ ससंभ्रमं समानीय निधानकलशं बलात् । निधाय भवनस्यान्तर्मातरं समभाषत ॥ मातर्मातरिमं पश्य प्रसादं गिरिजापतेः । निधानकुंभरूपेण दर्शितं करुणात्मना ॥ अथ सा विस्मिता साध्वी समाहूय नृपात्मजम् । स्वपुत्रं प्रतिनन्द्याह मानयन्ती शिवार्चनम् ॥ शृणुतं मे वचः पुत्रौ निधानकलशीमिमाम् । जीवरत्नसहस्राभ्यां सहस्राब्दोपभोगदाम् ॥ समं विभज्य गृह्णीतं मम शासनगौरवात् । इति मातृवचश्श्रुत्वा तुतोष द्विजनन्दनः ॥ प्रत्याह राजपुत्रस्तां विश्रब्धश्शङ्करार्चने । मातस्तव सुतस्यैव सुकृतेन समागतम् ॥ नाहं गृहीतुमिच्छामि विभक्तं धनसंचयम् । आत्मनस्सुकृतालब्धं स्वयमेव भुनक्त्वसौ ॥ स एव भगवानीशः करिष्यति कृपां मयि ॥ एवमभ्यर्चतोश्शंभुं भूतोऽपि परया मुदा । संवत्सरो व्यतीयाय तस्मिन्नेव गृहे तयोः ॥ अथैकदा राजसूनुस्सह तेन द्विजन्मना । वसन्तसमये प्राप्ते विजहार वनान्तरे ॥ अथ पूजाङ्गतौ क्वापि वने द्विजनृपात्मजौ । गन्धर्वकन्याः क्रीडन्तीश्शतशस्तावपश्यताम् ॥ तास्सर्वाश्चारुसर्वाङ्गीर्विहरन्तीर्मनोहरम् । दृष्ट्वा द्विजात्मजो दूरादुवाच नृपनन्दनम् ॥ इतः परं न गन्तव्यं विहरन्त्यग्रतः स्त्रियः । स्त्रीसन्निधानं विबुधास्त्यजन्ति

विमलाशयाः ॥ एताः कैतवकारिण्यो धनयौवनदुर्मदाः । मोहयन्त्यो जनं दृष्ट्वा वाचानुनयकोविदाः ॥ अतः परित्यजेत् स्त्रीणां सन्निधिं सहभाषणम् । योषितां सङ्गमात्रेण मृत्युमाप्नोति मानवः ॥ निजधर्मरतो विद्वान् ब्रह्मचारी विशेषतः । अतोऽहं नोत्सहे गन्तुं क्रीडास्थानं मृगीदृशाम् ॥ इत्युक्त्वा द्विजपुत्रस्तु निवृत्तो दूरतः स्थितः ॥ अथासौ राजपुत्रस्तु कौतुकाविष्टमानसः । तासां विहारपदवीमेक एवोभयोर्ययौ ॥ तत्र गन्धर्वकन्यानां मध्ये त्वेका वराङ्गना । दृष्ट्वाऽऽयान्तं राजपुत्रं चिन्तयामास चेतसा ॥ अहो कोऽयमुदाराङ्गो युवा सर्वाङ्गसुन्दरः । मत्तमातङ्गगमनो लावण्यामृतवारिधिः ॥ लीलालोलविशालाक्षो मधुरस्मितपेशलः । मदनोपमरूपश्रीस्सुकुमाराङ्गलक्षणैः ॥ इत्याश्चर्ययुता बाला दूराद्दृष्ट्वा नृपात्मजम् । सर्वास्सखीस्समालोक्य वचनं चेदमब्रवीत् ॥ इतोऽप्यदूरे हे सख्यो वनमस्त्येकमुत्तमम् ॥ विचित्रं चंपकाशोकपुन्नागवकुलैर्युतम् ॥ तत्र गत्वा तरून्सर्वानपचित्य सुमोत्करम् । भवत्यः पुनरायान्तु तावत्तिष्ठाम्यहं त्विह ॥ इत्यादिष्टस्सखीवर्गो जगाम विपिनान्तरम् । साऽपि गन्धर्वजा तस्थौ न्यस्तदृष्टिर्नृपात्मजे ॥ तां समालोक्य तन्वङ्गीं नवयौवनशालिनीम् । बालां सुरूपसंपत्त्या परिभूततिलोत्तमाम् ॥ राजपुत्रस्समागत्य कौतुकोत्फुल्ललोचनः । अवाप दैवयोगेन मदनस्य शरव्यथाम् ॥ गन्धर्वतनया साऽपि प्राप्ताय नृपसूनवे । उत्थाय तरसा तस्मै प्रददौ पल्लवासनम् ॥ कृतोपचारमासीनं तदासाद्य सुमध्यमा । पप्रच्छ तद्रूपगुणैर्ध्वस्तधैर्याऽऽकुलेन्द्रिया ॥ कस्त्वं कमलपत्राक्ष कस्माद्देशादिहागतः । कस्य पुत्र इति प्रेम्णा पृष्टस्सर्वं न्यवेदयत् ॥ विदर्भराजतनयं विध्वस्तापितृमातृकम् । शत्रुभिश्च हृतस्थानमात्मानं परया गिरा ॥ सर्वभावेन भूयस्तां पप्रच्छ

नृपनन्दनः । का त्वं वामोरु किञ्चात्र कार्यं ते कस्य चात्मजा ।। किमिव ध्यायसि हृदि किं वा वक्तुमिहेच्छसि । इत्युक्ता सा पुनः प्राह शृणु राजेन्द्रसत्तम ।। आस्ते विद्रविको नाम गन्धर्वाणां कुलाग्रणीः । तस्याहमस्मि तनया नाम्ना चाक्षुसती श्रुता ।। त्वामायान्तं विलोक्याहं त्वत्संभाषणलालसा । त्यक्त्वा सखीजनं सर्वमेकैवास्मि महामते ।। सर्वसङ्गीतविद्यासु न मत्तोऽन्याऽस्ति काचन । मम गानेन तुष्यन्ति सर्वा अपि सुरस्त्रियः ।। साऽहं सर्वकलाभिज्ञा ज्ञातसर्वजनेङ्गिता । तवाहमीप्सितं वेद्मि मयि ते सङ्गतं मनः । तथा ममापि ते सौख्यं दैवेन प्रतिपादितम् । आवयोः स्नेहभेदोऽत्र नैव भूयादितः परम् ।। इति संभाष्य तेनाशु प्रेम्णा गन्धर्वकन्यका । मुक्ताहारं ददौ तस्मै स्वकुचान्तरभूषणम् ।। तदादायाद्भुतं हारं स तस्याः परमाकुलः । गूढहर्षपरासक्तमिदमाह नृपात्मजः । सत्यमुक्तं त्वया भीरु तथाऽप्येकं वदाम्यहम् । त्यक्तराज्यस्य निस्स्वस्य कथं मे भवसि प्रिया ।। या त्वं पितृमती बाला बिलंघ्य पितृशासनम् । स्वच्छन्दाचरणं कर्तुं मूले त्वं कथमर्हसि ।। इति तस्य वचश्श्रुत्वा तं प्रत्याह शुचिस्मिता । अस्तु नाम तथैवाहं करिष्ये वश्यकौतुकम् ।। गच्छस्व भवनं कान्त परश्वः प्रातरेव तु । आगच्छ पुनरत्रैव कार्यमस्ति च नो मृषा ।। इत्युक्त्वा तं नृपं कान्तं सा सङ्गतसखीजना । अपाक्रामत चार्वङ्गी स चापि नृपनन्दनः ।। स समभ्येत्य हर्षेण द्विजपुत्रस्य सन्निधिम् । सर्वमाख्याय तेनैव सार्धं स्वभवनं ययौ ।। तां च विप्रसतीं भूयो हर्षयित्वा नृपात्मजः । परश्वो द्विजपुत्रेण सार्धं तस्मिन् वने ययौ ।। स तथा पूर्वनिर्दिष्टं स्थानं प्राप्य नृपात्मजः । गन्धर्वराजमद्राक्षीद्दुहित्रा च समन्वितम् ।। स गन्धर्वपतिः प्राप्तावभिनन्द्य कुमारकौ । उपवेश्या-

सने रम्ये राजपुत्रमभाषत ॥ गन्धर्व उवाच—राजेन्द्रपुत्र पूर्वेद्युः कैलासं गतवानहम् । तत्रापश्यं महादेवं पार्वत्या सहितं विभुम् ॥ आहूय मां स देवेशस्सर्वेषां त्रिदिवौकसाम् । सन्निधावाह भगवान् करुणामृतवारिधिः ॥ धर्मगुप्ताह्वयः कश्चिद्राजपुत्रोऽस्ति भूतले । अकिञ्चनो भ्रष्टराज्यो हतबन्धुश्च शत्रुभिः ॥ स बालो गुरुवाक्येन मदर्चायां रतस्सदा । अद्य तत्पितरस्सर्वे मां प्राप्तास्तत्प्रभावतः ॥ तस्य त्वमपि साहाय्यं कुरु गन्धर्वसत्तम। यथा स निजराज्यस्थो हतशत्रुर्भविष्यति ॥ इत्याज्ञप्तोऽहमीशेन संप्राप्य निजमन्दिरम् । अनयाऽद्य दुहित्रा च बहुशोऽभ्यर्थितस्तथा ॥ ज्ञात्वेमं सकलं शंभोर्नियोगं करुणात्मनः । आदायेमां दुहितरं प्राप्तोऽस्मीदं वनान्तरम् ॥ अत एनां प्रयच्छामि कन्यामंशुमतीं तव । हत्वा शत्रून् स्वराष्ट्रे त्वां स्थापयामि शिवाज्ञया ॥ तस्मिन्पुरे त्वमनया भुक्त्वा भोगान् यथोचितान्। दशवर्षसहस्रान्ते गन्तासि गिरिशालयम् ॥ तत्रापि मम कन्येयं त्वामेव प्रतिपत्स्यते । अनेनैव स्वदेहेन दिव्येन शिवसन्निधौ ॥ इति गन्धर्वराजस्तमाभाष्य नृपनन्दनम्। तस्मिन्वने स्वदुहितुःपाणिग्राहमकारयत्॥ पारिबर्हमदात्तस्मै रत्नभारान् महोज्ज्वलान् । चूडामणिं चन्द्रनिभं मुक्ताहारांश्च भासुरान् ॥ दिव्यालङ्कारवासांसि कार्तस्वरपरिच्छदान्॥ गजानामयुतं भूयो नियुतं नीलवाजिनाम् ॥ स्यन्दनानां सहस्राणि सौवर्णानां महान्ति च । पुनरेकं रथं दिव्यं धनुश्चक्रायुधोत्तमम् ॥ मन्त्रास्त्राणां सहस्राणि तूणौ चाक्षयसायकौ। अभेद्यां सर्वजंतूनां शक्तिं च रिपुमर्दिनीम् ॥ दुहितुः परिचर्यार्थं दासीनां च सहस्रकम् । ददौ प्रीतमनास्तस्मै धनानि विविधानि च ॥ गन्धर्वसैन्यमत्युग्रं चतुरङ्गसमन्वितम् । पुनश्च तत्सहायार्थं गन्धर्वाधिपतिर्ददौ ॥ इत्थं राजेन्द्र-

तनयस्संप्राप्य श्रियमुत्तमाम् । अभीष्टजायासहितो मुमुदे निजसंपदा ॥ कारयित्वा स्वदुहितुर्विवाहं समयोचितम् । ययौ विमानमारुह्य गन्धर्वाधिपतिर्दिवम् ॥ धर्मगुप्तः कृतोद्वाहस्सह गन्धर्वसेनया । निश्शेषिताऽरातिबलः प्रविवेश निजं पुरम् ॥ ततोऽभिषिक्तस्सचिवैर्ब्राह्मणैश्च महोत्तमैः । रत्नसिह्मासनारूढश्चक्रे राज्यमकण्टकम् ॥ या विप्रवनिता पूर्वं तं पुपोषात्मपुत्रवत् । सैव माताऽभवत्तस्य स भ्राता द्विजनन्दनः ॥ गन्धर्वतनया जाया विदर्भविषयेश्वरः । आराध्य देवं गिरिशं धर्मगुप्तो नृपोऽभवत् ॥ एवमन्ये समाराध्य प्रदोषे गिरिजापतिम् । लेभिरेऽभीप्सितान् कामान् देहान्ते तु पराङ्गतिम् ॥ सूत उवाच—एतन्महाव्रतं पुण्यं प्रदोषे शङ्करार्चनम् । धर्मार्थकाममोक्षाणां यदेतत्साधनं परम् ॥ ज्ञानार्थमृषयः प्राज्ञा धनार्थं च धनार्थिनः । जयाधिकारसिद्ध्यर्थमिन्द्रोपेन्द्रपुरोगमाः ॥ विद्यार्थिनोऽपि विद्यार्थं सुतार्थं पुत्रकांक्षिणः । आरोग्यार्थं च रोगार्ताश्चक्रुरेतद्व्रतोत्तमम् ॥ ब्राह्मणानामिदं मुख्यं विशेषात्कलितारकम् । य एतच्छृणुयान्नित्यमाख्यानं परमाद्भुतम् ॥ प्रदोषे शिवपूजान्ते कथयेद्वा समाहितः । न भवेत्तस्य दारिद्र्यं जन्मातरशतेष्वपि । ज्ञानैश्वर्यसमायुक्तस्सोऽन्ते शिवपुरं व्रजेत् ॥ ये प्राप्य दुर्लभमिदं मनुजाश्शरीरं कुर्वन्त्यहोऽत्र परमेश्वरपादपूजाम् । धन्यास्त एव निजपुण्यजितत्रिलोकास्तेषां पदांबुजरजो भुवनं पुनाति ॥

इति श्रीस्कन्दपुराणे सोद्यापनपक्षप्रदोषव्रतकथा ॥

॥ श्रीरस्तु ॥

॥ अथ महाशिवरात्रिव्रतम् ॥

तत्र अर्धरात्रव्यापिन्यां कार्यम् । तदुक्तं नारदसंहितायां—

अर्धरात्रयुता यत्र माघकृष्णचतुर्दशी ।
शिवरात्रिव्रतं तत्र सोऽश्वमेधफलं लभेत् ॥

अर्धरात्रिव्याप्तिः=निशीथव्याप्तिः, निशीथस्तु रात्रेरष्टमो मुहूर्तः, परत्रैव तथात्वे परत्र । पूर्वत्रैव तथात्वे पूर्वत्र । दिनद्वयेऽपि तथात्वाभावे परा । उभयत्र कार्त्स्न्येन एकादशेन वा तद्व्याप्तौ परा । एकत्रैकदेशेन परत्र कार्त्स्न्येन व्याप्तौ यत्र कृत्स्नव्याप्तिस्तत्र इति ॥

अनुज्ञा—अशेषे…स्वीकृत्य मम जन्माभ्यासादित्यादि…समस्तपापक्षयार्थं अक्षय्यभोगमोक्षप्राप्त्यर्थं च शिवरात्रिव्रतारंभं कर्तुं… गृहाण । विघ्नेश्वरपूजा । महाशिवरात्रिव्रतारंभकर्म करिष्ये । विघ्नेश्वरमुद्वास्य, ग्रहप्रीतिं कृत्वा ॥ महाशिवरात्रिपुण्यकाले उमामहेश्वरपूजां करिष्ये । इति सङ्कल्प्य । कलशपूजां कृत्वा । पूजोपकरणानि प्रोक्ष्य । वैदिकमन्त्रैः कल्पोक्तप्रकारेण वा उमामहेश्वरं षोडशोपचारैस्संपूज्य ॥ अन्ते अर्घ्यप्रदानं च कुर्यात् ॥

एवमेव मासि मासि कृष्णचतुर्दश्यां कार्यम् ॥

अथ शिवरात्रिव्रतोद्यापनविधिः ॥

अनुज्ञा—अशेषे…स्वीकृत्य मम जन्माभ्यासादित्यादि मया आचरितस्य महाशिवरात्रिव्रतस्य उद्यापनकर्मणः कल्पोक्तसाङ्गफल-

सिद्ध्यर्थं आचार्यमुखेन ऋत्विङ्मुखेन च महाशिवरात्रिव्रतोद्यापनकर्म कर्तुं योग्यतासिद्धिमनुगृहाण ॥ विघ्नेश्वरपूजा । अभ्युदयं पुण्याहं च कृत्वा अनुज्ञावत्संकल्पः ॥ महाशिवरात्रिव्रतोद्यापनकर्म करिष्ये। ग्रहप्रीतिं कृत्वा। आचार्यादिवरणं कुर्यात्। अस्मिन् महाशिवरात्रिव्रतोद्यापनकर्मणि सकलकर्म कर्तुं उमामहेश्वरप्रतिमापूजार्थं च आचार्यं त्वां वृणे ॥

अजैकपादहिर्बुध्न्यो भवश्शर्व उमापतिः ।
रुद्रः पशुपतिश्शंभुर्वरदश्शिव ईश्वरः ।
महादेवो हरो भीमो नामान्येवं चतुर्दश ॥

एवमेतैर्नामभिः ऋत्विजो वृत्वा । अनन्तरं शिवपूजार्थं एकं ब्राह्मणं वृणुयात् ॥

अथ षोडशस्तंभनिर्मितमण्डपे स्थण्डिलं कल्पयित्वा मध्ये उमामहेश्वरकुंभं प्रतिष्ठाप्य परितः चतुर्दशसंख्याकान् कुंभान् प्रतिष्ठाप्य, मण्टपादिसर्वोपकरणशुद्ध्यर्थं पुण्याहं कृत्वा। सर्वोपकरणानि प्रोक्ष्य। पञ्चगव्येन प्रतिमाशुद्धिं कृत्वा कुंभानामुपरि प्रतिमाः प्रतिष्ठाप्य वस्त्रेणालंकृत्य, ऋत्विग्भिस्सह आचार्यः तत्तत्प्रतिमापूजां करिष्य इति सङ्कल्प्य कलशपूजां कृत्वा पूजोपकरणानि प्रोक्ष्य कुंभं स्पृष्ट्वा जपेयुः ॥ आपो वा इदमित्यादि। कुंभेषु वरुणमावाहयेत् ॥

अथ ध्यानम् ॥

चन्द्रकोटिप्रतीकाशं त्रिनेत्रं चन्द्रभूषणम् ।
आपिङ्गलजटाजूटं रत्नमौलिविराजितम् ॥

नीलग्रीवमुदाराङ्गं तारहारोपशोभितम् ।
वरदाभयहस्तं च हरिणं च परश्वथम् ॥
दधानं नागवलयं केयूराङ्गदमुद्रकम् ।
व्याघ्रचर्मपरीधानं रत्नसिंहासनस्थितम् ॥ इति ध्यात्वा ॥
आगच्छ देवदेवेश मर्त्यलोकहितेच्छया ।
पूजयामि विधानेन प्रसन्नस्सुमुखो भव ॥

त्र्यंबकं यजामहे, गौरीमिमाय, प्रतिमायां उमामहेश्वरं आवाहयामि ॥ इति मध्ये ॥ परितः प्रागादिक्रमेण अजैकपादादीनावाह्य । प्राणप्रतिष्ठां कुर्यात् ।

पादासनं कुरु प्राज्ञ निर्मलं स्वर्णनिर्मितम् ।
भूषितं विविधै रत्नैः कुरु त्वं पादुकासनम् ॥
उमामहेश्वराय नमः आसनं समर्पयामि ॥

गङ्गादिसर्वतीर्थेभ्यो मया प्रार्थनयाऽऽहृतम् ।
तोयनेतत् सुखस्वर्गं पाद्यार्थं प्रतिगृह्यताम् ॥
उमामहेश्वराय नमः पाद्यं समर्पयामि ॥

गन्धोदकेन पुष्पेण चन्दनेन सुगन्धिना ।
अर्घ्यं गृहाण देवेश भक्तिं मे ह्यचलां कुरु ॥
उमामहेश्वराय नमः अर्घ्यं समर्पयामि ॥

कर्पूरोशीरसुरभिशीतलं विमलं जलम् ।
गङ्गायास्तु समानीतं गृहाणाचमनीयकम् ॥
उमामहेश्वराय नमः आचमनीयं समर्पयामि ॥

रसोऽसि रसवर्गेषु सुखरूपोऽसि शङ्कर ।
मधुपर्कं जगन्नाथ दास्ये तुभ्यं महेश्वर ॥

उमामहेश्वराय नमः मधुपर्कं समर्पयामि ॥

पयो दधि घृतं चैव मधुशर्करया समम् ।
पञ्चामृतेन स्नपनं कारये त्वां जगत्पते ॥

उमामहेश्वराय नमः पञ्चामृतस्नानं समर्पयामि॥

मन्दाकिन्यास्समानीतं हेमांभोरुहवासितम् ।
स्नानाय ते मया भक्त्या नीरं स्वीक्रियतां विभो ॥

उमामहेश्वराय नमः शुद्धोदकस्नानम् ॥
स्नानानन्तरमाचमनीयं समर्पयामि ॥

वस्त्रं सूक्ष्मं दुकूलं च देवानामपि दुर्लभम् ।
गृहाण त्वमुमाकान्त प्रसन्नो भव सर्वदा ॥

उमामहेश्वराय नमः वस्त्रयुग्मं समर्पयामि ॥

यज्ञोपवीतं सहजं ब्रह्मणा निर्मितं पुरा ।
आयुष्यं भव वर्चस्यमुपवीतं गृहाण भो ॥

उमामहेश्वराय नमः उपवीतं समर्पयामि ॥

श्रीखण्डं चन्दनं दिव्यं गन्धाढ्यं सुमनोहरम् ।
विलेपनं सुरश्रेष्ठ मद्दत्तं प्रतिगृह्यताम् ॥

उमामहेश्वराय नमः गन्धान् समर्पयामि ॥

अक्षतांश्चन्द्रवर्णाभान् शालेयान् सतिलान् शुभान् ।

अलङ्कारार्थमानीतान् धारयस्व महाप्रभो ॥

उमामहेश्वराय नमः अक्षतान् समर्पयामि ॥

माल्यादीनि सुगन्धीनि मालत्यादीनि वै प्रभो ।

मयाऽऽहृतानि पुष्पाणि पूजार्थं तव शङ्कर ॥

उमामहेश्वराय नमः पुष्पमालां समर्पयामि ॥

॥ अथांगपूजा ॥

शिवाय नमः पादौ पूजयामि

शर्वाय नमः गुल्फौ ,,

रुद्राय नमः जानुनी ,,

ईशानाय नमः जङ्घे ,,

परमात्मने नमः ऊरू ,,

हराय नमः जघनं ,,

ईश्वराय नमः गुह्यं ,,

स्वर्णरेतसे नमः कटिं ,,

महेश्वराय नमः नाभिं ,,

परमेश्वराय नमः उदरं ,,

स्फटिकाभरणाय नमः वक्षःस्थलं

त्रिपुरहन्त्रे नमः बाहून् पूजयामि

सर्वास्त्रधारिणे नमः हस्तान् ,,

नीलकण्ठाय नमः कण्ठं ,,

वाचस्पतये नमः मुखं ,,

त्र्यंबकाय नमः नेत्राणि ,,

फालचन्द्राय नमः ललाटं ,,

गङ्गाधराय नमः जटामण्डलं ,,

सदाशिवाय नमः शिरः ,,

सर्वेश्वराय नमः सर्वाण्यङ्गानि पूजयामि ॥

* अथ अष्टोत्तरशतनामावलिः ॥

उमामहेश्वराय नमः नानाविधपत्रपुष्पाणि समर्पयामि ॥

---

* शिवाष्टोत्तरशतनामावलिः प्रदोषव्रते द्रष्टव्या ॥

वनस्पतिरसोद्भूतो गन्धाढ्यश्च मनोहरः ।
आघ्रेयस्सर्वदेवानां धूपोऽयं प्रतिगृह्यताम् ॥

उमामहेश्वराय नमः धूपं आघ्रापयामि ॥

साज्यं त्रिवर्तिसंयुक्तं वह्निना योजितं मया ।
दीपं गृहाण देवेश त्रैलोक्यतिमिरापहन् ॥

उमामहेश्वराय नमः दीपं दर्शयामि ॥

नैवेद्यम् ॥ भूर्भुवस्सुवः...ब्रह्मणे स्वाहा ॥

नैवेद्यं गृह्यतां देव भक्तिं मेऽह्यचलां कुरु ।
शिवेप्सितं वरं देहि परत्र च परां गतिम् ॥

उमामहेश्वराय नमः नैवेद्यं निवेदयामि ॥

अमृतापिधानमसि ॥ निवेदनानन्तरमाचमनीयं समर्पयामि ॥

पूगीफलेति तांबूलम् ॥

चक्षुर्दं सर्वलोकानां तिमिरस्य निवारणम् ।
आर्तिक्यं कल्पितं भक्त्या गृहाण परमेश्वर ॥

नीराजनम् ॥ नीराजनानन्तरमाचमनीयं समर्पयामि ॥

यानि कानि च पापानि ब्रह्महत्यासमानि च ।
तानि तानि विनश्यन्ति प्रदक्षिणपदेपदे ॥

उमामहेश्वराय नमः प्रदक्षिणानि समर्पयामि ॥

नीलकण्ठ विरूपाक्ष वामार्धगिरिजाप्रभो ।
पुष्पाञ्जलिं प्रदास्यामि गृहाण करुणानिधे ॥

उमामहेश्वराय नमः मन्त्रपुष्पम् ॥ सुवर्णपुष्पं समर्पयामि ॥

मन्त्रहीनं क्रियाहीनं भक्तिहीनं सुरेश्वर ।
यत्पूजितं मया देव परिपूर्णं तदस्तु ते ॥

उमामहेश्वराय नमः प्रार्थना ॥

वन्दे शंभुमुमापतिं...शङ्करम् । नमश्शिवाय सांबाय...नमो नमः ॥ नमश्शिवाभ्यां...भ्यां । प्रीत्यर्थं मया आचरितशिवरात्रव्रतस्य उद्यापनकर्मणि प्रथमयामपूजान्ते क्षीरार्घ्यप्रदानं उपायनदानं च करिष्ये ॥

प्रथमयामे अर्घ्यश्लोकः ॥

नमो विश्वस्वरूपाय विश्वसृष्ट्यादिकारक ।
गङ्गाधर नमस्तुभ्यं गृहाणार्घ्यं मयार्पितम् ॥
उमामहेश्वराभ्यां नमः इदमर्घ्यं ॥ इति त्रिः ॥

द्वितीययामे अर्घ्यश्लोकः ॥

नमश्शिवाय शान्ताय सर्वपापहराय च ।
शिवरात्रौ मया दत्तं गृहाणार्घ्यं प्रसीद मे ॥इदमर्घ्यं ॥

तृतीययामे अर्घ्यश्लोकः ॥

दुःखदारिद्र्यभावैश्च दग्धोऽहं पार्वतीपते ।
मां वै त्राहि महाबाहो गृहाणार्घ्यं नमोऽस्तु ते ॥ इदमर्घ्यं ॥

चतुर्थयामे अर्घ्यश्लोकः ॥

शिवाय शिवरूपाय भक्तानां शिवदायक ।
इदमर्घ्यं प्रदास्यामि प्रसन्नो भव सर्वदा ॥ इदमर्घ्यं ॥

अंबिकायै । सुब्रह्मण्याय । नन्दिकेशाय । चण्डिकेश्वराय । अनेनार्घ्यप्रदानेन सांबपरमेश्वरः प्रीयताम् ॥

अथ द्वितीययामपूजां करिष्ये। इति सङ्कल्प्य। आसनादि षोडशोपचारान् कृत्वा। अर्घ्यप्रदानम्। नमश्शिवाय शान्ताय... प्रसीद मे। उमा...मर्घ्यम्। अंबिकायै इत्यादिसमानं॥ एवं तृतीययामान्ते दुःखदारिद्र्यभावैश्च...नमोऽस्तु ते। उमा...मर्घ्यम्। एवं तुरीययामपूजान्ते। शिवाय शिवरूपाय...सर्वदा। उमा...मर्घ्यम्। अंबिकायै इत्यादिसमानम्॥

कथाश्रवणपूर्वकं जागरणं कृत्वा। प्रभाते नित्यकर्माणि परिसमाप्य। आचार्यस्स्वगृह्योक्तविधानेन मुखान्तं कृत्वा ऋत्विग्भिस्सह त्र्यंबकमिति मन्त्रेण समिदन्नाज्यैरष्टोत्तरशतं हुत्वा। स्विष्टकृदादिहोमशेषं पुनःपूजांकृत्वा, यज्ञेन यज्ञमिति कुम्भानुद्वास्य, आपोहिष्ठादिमन्त्रैः कर्तारमभिषिञ्चेत्। कर्ता शुक्लवस्त्रं परिधाय कुलाचारपुण्ड्रं धृत्वा कलशवस्त्रप्रतिमादानानि कृत्वा कर्मसाद्गुण्यार्थं दशदानषड्दानयथासंभवदानानि कृत्वा दंपतिपूजां कृत्वा फलदानं तांबूलदानं च कुर्यात्॥ आशीर्वादः॥

व्रतमेतत्कृतं यन्मे पूर्णं वाऽपूर्णमेव च।
सर्वं संपूर्णतां यातु प्रसादाद्भवतां मम॥

इति संप्रार्थ्य तान्विप्रान् प्रणम्य च पुनः पुनः।
ततश्च स्वजनैस्साधं स्वयं भुञ्जीत सुव्रती॥

एवं कृते तारकजिच्छिवरात्रिव्रते नरैः।
सर्वपापक्षयद्वारा शिवलोकश्च सिद्ध्यति॥

उद्यापनविहीनस्य न तादृक्फलसंभवः॥

अकामेन कृतस्यास्य नह्युद्यापनमुच्यते।
सन्ध्याग्निहोत्रवन्नित्यं शिवरात्रिव्रतं स्मृतम्॥

इति श्रीस्कन्दपुराणोक्तशिवरात्रिव्रतोद्यापनम्॥

शिवरात्रिव्रतकथा ॥

सूत उवाच—सकारणमशेषस्य जगतस्सर्वदा शिवः। गोब्राह्मणनृपाणाञ्च शिवं भवतु मे सदा॥ कैलासशिखरासीनं देवदेवं जगद्गुरुम्। पञ्चवक्त्रं चतुर्बाहुं त्रिनेत्रं शूलपाणिनम्॥ पिनाकशोभितकरं खड्गखेटकधारिणम्। कपालखट्वाङ्गधरं नीलकण्ठं सुशोभितम्॥ भस्माङ्गव्यालशोभाढ्यमस्थिमालाविभूषितम्। नीलजीमूतसङ्काशं सूर्यकोटिसमप्रभम्॥ क्रीडन्तं च शिवं तत्र गणैश्च परिवारितम्। विसृज्य देवतास्सर्वास्तिष्ठन्तं परमेश्वरम्॥ तं दृष्ट्वा देवदेवेशं प्रहासोत्फुल्ललोचनम्। पार्वती परिप्रपच्छ विनयावनता स्थिता॥ गौरी प्रोवाच भर्तारं विस्मयोत्फुल्ललोचना॥ पार्वत्युवाच—कथयस्व प्रसादेन यद्गोप्यं व्रतमुत्तमम्। श्रुतास्त्वयोक्ता देवेश व्रतानां निर्णयाश्शुभाः॥ तथा वै दानधर्माश्च तीर्थधर्मास्त्वयोदिताः। नास्ति मे निश्चयो देव भ्रान्तोऽहं च पुनः पुनः॥ तस्माद्वदस्व मे देवं एकं निस्संशयं प्रभो। व्रतानामुत्तमं देव भुक्तिमुक्तिप्रदायकम्॥ तदहं श्रोतुमिच्छामि कथयस्व मम प्रभो॥ ईश्वर उवाच—शृणु देवि परं गुह्यं व्रतानामुत्तमं व्रतम्। यन्न कस्यचिदाख्यातं रहस्यं मुक्तिदायकम्॥ येनैव कथ्यमानेन यमो विलयतां व्रजेत्। तदहं कथयिष्यामि शृणुष्वैकमनाः प्रिये॥ माघमासे कृष्णपक्षे ह्यमायुक्ता चतुर्दशी। शिवरात्रिस्तु सा ज्ञेया सर्वयज्ञोत्तमोत्तमा। दानैर्यज्ञैस्तपोभिश्च व्रतैश्च विविधैरपि॥ न तीर्थैस्तद्भवेत्पुण्यं शिवरात्रिव्रतं परम्। शिवरात्रिसमं नास्ति व्रतानामुत्तमं व्रतम्॥ अज्ञानात् ज्ञानतो वाऽपि कृत्वा मोक्षमवाप्नुयात्। मृतास्ते निरयं त्यक्त्वा गतास्ते शिवसन्निधौ॥ सर्वमङ्गलशीला च

सर्वामङ्गलनाशिनी। भुक्तिमुक्तिप्रदा चैषा सत्यं सत्यं वरानने। देव्युवाच—कथं यमपुरं त्यक्त्वा शिवलोकं व्रजेन्नरः। एतन्मे महदाश्चर्यं प्रत्यक्षं कुरु शङ्कर॥ शङ्करः—शृणु देवि यथावृत्तां कथां पौराणिकीं शुभाम्। यमशासनहन्त्रीं च शिवस्थानप्रदायिनीम्॥ कश्चिदासीत्पुरा देवि निषादो जीवघातुकः। प्रत्यन्तदेशवासी च भूधरान्तर्निकेतनः॥ सीमान्ते स सदा तिष्ठन् कुटुंबपरिपालकः। शूरो नित्यं धनुर्धारी श्यामाङ्गः कृष्णकञ्चुकः॥ बद्धगोधाङ्गुलित्राणस्सदैव मृगयारतः॥ एवंविधो निषादोऽसौ चतुर्दश्यां दिने शुभे। वणिग्भ्यो देयरिक्थार्थं देवागारे प्ररोधितः॥ तेनापि देवता दृष्टा जनानां वचनं श्रुतम्। उपवासव्रतानां च शिवशिव शिवेति च॥ दिनान्ते तैस्तदा मुक्तः प्रातर्द्रव्यं प्रदीयताम्। ततोऽसौ धनुरादाय दक्षिणेन गतस्स्वयम्॥ आगच्छन् स वनोद्देशे जनहासं चकार ह। शिवशिवः किमेतत्ते कुर्वन्ति नगरे जनाः॥ वनेचरान्निरीक्षंस्तु चतुर्दिक्षु इतस्ततः। पदञ्च मृगमार्गेष्वान्विष्यत् सूकरान् मृगान्॥ इतश्चेतश्च धावन्वै आमिषे लुब्धमानसः। वनं च पर्वतान् सर्वान् भ्रमित्वा गिरिकन्दरान्॥ संप्राप्तोऽनेन नो किञ्चित् मृगस्सूकरतः फलम्। निराशो लुब्धकस्तिष्ठन् तदा ह्यस्तङ्गतो रविः॥ चिन्तयित्वा जलोपान्ते जागरं जीवघातनम्। संविधास्याम्यहोरात्रे निश्चितं मम जीवनम्॥ गतोऽसौ जलसामीप्यं तीरस्थोजालिमद्ध्यगः। आश्रमं कर्तुमारेभ आत्मनोऽसुतिकारणात्॥ जालिमद्ध्ये महालिङ्गं स्थितं स्वायंभुवं शुभम्। बिल्ववृक्षो महान् दिव्यो जालिमद्ध्ये च संस्थितः॥ गृहीत्वा तस्य पर्णानि मार्गशुद्ध्यर्थमक्षिपत्। क्षिप्तानि दक्षिणे भागे निपेतुर्लिङ्गमूर्द्धनि॥ न दिवा भोजनं तस्य आमिषे लुब्धचेतसः। ततश्चिन्तयमानस्य न निद्रा समजायत॥

बिल्वमध्ये गतस्यास्य प्रथमः प्रहरो गतः। ततो जलार्थमायाता हरिणी गर्भसंयुता ॥ यौवनस्था सुरूपा च स्तनपीना सुशोभना। निरीक्षन्ती दिशस्सर्वा भृशमुत्फुल्ललोचना ॥ लुब्धकेनापि सा दृष्टा बाणगोचरमागता। बाणश्च सन्धितस्तेन एकहृष्टेन चेतसा ॥ त्रोटयित्वाऽथ पत्राणि प्रक्षिप्तानि शिवोपरि। शिवं देवं सदा ध्यायन् शीतेन परिपीडितः ॥ एतस्मिन्नन्तरे दृष्टो हरिण्या लुब्धकस्तथा। लुब्धकस्तु स्वरूपेण कृतान्त एव दृश्यते ॥ दृष्ट्वा तु तस्य सन्धानं यमदंष्ट्रासमप्रभम्। सा मृगी दिव्यया वाचा लुब्धकं वाक्यमब्रवीत् ॥ मृग्युवाच—स्थिरो भव महाव्याध सर्वजीवनिकृन्तन। कथयस्व महाबाहो किमर्थं मां हनिष्यसि ॥ लुब्धक उवाच—कुटुंबं पीडितं मेऽद्य क्षुधया च मया सह। पोषयामि सदैवाहमामिषाहारभोजनैः ॥ धनं वै मद्गृहे नास्ति तेन त्वां हन्मि शोभने ॥ शङ्करः—यामपूजाप्रभावेन जागरोपोषणेन च। चतुर्थांशेन पापानां विमुक्तो लुब्धकस्तदा ॥ लुब्धकस्तु ततो दृष्ट्वा मृगीं मानुषभाषिणीम्। आश्चर्यं परमं गत्वा किञ्चिद्धर्मसमन्वितः ॥ लुब्धक उवाच—मया हि घातिता जीवा उत्तमाधममध्यमाः। ईदृशी न श्रुता वाणी श्वापदानां कथंचन ॥ कस्मिन् देशे त्वमुत्पन्ना कस्मात् स्थानादिहागता। कथयस्व प्रयत्नेन परं कौतूहलं हि मे ॥ मृग्युवाच—शृणु त्वं लुब्धकश्रेष्ठ कथयामि तवाखिलम्। आसं पूर्वमहं रम्या स्वर्गे शक्रस्य चाप्सराः ॥ अनन्तरूपलावण्या सौभाग्येन च गर्विता ॥ सौभाग्यमदपुष्टाङ्गो दानवो बलगर्वितः। मयैव च कृतो भर्ता हिरण्याक्षो महासुरः ॥ तेन सार्थं मया भुक्तं चिरकालं यथेप्सितम्। एवं कालो गतो व्याध क्रीडन्त्या मेऽसुरेण च ॥ एकदा प्रेक्षितुं नृत्यं शङ्करस्यागता तदा। याव-

द्गच्छाम्यहं तत्र तावन्मां शङ्करोऽब्रवीत् ॥ क गता त्वं वरारोहे केन वा सङ्गता शुभे । किं वा सौभाग्यगर्वेण नायाता मम मन्दिरम्॥ सत्यं कथय शीघ्रं त्वं नो वा शापं ददामि ते । शापभीत्या मया तत्र इत्युक्तं शङ्कराग्रतः ॥ शृणु देव प्रवक्ष्यामि शापानुग्रहकारक । ममास्ति भर्ता विश्वेश दानवेन्द्रो महाबलः ॥ तेन सार्धं मया देव क्रीडितं निज-मन्दिरे । तेनाहं नागता शीघ्रं सृष्टिसंहारकारक ॥ रुद्रस्तद्वचनं श्रुत्वा सकोपो वाक्यमब्रवीत् ॥ मृगः कामातुरो नित्यं हिरण्याक्षो भविष्यति। त्वं मृगी तस्य भार्या वै भविष्यसि न संशयः ॥ त्यक्त्वा स्वर्गं तथा देवान् दानवं भोक्तुमर्हसि । द्वादशाब्दानि भो भद्र भविता शाप एव ते ॥ परस्परस्य शोकेन शापान्तोऽपि भविष्यति । अनुग्रहःपुनस्त्वेष शङ्करेण कृतस्स्वयम् ॥ कदाचिद्धि व्याधवरो मम सान्निध्यमाश्रितः । वधार्थं तस्य संप्राप्तः पूर्वजन्म स्मरिष्यसि॥ तत ऊर्ध्वं तदा रुद्रं दृष्ट्वा मोक्षमवाप्स्यसि । शङ्करो न मया दृष्टो वसन्त्याऽस्मिन् महावने । ततो दुःखमनुप्राप्ता मांसमेदोविवर्जिता ॥ गर्भाक्रान्ता विशेषेण न वध्या चेति निर्मितम् । त्वत्कुटुंबस्य ते नूनं भोजनं न भविष्यति ॥ आयास्यति मृगी त्वन्या मार्गेणानेन लुब्धक । पीना यौवनसंपन्ना बहुमांसा मदोद्धता॥ भोजनं सकुटुंबस्य तव सद्यो भविष्यति । अथ-वाऽन्या मृगी व्याध पानार्थं तु जलाशये । आगमिष्यति प्रत्यूषे क्षुधार्तस्य न संशयः ॥ गर्भं त्यक्त्वा पुनः प्रातर्बालान् सन्दिश्य बन्धुषु । शपथैरागमिष्यामि सन्दिश्य च सखीजनम् ॥ तस्यास्तद्वचनं श्रुत्वा व्याधो विस्मयमागतः । क्षणमेकं तथा स्थित्वा व्याधो वचनमब्रवीत् ॥ नागमिष्यति चेदन्यो जीवंस्त्वमपि गच्छसि । क्षुधया पीडितोऽहं वै कुटुंबश्च विशेषतः ॥ प्रातस्त्वया मम गृहमागन्तव्यं यथातथम् ।

शपथैश्च व्रज त्वं हि यथा मे प्रत्ययो भवेत् ॥ पृथिवीवायुरादित्यस्सत्ये तिष्ठन्ति देवताः । तस्मात्सत्येन गन्तव्यं भवत्या स्वगृहं प्रति ॥ तस्य तद्वचनं श्रुत्वा गर्भात्मा सा मृगी तदा । चक्रे सत्यप्रतिज्ञां वै व्याधस्याग्रे पुनःपुनः ॥ मृग्युवाच—द्विजो भूत्वा तु यो व्याध वेदभ्रष्टोऽभिजायते । स्वाध्यायसन्ध्यारहितस्सत्यशौचविवर्जितः ॥ अविक्रयाणां विक्रेता अयाज्यानाञ्च याजकः। तस्य पापेन लिप्यामि यद्यहं नागमं पुनः ॥ दुष्टबुद्धौ तु यत्पापं धूर्ते वा ग्रामकण्टके । नास्तिके च विशीले च परदाररते तथा ॥ वेदविक्रयिके चैव शवसूतकभोजने । तेन पापेन लिप्यामि यद्यहं नागमं पुनः ॥ मृतशय्याप्रतिग्राहे मातापित्रोरपालके । तेन पापेन लिप्यामि यदि नायामि ते गृहम् ॥ दानं दातुं प्रवृत्तस्य योऽन्तरायकरो नरः । तेन पापेन लिप्यामि यदि नायामि ते गृहम् ॥ देवद्रव्यं गुरुद्रव्यं ब्रह्मद्रव्यं हरेत्तु यः । तेन पापेन लिप्यामि यदि नायामि ते गृहम् ॥ दीपं दीपेन यः कुर्यात् पादं पादेन धावयेत् । तेन पापेन लिप्यामि यदि नायामि ते गृहम् ॥ भर्तारं स्वामिनं मित्रमात्मानं बालमेव च । मां विप्रं च गुरुं नारीं यो मारयति दुर्मतिः । तेन पापेन लिप्यामि यदि नायामि ते गृहम् ॥ अवैष्णवं च यत्पापं यत्पापं दांभिके जने । अजितेन्द्रियेषु यत्पापं परदोषानुकीर्तने ॥ कृतघ्ने च कदर्ये च परदाररते तथा । सदाचारविहीने च परपीडाप्रदायके । परपैशुन्ययुक्ते च कन्याविक्रयकारके । हैतुके बकवृत्तौ च कूटसाक्ष्यप्रदे तथा ॥ एतेषां पातकं मह्यं यदि नायामि ते गृहम् ॥ यत्पापं ब्रह्महत्यायां पितृमातृवधे तथा । तेन पापेन लिप्यामि यदि नायामि ते गृहम् ॥ यत्पापं लुब्धकानां च यत्पापं गरदायिनाम् । तेन पापेन लिप्यामि यदि नायामि ते गृहम् ॥

द्विभार्यः पुरुषो यस्तु समदृष्ट्या न पश्यति । तस्य पापेन लिप्यामि यदि नायामि ते गृहम् ॥ सकृद्दत्वा तु यः कन्यां द्वितीयाय प्रयच्छति । तेन पापेन लिप्यामि यदि नायामि ते गृहम् ॥ कथायां कथ्यमानायामन्तरं कुरुते नरः । तस्य पापेन लिप्यामि यदि नायामि ते गृहम् ॥ पतिनिन्दापरा नारी वेदनिन्दापरो नरः । तयोः पापेन लिप्यामि यदि नायामि ते गृहम् ॥ यस्य संगृहिणी भार्या ब्राह्मणी च विशेषतः । तस्य पापेन लिप्यामि यदि नायामि ते गृहम् ॥ प्रेतश्राद्धे तु यो भुंक्ते पतिते बहुयाजके । असच्छास्त्रार्थनिरते पुराणार्थविवर्जिते ॥ मूर्खे पाषण्डनिरते क्रयविक्रयिके द्विजे । एतेषां पातकं मह्यं यदि नायामि ते गृहम् ॥ एकाकी मृष्टमश्नाति भार्यापुत्रविवर्जितः ॥ आत्मजां गुणसंपन्नां समानसदृशे वरे । न प्रयच्छति यः कन्यां नरो वै ज्ञानदुर्लभः ॥ तेन पापेन लिप्यामि यदि नायामि ते गृहम् ॥ मृगीवाक्यं ततः श्रुत्वा लुब्धको हृष्टमानसः। संहृत्य बाणं सन्धानान्मुमोच हरिणीं तदा ॥ तस्या मुक्तिप्रभावेन लिङ्गस्यापि प्रपूजनात् । मुक्तो वै पातकैस्सर्वैस्तत्क्षणान्नात्र संशयः ॥ द्वितीये प्रहरे प्राप्ते मध्यरात्रे महानिशि । तस्मिन्नेव क्षणे प्राप्ते परा प्राप्ता मृगी तदा ॥ सन्त्रस्ता भयसंविग्ना पतिमन्विष्यती मुहुः । जालिमध्ये स्थितेनाथ दृष्टा सा लुब्धकेन तु ॥ पुनर्वृक्षस्य पत्राणि त्रोटयित्वा करेण तु । क्षिप्तानि दक्षिणे भागे लिङ्गोपरि दिदृक्षया ॥ तस्या वधार्थं तेनाथो बाणो धनुषि सन्धितः ॥ तिष्ठंस्तत्रैकचित्तेन कुटुंबार्थं जिघांसया । निरीक्ष्य लुब्धको यावद्बाणं तस्यां विमुञ्चति ॥ तावन्मृग्या स सन्दृष्टो दृष्ट्वा तं विह्वलाऽभवत् ॥ अद्यैव भगिनी मे हि लुब्धकेन विनाशिता । मम किं जीवितव्येन तस्या दुःखेन पीडिता ॥ वरो मृत्युर्न शोको वै दृष्ट्वा

व्याधं विशेषतः । एवं संचिन्त्य हरिणी लुब्धकं वाक्यमब्रवीत् ॥ हरिण्युवाच—धनुर्धर वरव्याध सर्वजीवनिकृन्तन । देहि मे वचनं चैकं पश्चात्त्वं मां निपातय ॥ आयाता हरिणी चैका मार्गेणानेन लुब्धक । समायाताऽथवा नैव सत्यं कथय सुव्रत ॥ तच्छ्रुत्वा लुब्धकस्तत्र विस्मितः क्षणमैक्षत । तस्यास्तु यादृशी वाणी ह्यस्याश्चैव हि तादृशी । सा चैषा चागता नूनं प्रतिज्ञापालनाय च । अथवाऽन्या समायाता या तया कथिता पुरा ॥ लुब्धक उवाच—अहोरात्रं कृतं कष्टं कुटुंबार्थे मया मृगि । अधुना त्वां हनिष्यामि देवानां स्मरणं कुरु ॥ व्याधोक्तवचनं श्रुत्वा हरिणी दुःखिता भृशम् । व्याधं प्राह रुदित्वा वै भो मां व्याध निपातय ॥ तेजो बलं तथा सर्वं निर्दग्धं विरहाग्निना । अहं प्राणान्विमोक्ष्यामि भोजनं तेन जायते ॥ बलवांश्च महातेजा मेदोमांससमन्वितः । अन्यश्च पीनगौराङ्गो मृगो ह्यत्रागमिष्यति ॥ अहं च दुर्बला नूनं मेदोमांसविवर्जिता । केवलं पापभाक्त्वं हि मम प्राणविमोचने ॥ मार्गेणानेन भो व्याध मृग आयास्यति ध्रुवम् । तं हत्वा ते कुटुंबस्य तृप्तिर्नूनं भविष्यति ॥ तयोक्तं लुब्धकश्श्रुत्वा किं करोमीत्यचिन्तयत् । मृग्युक्तो हि स युक्तार्थ एष मे निश्चयो हृदि ॥ संचिन्त्य लुब्धकः प्राह मृगीं शोकातुरां कृशाम् । सत्यं वद महाभागे प्रत्ययो मे यथा भवेत् ॥ तस्य तद्वचनं श्रुत्वा हरिणी दुःखकर्शिता । चक्रे सत्यप्रतिज्ञान्तु व्याधस्याग्रे पुनः पुनः ॥ मृग्युवाच—क्षत्रियस्तु रणं श्रुत्वा संग्रामं यो न गच्छति । तस्य पापेन लिप्येऽहं यदि नायामि ते गृहम् ॥ एतच्छ्रुत्वा तु व्याधेन साऽपि मुक्ता मृगी तदा । जलं पीत्वा तु बहुशो गता सद्यो यथागतम् ॥ जालिमध्ये स्थितस्यास्य द्वितीयः प्रहरो गतः । त्रोटित्वा बिल्व-

पत्राणि पुनर्देवे न्ययोजयत् ॥ पीडितोऽतीव शीतेन क्षुधया गृहचिन्तया। शिवश्शिवेति जल्पन्वै न निद्रामुपलब्धवान् ॥ कृतं सुरार्चनं तेन तृतीये प्रहरे गते। वीक्षंश्चैव दिशस्सर्वास्सत्वमार्गं निरैक्षत॥ लुब्धकेनाथ दृष्टोऽसौ हरिणश्चञ्चलेक्षणः। विलोकयन् दिशस्सर्वा मार्गमाणो मृगीपदः ॥ सौभाग्यबलदर्पाढ्यो मदनोन्मत्तपीवरः । तं दृष्ट्वा बाणमाकृष्य आकर्णं तुष्टमानसः । बाणं मुञ्चति यावद्वै तावदृष्टो मृगेण तु ॥ कालरूपं तु तं दृष्ट्वा मृगश्चिन्तितवान् भृशम्। निश्चितं भविता मृत्युर्गोचरस्थः खलो यतः ॥ भार्या प्राणसमा मेऽद्य व्याधेन ह निपातिता । तया विरहितस्याद्य नूनं मृत्युर्भविष्यति । हाहा कालकृतं पापं यद्भार्यादुःखमागतम्। भार्याया न समं सौख्यं गृहेऽपि च वनेऽपि च। तया विना न धर्मोऽस्ति नार्थकामौ विशेषतः ॥ वृक्षमूलेऽपि दयिता यत्र तिष्ठति तद्गृहम्। प्रासादोऽपि तया हीनः कान्तारादतिरिच्यते। धर्मकामार्थकार्येषु भार्या पुंसस्सहायिनी।विदेशे च गतस्यापि सैव विश्वासकारिणी ॥ नास्ति भार्यासमो बन्धुः नास्ति भार्यासमं सुखम्। नास्ति भार्यासमं लोके नरस्यार्तस्य भेषजम्। यस्य भार्या गृहे नास्ति साऽपि चेत् प्रियवादिनी । अरण्यं तेन गन्तव्यं यथाऽरण्यं तथा गृहम् ॥ एका प्राणसमा मेऽभूत् द्वितीया प्राणदा मम । इत्येवं चिन्तयित्वा तु लुब्धकं वाक्यमब्रवीत् ॥ मृग उवाच—शृणु व्याध नरश्रेष्ठ आमिषाहारभोजन। यत्ते पृच्छाम्यहं वीर तद्व्यक्तं वद मे प्रभो ॥ आगतं हरिणीयुग्मं केन मार्गेण तद्गतम्। त्वया विनाशितं वाऽथ सत्यं कथय मेऽधुना ॥ तस्य तद्वचनं श्रुत्वा लुब्धको विस्मयं गतः। असावपि न सामान्यो देवता काऽप्यनुत्तमा॥ उवाच लुब्धकस्सद्यस्तस्याग्रे वाक्यमुत्तमम्॥ लुब्धकः—ते गतेऽनेन मार्गेण

सत्यं कृत्वा ममाग्रतः । ताभ्यां दत्तोऽसि भुक्त्यर्थे मम त्वमधुनाऽनघ ॥ संप्रति त्वां हनिष्यामि नैव मोक्ष्यामि कर्हिचित् ॥ मृग उवाच—तत्सत्यं कीदृशं ताभ्यां वाक्यमुक्तं तवाग्रतः । येन ते प्रत्ययो जातो मुक्तं तद्धरिणीद्वयम् ॥ गते ते केन मार्गेण ये मुक्ते व्याध तेऽधुना ॥ व्याधः—ते गतेऽनेन मार्गेण स्वमाश्रमपदं प्रति । व्याधेन कथितास्ताभ्यां शपथा ये कृतास्तदा ॥ तच्छ्रुत्वा वचनं तस्य हरिणो हृष्टमानसः ॥ मृगः—ताभ्यां व्याध यदुक्तं च तत् करोमि न चान्यथा । प्रभाते त्वद्गृहं नूनमागमिष्यामि निश्चितम् । भार्या ऋतुमती मेऽद्य कामार्ताऽप्यधुना भृशम् । गत्वा गृहेऽथ भुक्त्वा तामापृच्छ्य च सुहृज्जनान् ॥ शपथैरागमिष्यामि गृहं ते नात्र संशयः ॥ मद्देहं स्वगृहं नाद्य नेतुं शक्तः कथञ्चन । तद्वधा मरणं मे स्याद्यद्यहं घातितस्त्वया ॥ लुब्धकः—असत्यं भाषसे धूर्त प्रतारयसि मां वृथा । कृत्वा मृत्युं स्थितं तत्र तदा गच्छति कोऽल्पधीः ॥ व्याधस्य वचनं श्रुत्वा हरिणो वाक्यमब्रवीत् । शपथैरागमिष्यामि यथा ते प्रत्ययो भवेत् ॥ व्याधः—मृग त्वं शपथान् ब्रूहि विश्वासो मे भवेद्यथा । यथा हि प्रेषयामि त्वां स्वगृहं प्रति कामुक ॥ मृगः—भर्तारं वञ्चयेद्या स्त्री स्वामिनं वञ्चयेत्तु यः । मित्रञ्च वञ्चयेद्यस्तु गुरुद्रोहं करोति यः । विरसन्तु रसं हन्यात् प्रेमभेदं करोति यः । भेदयेद्यस्तटाकानि प्रासादं पातयेत्तथा ॥ प्रवासशीलो यो विप्रः क्रयविक्रयकारकः । सन्ध्यास्नानविहीनश्च वेदशास्त्रविवर्जितः ॥ मद्यपाः स्त्रीषु रक्ता ये परनिन्दारताश्च ये । परस्त्रीसेवका विप्राः परपैशुन्यसूचकाः ॥ शूद्रान्नभोजिनो ये च भार्यां पुत्रांस्त्यजन्ति ये । वेदनिन्दापरा ये च वेदशास्त्रार्थनिन्दकाः ॥ तेषां वै पातकं मह्यं यदि नायामि ते गृहम् ॥

भार्या संग्रहिणी यस्य व्रतशौचविवर्जितः । सर्वाशी सर्वविक्रेता द्विजानामपि निन्दकः ॥ त्रिषु वर्णेषु शुश्रूषां यश्शूद्रो न करोति वै । विप्रवाक्यं परित्यज्य पाषण्डाभिरतास्सदा ॥ ब्रह्मचर्यरताश्शूद्रा ये च पाषण्डसंश्रिताः । तेषां वै पातकं मह्यं यदि नायामि ते गृहम् ॥ तिलांस्तैलं घृतं क्षौद्रं कंबलं लवणं गुडम् । लोहलाक्षादिकं सर्वं रङ्गान् नानाविधानपि ॥ विक्रेयुस्तानि शूद्राश्च तत्र दोषो न विद्यते ॥ मद्यं मांसं विषं दुग्धं नीलं च वृषभं तथा । मीनं क्षीरं सर्पकूटं चित्रान्नकफलानि च ॥ मद्यादि विक्रयेद्यस्तु शूद्रोऽपि मदमोहितः । आदित्यं विष्णुमीशानं गणाध्यक्षं तु पार्वतीम् । एतांस्त्यक्त्वा गृहे मूढो योऽन्यं पूजयते नरः ॥ तस्य पापेन लिप्यामि यदि नायामि ते गृहम् ॥ यो गां स्पृशति पादेन ह्युदितेऽर्के च सुप्यति । एकाकी मृष्टमश्नाति तस्य पापस्य भागहम् ॥ मातापित्रोरपोष्टा च क्रियामुद्दिश्य पाचकः । कन्याशुल्कोपजीवी च देवब्राह्मणनिन्दकः ॥ गोग्रासञ्च पुरोडाशमतिथीनां च पूजनम् । ये न कुर्वन्ति गृहिणस्तेषां पापं भवेन्मम ॥ वृन्ताकं च पटोलं च कलिङ्गं तुंबिकाफलम् । मूलकं लशुनं कन्दं कुसुंभं कनशाककम् ॥ एतानि भक्षयेद्यस्तु नरो वै ज्ञानदुर्बलः । तस्य वै जायते शुद्धिश्चान्द्रायणशतैरपि । एतेषां पातकं मह्यं यदि नायामि ते गृहम् ॥ यः पठेत् स्वरहीनं च लक्षणेन विवर्जितम् । यियासुस्सञ्चरन् विप्रो वेदानुद्गिरयेत्तु यः ॥ विप्रस्य पठतः क्वापि शृणोति इह चान्त्यजः । वेदोपजीवको विप्रोऽतिलोभाच्छूद्रभोजनः । तस्य पापेन लिप्यामि यदि नायामि ते गृहम् ॥ शूद्रान्नेषु च ये सक्ताः शूद्रसंपर्कदूषिताः । तेन पापेन लिप्यामि यदि नायामि ते गृहम् ॥ लेखकश्चित्रकर्ता च वैद्यो नक्षत्रसूचकः । कूटकर्ता द्विजो यश्च तस्य पापस्य

भागहम् ॥ कूटसाक्षी मृषावादी परद्रव्यस्य तस्करः । परदाराभिगामी च ये च विश्वासघातुकाः । द्रव्ये द्रव्यं विनिक्षिप्य पानकूटसमाश्रिताः । वेश्यारतास्सदा ये च दानं दातुर्निवारकाः ॥ भर्तारं द्रव्यहीनं च कुरूपं व्याधिपीडितम्। या न पूजयते नारी रूपयौवनगर्विता॥ एकादशीं तथा माघे ये वा शिवचतुर्दशीम् । पूर्वविद्धां प्रकुर्वन्ति तेषां पापस्य भागहम् ॥ उपास्ते तारतम्येन यो मूढश्शिवकेशवौ ॥ द्विजाश्च तान्त्रिका ये च तप्तचक्रादिचिह्निताः ॥ ये च सत्यं विजानन्ति तुच्छालीकानृतं जगत् । कल्पयन्ति गुणान् ये च शुद्धे ब्रह्मणि वञ्चकाः ॥ अहङ्काररता ये च ये पिष्टपशुयाजिनः । भस्मलिङ्गविहीना ये द्विजा वेदविवर्जिताः ॥ तेषां पापेन लिप्यामि यदि नायामि ते गृहम् ॥ अथ किं बहुनोक्तेन भो लुब्धक तवाग्रतः । यदि नायामि ते गेहं मम सत्यं भवेत्तव ॥ तेन वाक्येन सन्तुष्टो व्याधो वै वीतकल्मषः । संहृत्य धनुषो बाणं मृगो मुक्तो गृहं प्रति ॥ जलं पीत्वा तु हरिणः प्रविष्टो गहनं प्रति । गतोऽसौ तेन मार्गेण गतं येन मृगीद्वयम् ॥ लुब्धकस्तु तदा तत्र जालिमञ्चे स्थितो निशि । प्रत्यूषे बिल्वपत्राणि त्रोटयित्वा समर्प्य च । शिवश्शिवेति जल्पन् वै आशु यातो निजाश्रयम् ॥ अथोदिते सूर्यबिंबे अकामाज्जागरे कृते । पापान्मुक्तोऽप्यसौ सद्यश्शिवपूजाप्रभावतः ॥ निरैक्षत दिशो यावन्निराशो भोजनं प्रति । तावच्छिशुयुताचान्या मृगी तत्र समागता ॥ दृष्ट्वा मृगीं तदा व्याधो बाणं धनुषि योजयत् । यावन्मुञ्चत्यसौ बाणं तावदुक्तं तया तदा ॥ मा बाणं मुञ्च धर्मात्मन् धर्मं मा मुञ्च सुव्रत । अहं न वध्या सर्वेषामिति शास्त्रविनिश्चयः॥शयानो मैथुनासक्तःस्तनपो व्याधिपीडितः। न हन्तव्यो मृगो राज्ञा मृगी च शिशुना वृता ॥ अथवा धर्ममुत्सृज्य

मां हनिष्यसि मानद। बालकं स्वगृहं मुक्त्वा सखीनां च निवेद्य वै ॥ शपथैरागमिष्यामि शृणु व्याध वचो मम ॥ या स्वभर्तारमुत्सृज्य परे पुंसि रता सदा। तस्याः पापेन लिप्यामि यदि नायामि ते गृहम् ॥ मद्यं मांसं विषं दुग्धं नीलीकुंभफलानि च। एतानि विक्रयेद्यस्तु नरो मोहसमन्वितः। तेषां पापेन लिप्यामि यदि नायामि ते गृहम् ॥ तस्यास्तद्वचनं श्रुत्वा व्याधो विस्मयमागमत्। ततो व्याधेन सा मुक्ता गता वै निजमन्दिरम् ॥ व्याधोऽपि तत्स्थलं त्यक्त्वा जगाम स्वगृहं प्रति। सर्वेषां वचनं ध्यायन् मृगाणां सत्यवादिनाम् ॥ एते साङ्घा-तिका नित्यमहं यास्यामि कां गतिम् ॥ क्रमाद्गुहां समायातो बालकाः क्षुधया वृताः ॥ नान्नं मांसं मृगे तस्य भोजनं येन जायते। निरा-मिषं तु तं दृष्ट्वा निराशास्तेऽभवंस्तदा ॥ व्याधोऽपि च तदा तत्र तेषां वाक्यानि संस्मरन्। न भोजनं न निद्रां च लभते विस्मितस्स वै ॥ आगमिष्यन्ति ते नूनं शपथैरपि यन्त्रिताः। न तानहं वधिष्यामि सतां व्रतमनुस्मरन् ॥ लुब्धकेन तदा मुक्तो हरिणश्शपथैर्वृतः। स्व-माश्रयं ययौ तत्रो यत्र तद्धरिणीद्वयम् ॥ सद्यः प्रसूता सा चैका द्विती-या रतिलालसा। तृतीयाऽपि समायाता बालकैर्बहुभिर्वृता ॥ सर्वे समेता एकत्र मरणे कृतनिश्चयाः। परस्परं प्रजल्पन्तो लुब्धकस्य विचेष्टितम् ॥ आयातां हरिणीं भुक्त्वा रूपाढ्यां रतिलालसाम्। कृत-कृत्योऽभवत्ताभिस्ताभ्यो वाक्यमथाब्रवीत् ॥ युष्माभिरिह संस्थेयं कर्तव्यं प्राणरक्षणम्। व्याघ्राद्द्वीपाल्लुब्धकेभ्यो बालकानां प्रयत्नतः ॥ यो हि सत्यानुगो भार्यां न भुङ्क्ते मोहसंवृतः। भ्रूणहा स तु विज्ञे-यस्तस्य जन्म निरर्थकम् ॥ सन्तानात् स्वर्गमाप्नोति इह कीर्तिं च शाश्व-तीम्। सन्ततिर्यत्नतः पाल्या स्वर्गसौख्यप्रदायिनी ॥ अपुत्रस्य गति-

र्नास्ति इह लोके परत्र च । येन केनाप्युपायेन पुत्रमुत्पादयेत्पुमान् ॥ मया च तत्र गन्तव्यं यत्र व्याधस्य मन्दिरम् । सत्यं तु पालनीयं स्यात् सत्ये धर्मः प्रतिष्ठितः॥ एतच्छ्रुत्वा तु तानार्या वाक्यमूचुस्सु-दुःखिताः ॥ वयमप्यागमिष्यामस्त्वया सार्थं मृगोत्तम । तथा ते वि-प्रियं कान्त न स्मरामः कदाचन ॥ पुष्पितेषु वनान्तेषु नदीनां सङ्ग-मेषु च । कन्दरेषु च शैलानां युष्माभी रक्षिता वयम् ॥ न कार्यमन्य-दस्माकं क्रीडितेन त्वया विना । नारीणां पतिहीनानां जीवितैः किं प्रयोजनम् ॥ मितं ददाति हि पिता मितं भ्राता मितं सुतः । अमि-तस्य हि दातारं भर्तारं का न पूजयेत् ॥ अपि द्रव्ययुता नारी बहु-पुत्रसुहृद्वृता । सा शोच्या बन्धुवर्गस्य पतिहीना कुलाङ्गना ॥ गन्ध-माल्यैः स्त्रियो नित्यं प्रीयन्ते भर्तुरग्रतः ॥ नातन्त्री वाद्यते वीणा नाचक्रो भ्रमते रथः । नापतिस्सुखमाप्नोति नारी पुत्रशतैर्वृता ॥ नास्ति भर्तृसमो धर्मो नास्ति भर्तृसमस्सुहृत् । नास्ति भर्तृसमो नाथः स्त्रीणां भर्ता परा गतिः ॥ एवं विलप्य तास्सर्वा मरणे कृतनिश्चयाः । बालकैस्तैस्समायुक्ता भर्तृशोकेन दुःखिताः ॥ मृगस्तासां वचश्श्रुत्वा हृदि तापपरोऽभवत् । गन्तव्यं किं न गन्तव्यं मया व्याधस्य मन्दि-रम् ॥ यातस्तु सुकृतं रक्षन् कुटुंबस्य क्षयो भवेत् । तदन्तिकं न चेद्यामि मम सत्यक्षयो भवेत् ॥ वरं पुत्रस्य मरणं भार्याया आत्मनस्तथा । सत्ये त्यक्ते नरो नित्यमाकल्पं रौरवं व्रजेत् ॥ तस्मात्सत्यं पालनीयं सदा श्रेयोर्थिभिर्नरैः ॥ एवं संचिन्त्य हरिणो धर्मान् हृदि मनो-रमान् । ताभिस्सहैव शनकैः क्षणात्तस्याश्रयं ययौ ॥ तस्मिन् सरसि स स्नात्वा कर्मन्यासं चकार ह । तल्लिङ्गं प्रणिपत्याशु हृदि ध्यायन् सदाशिवम् ॥ स्नानं पानं परित्यज्य मैथुनं भोगमेव च । कामं क्रोधं

तथा लोभं मायां मोक्षविनाशिनीम् ॥ वन्दयित्वा तु तं देवं लुब्धकाभिमुखं ययौ । तस्य भार्याश्च पुत्राश्च मरणे कृतनिश्चयाः । व्रतं चानशनं गृह्य पृष्ठलग्नास्समाययुः । भार्यापुत्रैः परिवृतो मृगस्तं देशमागमत् । क्षुधितैर्बालकैर्युक्तो लुब्धको यत्र तिष्ठति ॥ मृगस्तं देशमागत्य कुटुंबेन समन्वितः । पालयन् सर्ववाक्यानि लुब्धकं वाक्यमब्रवीत् ॥ मृगः—जहि मां प्रथमं व्याध पश्चादेताः क्रमेण तु । बालकाश्च ततः पश्चात् हन्यन्तां मा बिलंबय ॥ लुब्धकैस्तु मृगा भक्ष्या नास्ति दोषः कदाचन । वयं यास्याम स्वर्लोकं सत्यपूता न संशयः ॥ तथा ते सकुटुंबस्य प्राणपुष्टिर्भविष्यति । एतच्छ्रुत्वा तु वचनं मृगेण परिभाषितम् ॥ आत्मानं निन्दयित्वा तु लुब्धको वाक्यमब्रवीत् ॥ व्याधः—अहो मृग महासत्व गच्छ गच्छ स्वमाश्रयम् । आमिषेण न मे कार्यं यद्भाव्यं तद्भविष्यति ॥ जीवानां घातने चैव विमुखस्तर्जने तथा । नैव पापं करिष्यामि कुटुंबार्थे कदाचन ॥ त्वं गुरुर्मम धर्माणामुपदेष्टा मृगोत्तम । गच्छ गच्छ मृगश्रेष्ठ कुटुंबेन समन्वितः ॥ मया त्यक्तानि शस्त्राणि सत्यधर्मस्समाश्रितः । मृग उवाच—कर्म कार्यमहं त्यक्त्वा त्वत्सकाशमिहागतः । हन्यतामथवा शीघ्रं तत्ते पापं भविष्यति ॥ यदा दत्ता पुरा वाक्च यया बद्धो नयाम्यहम् । एतच्छ्रुत्वा तु वचनं लुब्धको वाक्यमब्रवीत् ॥ लुब्धक उवाच—त्वं बन्धुस्त्वं गुरुस्त्राता त्वं मे माता पिता सुहृत् । मया त्यक्तानि शस्त्राणि त्यक्तं मायादिकं बलम् ॥ कस्य भार्यास्सुताः कस्य कुटुंबं कस्य तन्मृग । तैस्स्वकर्म च भोक्तव्यं मृग गच्छ यथासुखम् ॥ इत्युक्त्वा स तदा तूर्णं बभञ्ज सशरं धनुः । मृगं प्रदक्षिणीकृत्य

नमस्कृत्य क्षमापयत् ॥ एतस्मिन्नन्तरे नेदुर्देवदुन्दुभयो दिवि । आकाशात्पुष्पवृष्टिस्तु पपात सुमनोहरा ॥ तदा दूतास्समायाता विमानं गृह्य भोजनम् ॥ देवदूता ऊचुः—अहो व्याध महासत्त्व सर्वसत्त्वक्षयङ्कर । विमानमिदमारुह्य सदेहस्स्वर्गमाविश ॥ शिवरात्रिप्रभावेन पातकं ते क्षयं गतम् । उपवासस्तु सञ्जातो निशि जागरणं कृतम् ॥ यामे यामे कृता पूजा अज्ञानेन शिवस्य च । सर्वपापविनिर्मुक्तो गच्छ त्वं रुद्रमन्दिरम् ॥ विमानं च समारुह्य सत्याद्रुद्रपदं व्रज । मृगराज महासत्त्व भार्यापुत्रसमन्वितः ॥ भार्यात्रितयसंयुक्तो नक्षत्रपदमाप्नुहि । तव नाम्ना तदृक्षं च लोके ख्यातं भविष्यति ॥ एतच्छ्रुत्वा तु वचनं लुब्धकेन समन्वितः । विमानं तु तदारुह्य नक्षत्रपदमागतः ॥ हरिणीद्वयमन्वेष्टुं पृष्ठतो मृगमेव च । तारात्रितयसंयुक्तं मृगशीर्षं तदुच्यते ॥ बालकद्वितयं चाग्रे तृतीया पृष्ठतो मृगी । पृष्ठतस्तस्य संप्राप्ता मृगशीर्षस्य सन्निधौ ॥ मृगराड् दृश्यतेऽद्यापि ऋक्षं व्योमगमुत्तमम् ॥ उपवासं करिष्यन्ति जागरेण समन्वितम् । यथोक्तशास्त्रमार्गेण तेषां मोक्षो न संशयः ॥ शिवरात्रिव्रतं यस्तु न करोति नराधमः । पच्यते नरकं घोरे यावच्चन्द्रदिवाकरौ ॥ मतान्तरबलादृप्तो देवतान्तरपूजकः । शिवरात्रौ तु यो भुङ्क्ते विषयानपि मूढधीः ॥ अन्धं तमः प्रयात्येव मुच्यते दैवतान्तरैः । शिवरात्रिसमं नास्ति व्रतं पापक्षयावहम् ॥ यत्कृत्वा सर्वपापेभ्यो मुच्यते नात्र संशयः । किं च माघे कलौ कृष्णे निशीथे परमेश्वरः । जगत्संरक्षणार्थाय महालिङ्गमभूत्पुरा ॥ विष्णुयोनिर्महामाया मध्यं विष्णुपदात्मकम् । ब्रह्मपीठं च तन्मध्ये शिवलिङ्गं प्रतिष्ठितम् ॥ हरो बीजं हरिर्योनिरपत्यं जगदे-

तयोः । महालिङ्गमपारेऽस्मिन्नंभस्यानन्दतुन्दिलम् ।। आविरासीन्महा-पुण्यं शिवनारायणाह्वयम् । दक्षिणाङ्गादभूद्विष्णुर्वामाङ्गादभवद्विधिः ।। देवताः पीठमूलेन सर्वभूतानि पादतः । चतुष्पात् सकलं ब्रह्म महा-लिङ्गं शिवः स्मृतः ।। शिवरात्रिव्रतं कृत्वा तस्माद्विष्ण्वादयस्सुराः । स्वस्वकर्मणि सामर्थ्यं प्रापुस्तत्पुण्ययोगतः ।। अश्वमेधसहस्राणि वा-जपेयशतानि च । प्राप्नोति तत्फलं सर्वं नात्र कार्या विचारणा ।। एकादशीकोटिकृतौ तु यत्फलं वाराणसीवाससहस्रवर्षैः । जन्माष्टमी-लक्षभवं च सिद्ध्येदेकेन सत्यं शिवरात्रिकेन ।। नार्थवादो मया प्रोक्त-स्सत्यमेतद्रहस्यकम् । क्रियतामास्तिकैस्सर्वैश्शिवरात्रिव्रतं परम् ।।

इति श्रीस्कान्दपुराणे लैङ्गे च उमामहेश्वरसंवादे

शिवरात्रिव्रतकथा समाप्ता ।।

॥ श्रीरस्तु ॥

॥ अथ श्रीकृष्णजन्माष्टमीव्रतम् ॥

निशीथव्यापिनी ग्राह्या। पूर्वत्रैव निशीथव्याप्तौ पूर्वा। अन्यथा व्याप्तिपञ्चकेऽपि परा ॥

आदावनुज्ञां कृत्वा ब्राह्मणान्नमस्कृत्य दक्षिणां तांबूलञ्च गृहीत्वा, अशेषे...स्वीकृत्य अस्माकं सहकुटुंबानां...सिद्ध्यर्थं देवकीवसुदेव सहितगोपालकृष्णप्रसादसिद्ध्यर्थं जन्माष्टमीपुण्यकाले गोपालकृष्ण पूजां कर्तुं योग्यतासिद्धिमनुगृहाण ॥ विघ्नेशं संपूज्य ॥ सङ्कल्पः ॥ शुभे शोभने...गोपालकृष्णपूजां करिष्ये । तदङ्गं कलशपूजां च करिष्ये । विघ्नेश्वरमुद्वास्य ॥ कलशपूजां कृत्वा ॥ पूजोपकरणानि आत्मानं च प्रोक्ष्य ॥

ध्यानम्

ध्यात्वा चतुर्भुजं देवं शङ्खचक्रगदाधरम् ।
पीतांबरयुगोपेतं लक्ष्मीयुक्तं विभूषितं ॥

श्री कृष्णाय नमः ध्यायामि ॥

आगच्छ देवदेवेश जगद्योने रमापते ।
कलशेऽस्मिन्नधिष्ठाने सन्निधेहि कृपां कुरु ॥

श्रीकृष्णाय नमः आवाहयामि ॥

देवदेवे जगन्नाथ गरुडासनसंस्थित ।
गृहाणासनकं दिव्यं जगद्धातर्नमोऽस्तु ते ॥

श्रीकृष्णाय नमः आसनं समर्पयामि ॥

नानातीर्थाहृतं शुद्धं निर्मलं पुष्पमिश्रितम् ।
पाद्यं गृहाण दैत्यारे विश्वरूप नमोऽस्तु ते ॥
श्रीकृष्णाय नमः पाद्यं समर्पयामि ॥

गङ्गादिसर्वतीर्थेभ्यो मयाऽऽनीतं सुशीतलम् ।
गृहाणाचमनं कृष्ण विश्वकाय नमोऽस्तु ते ॥
श्रीकृष्णाय नमः आचमनीयं समर्पयामि ॥

गन्धपुष्पाक्षतोपेतं फलेन च समन्वितम् ।
अर्घ्यं गृहाण देवेश मया दत्तं हि भक्तितः ॥
श्रीकृष्णाय नमः अर्घ्यं समर्पयामि ॥

दधि क्षौद्रं घृतं शुद्धं कपिलायास्सुगन्धि यत् ।
सुस्वादु मधुरं शौरे मधुपर्कं गृहाण मे ॥
श्रीकृष्णाय नमः मधुपर्कं समर्पयामि ॥

पञ्चामृतेन स्नपनं करिष्यामि सुरोत्तम ।
क्षीरोदधिनिवासाय लक्ष्मीकान्ताय ते नमः ॥
श्रीकृष्णाय नमः पञ्चामृतस्नानं समर्पयामि ॥

मन्दाकिनी गौतमी च यमुना च सरस्वती ।
ताभ्यः स्नानार्थमानीतं गृहाण शिशिरं जलम् ॥
श्रीकृष्णाय नमः शुद्धोदकस्नानं समर्पयामि ॥
स्नानानन्तरमाचमनीयं समर्पयामि ॥

शुद्धजांबूनदप्रख्ये तटिद्भासुररोचिषी ।
मयोपपादिते तुभ्यं वाससी च गृहाण भोः ॥
श्रीकृष्णाय नमः वस्त्रं समर्पयामि ॥

यज्ञोपवीतं परमं···तेजः ॥

श्रीकृष्णाय नमः यज्ञोपवीतम् ॥

किरीटकुण्डलादीनि काञ्चीवलययुग्मकम् ।
कौस्तुभं वनमालां च भूषणानि भजस्व भो ॥

श्रीकृष्णाय नमः आभरणानि समर्पयामि ॥

मलयाचलसंभूतं गन्धसारं मनोहरम् ।
हृदयानन्दनं चारु प्रीत्यर्थं प्रतिगृह्यताम् ॥

श्रीकृष्णाय नमः गन्धं समर्पयामि ॥

मालतीचंपकादीनि यूथिकावकुलानि च ।
तुलसीपत्रमिश्राणि गृहाण सुरसत्तम ॥

श्रीकृष्णाय नमः पुष्पाणि समर्पयामि ॥

॥ अथांगपूजा ॥

अनघाय नमः	पादौ पूजयामि	वराहाय नमः	बाहून् पूजयामि
वामनाय नमः	गुल्फौ ,,	नृसिंहाय नमः	हस्तान् ,,
शौरये नमः	जङ्घे ,,	दैत्यसूदनाय नमः	मुखं ,,
वैकुण्ठवासिने नमः	ऊरू ,,	दामोदराय नमः	नासिकां ,,
वासुदेवाय नमः	कटिं ,,	पुण्डरीकाक्षाय नमः	नेत्रे ,,
हृषीकेशाय नमः	नाभिं ,,	गरुडध्वजाय नमः	श्रोत्रे ,,
माधवाय नमः	हृदयं ,,	गोविन्दाय नमः	ललाटं ,,
मधुसूदनाय नमः	कण्ठं ,,	अच्युताय नमः	शिरः ,,

कृष्णाय नमः सर्वाण्यङ्गानि पूजयामि ॥

अथ कृष्णाष्टोत्तरशतनामावलिः ॥

"नमः" इति प्रतिनाम अनुसंधेयम्,

ॐ श्रीकृष्णाय नमः
कमलानाथाय
वासुदेवाय
सनातनाय
वसुदेवात्मजाय
पुण्याय
लीलामानुषविग्रहाय
श्रीवत्सकौस्तुभधराय
यशोदावत्सलाय
हरये नमः १०
चतुर्भुजात्तचक्रासि-
गदाशङ्खाद्युदायुधाय
देवकीनन्दनाय
श्रीशाय नमः
नन्दगोपप्रियात्मजाय
यमुनावेगसंहारिणे
बलभद्रप्रियानुजाय
पूतनाजीवितहराय
शकटासुरमर्दनाय
नन्दव्रजजनानन्दिने
सच्चिदानन्दविग्रहाय
नवनीतविलिप्ताङ्गाय
नवनीतनटाय

ॐ अनघाय नमः
नवनीतनवाहाराय
मुचुकुन्दप्रसादकाय
षोडशस्त्रीसहस्रेशाय
त्रिभंगिने नमः
ललिताकृतये नमः
शुकवागमृताब्धीन्दवे
गोविन्दाय नमः ३०
योगिनांपतये नमः
वत्सवाटचराय
अनन्ताय नमः
धेनुकासुरभञ्जनाय
तृणीकृततृणावर्ताय
यमलार्जुनभञ्जनाय
उत्तालतालभेत्रे
तमालश्यामलाकृतये
गोपगोपीश्वराय
योगिने नमः ४०
कोटिसूर्यसमप्रभाय
इलापतये नमः
परस्मै ज्योतिषे नमः
यादवेन्द्राय
यदूद्वहाय

ॐ वनमालिने नमः
पीतवाससे
पारिजातापहारकाय
गोवर्धनाचलोद्धर्त्रे
गोपालाय ५०
सर्वपालकाय नमः
अजाय नमः
निरञ्जनाय
कामजनकाय
कञ्जलोचनाय
मधुघ्ने नमः
मथुरानाथाय
द्वारकानायकाय
बलिने नमः
वृन्दावनान्तसञ्चारिणे
तुलसीदामभूषणाय
स्यमन्तकमणेर्हर्त्रे
नरनारायणात्मकाय
कुब्जाकृष्णांबरधराय
मायिने नमः
परमपुरुषाय
मुष्टिकासुरचाणूरमल्ल-
युद्धविशारदाय

ॐ संसारवैरिणे नमः
कंसारये नमः
मुरारये नमः ७०
नरकान्तकाय नमः
अनादिब्रह्मचारिणे
कृष्णाव्यसनकर्शकाय
शिशुपालशिरश्छेत्रे
दुर्योधनकुलान्तकाय
विदुराक्रूरवरदाय
विश्वरूपप्रदर्शकाय
सत्यवाचे नमः
सत्यसङ्कल्पाय
सत्यभामारताय ८०
जयिने नमः
सुभद्रापूर्वजाय
ॐ जिष्णवे नमः
भीष्ममुक्तिप्रदायकाय
जगद्गुरवे नमः
जगन्नाथाय
वेणुनादविशारदाय
वृषभासुरविध्वंसिने
बाणासुरकरान्तकाय
युधिष्ठिरप्रतिष्ठात्रे ९०
बर्हिबर्हावतंसकाय
पार्थसारथये नमः
अव्यक्ताय नमः
गीतामृतमहोदधये
कालीयफणिमाणिक्य
रञ्जितश्रीपदांबुजाय
ॐ दामोदराय नमः
यज्ञभोक्त्रे नमः
दानवेन्द्रविनाशकाय
नारायणाय नमः
परब्रह्मणे नमः १००
पन्नगाशनवाहनाय
जलक्रीडासमासक्त -
गोपीवस्त्रापहारकाय
पुण्यश्लोकाय नमः
तीर्थपादाय नमः
वेदवेद्याय नमः
दयानिधये नमः
सर्वतीर्थात्मकाय
सर्वग्रहरूपिणे नमः
परात्पराय नमः

देवकीवसुदेवसहितगोपालकृष्णस्वामिने नमः
नानाविधपत्रपुष्पाणि समर्पयामि ॥

वनस्पतिरसोद्भूतं कालागरुसमन्वितम् ।
धूपं गृहाण गोविन्द गुणसागर गोपते ॥

श्रीकृष्णाय नमः धूपमाघ्रापयामि ॥

धूपानन्तरमाचमनीयं समर्पयामि ॥

साज्यं त्रिवर्तिसंयुक्तं वह्निना योजितं मया ।

दीपं गृहाण देवेश त्रैलोक्यतिमिरापहम् ॥

श्रीकृष्णाय नमः दीपं दर्शयामि ॥

दीपानन्तरमाचमनीयं समर्पयामि ॥

नैवेद्यं—भूर्भुवस्सुवः ‡ ब्रह्मणे स्वाहा ॥

शाल्योदनं पायसञ्च सिताघृतविमिश्रितम् ।
नानापक्वान्नसंयुक्तं नैवेद्यं प्रतिगृह्यताम् ॥

श्रीकृष्णाय नमः नैवेद्यं निवेदयामि ॥

निवेदनानन्तरमाचमनीयं समर्पयामि ॥

पूगीफलेति तांबूलम् ॥

नीराजयेत्ततो भक्त्या मङ्गलं समुदीरयन् ।
जयमङ्गलनिर्घोषैर्देवदेवं समर्चयेत् ॥

श्रीकृष्णाय नमः कर्पूरनीराजनं समर्पयामि ॥

नीराजनानन्तरमाचमनीयं समर्पयामि ॥

यानि कानि चेति प्रदक्षिणम् ॥

दत्वा पुष्पाञ्जलिं चैव प्रदक्षिणपुरस्सरम् ।
प्रणमेद्दण्डवद्भूमौ भक्तिप्रह्वः पुनः पुनः ॥

श्रीकृष्णाय नमः मन्त्रपुष्पं ॥ सुवर्णपुष्पं ॥ नमस्कारान् ॥

स्तुत्वा नानाविधैः स्तोत्रैः प्रार्थयेत जगत्पतिम् ।
नमस्तुभ्यं जगन्नाथ देवकीतनय प्रभो ॥

वसुदेवात्मजानन्त यशोदानन्दवर्धन ।
गोविन्द गोकुलाधार गोपीकान्त नमोऽस्तु ते ॥

अथ कृष्णार्घ्यमन्त्राः ॥

अद्य पूर्वोक्त...शुभतिथौ अद्यकृतगोपालकृष्णपूजान्ते क्षीरार्घ्यप्रदानमुपायनदानञ्च करिष्ये ॥

जातः कंसवधार्थाय भूभारोत्तारणाय च ।
पाण्डवानां हितार्थाय धर्मसंस्थापनाय च ॥

कौरवाणां विनाशाय दैत्यानां निधनाय च ।
गृहाणार्घ्यं मया दत्तं देवकीजनित प्रभो ॥

देवकीसहिताय कृष्णाय इदमर्घ्यं ॥ इति त्रिः ॥

क्षीरोदार्णवसंभूत अत्रिनेत्रसमुद्भव ।
रोहिणी च गृहाणार्घ्यं रमाभ्रातर्मनःपते ॥

चन्द्राय नमः इदमर्घ्यम् ॥ इति त्रिः ॥

अनन्तरं गोपालकृष्णरूपं ब्राह्मणं संपूज्य हिरण्यगर्भगर्भस्थं... प्रयच्छ मे ॥ इदं उपायनं सदक्षिणाकं सतांबूलं तुभ्यमहं संप्रददे ॥ इति दत्वा अनन्तरं श्रीकृष्णजननकथापठनं श्रवणं वा कृत्वा, प्रत्यूषे स्नात्वा नित्यकर्माणि कृत्वा बन्धुभिस्सह भुञ्जीत ॥

इति भविष्योत्तरपुराणोक्तजन्माष्टमीव्रतं संपूर्णम् ॥

॥ श्रीरस्तु ॥

॥ १०. अथ श्रीरामनवमीव्रतम् ॥

श्रीरामनवमीनिर्णयः ॥

तत्र चैत्रशुक्लनवम्यां श्रीरामनवमीव्रतम् ॥ इदं च परविद्धायां मध्याह्नव्यापिन्यां कार्यम् ॥ तदुक्तमगस्त्यसंहितायाम् ॥

चैत्रशुद्धा तु नवमी पुनर्वसुयुता यदि ।
सैव मध्याह्नयोगेन महापुण्यतमा भवेत् ॥

दिनद्वये ऋक्षयोगे मध्याह्नव्याप्तौ चैकदेशव्याप्तौ वा परा । अन्यथा पूर्वा ॥ तदुक्तं तत्रैव—नवमी चाष्टमीविद्धा त्याज्या विष्णु-परायणैः । उपोषणं नवम्यां वै दशम्यां पारणं भवेत् ॥

चैत्रमासे नवम्यां तु जातो रामः स्वयं हरिः ।
पुनर्वस्वृक्षसंयुक्ता सा तिथिः सर्वकामदा ॥

श्रीरामनवमी प्रोक्ता कोटिसूर्यग्रहाधिका ।
केवलापि सदोपोष्या नवमीशब्दसंग्रहात् ॥

तस्मात्सर्वात्मना सर्वैः कार्यं वै नवमीव्रतम् ॥

अथागस्त्यसंहितायाम्—

चैत्रे नवम्यां प्राक्पक्षे दिवा पुण्ये पुनर्वसौ ।
उदये गुरुगौरांशे स्वोच्चस्थग्रहपञ्चके ॥
मेषं पूषणि संप्राप्ते लग्ने कर्कटकाह्वये ।
आविरासीत्सकलया कौसल्यायां परः पुमान् ॥

(प्राक्पक्षे=शुक्लपक्षे; उदये=उदयलग्ने; गुरुगौरांशे=गुरुनवांशे) ॥

अस्मिन् दिने तु कर्तव्यमुपवासव्रतं सदा ।
तत्र जागरणं कुर्याद्रघुनाथपरो भुवि ॥

'भुवि' इति खट्वादिव्यावृत्त्यर्थम् ॥

आचम्य, प्राणानायम्य, मासपक्षाद्युल्लिख्य श्रीपरमेश्वरप्रीत्यर्थं मम समस्तपापक्षयद्वारा श्रीरामप्रीतये श्रीरामनवमीव्रताङ्गत्वेन यथामिलितोपचारैः श्रीरामपूजां करिष्ये ॥ तत्रादौ निर्विघ्नपरिसमाप्त्यर्थं गणाधिपतिपूजां करिष्ये ॥ पञ्चशब्दैः पुण्याहवाचनं तथा राममन्त्रेण षडङ्गन्यासं कलशाद्यर्चनं च करिष्ये ॥ गणाधिपतिपूजां पुण्याहवाचनादि च कृत्वा। ततः फलपुष्पाक्षतसहितं जलपूर्णं ताम्रपात्रं गृहीत्वा॥

उपोष्य नवमीं त्वद्य यामेष्वष्टसु राघव ।
तेन प्रीतो भव त्वं मे संसारात्त्राहि मां हरे ॥

इति मन्त्रेण पात्रस्थं जलं क्षिपेत् ॥ ततः स्वशक्तितः हैमीं रामप्रतिमां कृत्वा अग्न्युत्तारणपूर्वकं कपोलौ स्पृष्ट्वा मूलमन्त्रं प्रणवादि चतुर्थ्यंतकनाम रामाय देवत्वं संख्याय रामाय देवत्वं संख्याय स्वाहेति मन्त्रं पठन् प्राणप्रतिष्ठां कुर्यात् ॥

अथ ध्यानम् ॥

कोमलाङ्गं विशालाक्षमिन्द्रनीलसमप्रभम् ।
दक्षिणाङ्गे दशरथं पुत्रावेक्षणतत्परम् ॥
पृष्ठतो लक्ष्मणं देवं सच्छत्रं कनकप्रभम् ।
पार्श्वे भरतशत्रुघ्नौ चामरव्यजनान्वितौ ॥
अग्रेऽव्यग्रं हनूमन्तं रामानुग्रहकांक्षिणम् ॥

इति ध्यायेत् ॥

सहस्रशीर्षा...लम् ॥

आवाहयामि विश्वेशं जानकीवल्लभं प्रभुम् ।
कौसल्यातनयं विष्णुं श्रीरामं प्रकृतेः परम् ॥

श्रीरामागच्छ भगवन् रघुवीर नृपोत्तम ।
जानक्या सह राजेन्द्र सुस्थिरो भव सर्वदा ॥

श्रीरामचन्द्रपरब्रह्मणे नमः आवाहयामि ॥

रामचन्द्र महेष्वास रावणान्तक राघव ।
यावत्पूजां समाप्येऽहं तावत्त्वं सन्निधौ भव ॥

इति सन्निधापनम् ॥

रघुनायक राजर्षे नमो राजीवलोचन ।
रघुनन्दन मे देव श्रीरामाभिमुखो भव ॥

इति सम्मुखीकरणं ॥

पुरुष एवेदगँ् सर्वं...ति ॥

राजाधिराज राजेन्द्र रामचन्द्र महीपते ।
रत्नसिंहासनं तुभ्यं दास्यामि स्वीकुरु प्रभो ॥

श्रीराम...णे नमः आसनं समर्पयामि ॥

एतावानस्य...दिवि ॥

त्रैलोक्यपावनानन्त नमस्ते रघुनायक ।
पाद्यं गृहाण राजर्षे नमो राजीवलोचन ॥

श्रीराम...णे नमः पाद्यं समर्पयामि ॥

त्रिपादूर्ध्व उदैत्पुरुषः...अभि ॥

परिपूर्ण परानन्द नमो रामाय वेधसे ।

गृहाणार्घ्यं मया दत्तं कृष्ण विष्णो जनार्दन ॥

श्रीराम...णे नमः अर्घ्यं समर्पयामि ॥

तस्माद्विराडजायत...पुरः ॥

नमः सत्याय शुद्धाय नित्याय ज्ञानरूपिणे ।
गृहाणाचमनं नाथ सर्वलोकैकनायक ॥

श्रीराम ...णे नमः आचमनीयं समर्पयामि ॥

यत्पुरुषेण हविषा...द्धविः ॥

ब्रह्माण्डोदरमध्यस्थैस्तीर्थैश्च रघुनन्दन ।
स्नापयिष्याम्यहं भक्त्या त्वं गृहाण जनार्दन ॥

श्रीराम...णे नमः स्नानं समर्पयामि ॥

मधुवाता...नः ॥

नमः श्रीवासुदेवाय तत्वज्ञानस्वरूपिणे ।
मधुपर्कं गृहाणेमं जानकीपतये नमः ॥

श्रीराम...णे नमः मधुपर्कं समर्पयामि ॥

आप्यायस्वेत्यादि पञ्चमन्त्रैः ॥

पञ्चामृतं मयाऽनीतं पयो दधि घृतं मधु ।
शर्करासहितं चैव राम त्वं प्रतिगृह्यताम् ॥

श्रीराम...णे नमः पञ्चामृतस्नानं समर्पयामि ॥

चन्दनं पुष्पं समर्प्य संप्रार्थ्य निर्माल्यं विसृज्य पुरुषसूक्तेन विष्णुसूक्तैश्च अभिषिंचेत् ॥

श्रीराम...णे नमः स्नानं समर्पयामि ॥

स्नानानन्तरमाचमनीयं समर्पयामि ॥

सप्तास्यासन्निति वस्त्रं ॥ तं यज्ञं बर्हिषि···ये ॥
तप्तकाञ्चनसङ्काशं पीतांबरमिदं हरे ।
संगृहाण जगन्नाथ रामचन्द्र नमोऽस्तु ते ॥
श्रीराम···णे नमः उपवस्त्रं समर्पयामि ॥

तस्माद्यज्ञात्···ये ॥
श्रीरामाच्युत यज्ञेश श्रीधरानन्त राघव ।
ब्रह्मसूत्रं सोत्तरीयं गृहाण रघुनन्दन ॥
श्रीराम···णे नमः यज्ञोपवीतं समर्पयामि ॥

तस्माद्यज्ञात्सर्वहुतः···यत ॥
कुङ्कुमागरुकस्तूरीकर्पूरं चन्दनं तथा ।
तुभ्यं दास्यामि राजेन्द्र श्रीराम स्वीकुरु प्रभो ॥
श्रीरामं···णे नमः गन्धान् धारयामि ॥
अलंकरणार्थं अक्षतान् समर्पयामि ॥

तस्मादश्वा अजायन्त···वयः ॥
तुलसीकुन्दमन्दारजातीपुन्नागचंपकैः ।
कदम्बकरवीरैश्च कुसुमैः शतपत्रकैः ॥
नीलाम्बुजैर्बिल्वपत्रैश्चंपकै राघवं विभुम् ।
पूजयिष्याम्यहं भक्त्या संगृहाण जनार्दन ॥
तुलसीकुन्दमन्दारपारिजाताम्बुजैर्युताम् ।
वनमालां प्रदास्यामि गृहाण जगदीश्वर ॥
श्रीराम···णे नमः पुष्पमालां समर्पयामि ॥

॥ अथांगपूजा ॥

श्रीरामचन्द्राय नमः पादौ पूजयामि	परमात्मने नमः हृदयं पूजयामि
राजीवलोचनाय नमः गुल्फौ ,,	श्रीकण्ठाय नमः कण्ठं ,,
रावणान्तकाय नमः जानुनी ,,	सर्वास्त्रधारिणे नमः बाहून् ,,
वाचस्पतये नमः ऊरू ,,	रघूद्वहाय नमः मुखं ,,
विश्वरूपाय नमः जङ्घे ,,	पद्मनाभाय नम जिह्वां ,,
लक्ष्मणाग्रजाय नमः कटिं ,,	दामोदराय नमः दन्तान् ,,
विश्वमूर्तये नमः गुह्यं ,,	सीतापतये नमः ललाटं ,,
विश्वामित्रप्रियाय नमः नाभिं ,,	ज्ञानगम्याय नमः शिरः ,,

सर्वात्मने नमः सर्वाण्यङ्गानि पूजयामि ॥

अत्र शक्तौ सत्यां सहस्रतुलसीसमर्पणं अथवा अष्टोत्तरशत-तुलसीसमर्पणं वा कार्यम् ॥

अथ श्रीरामाष्टोत्तरशतनामावलिः ॥

"ॐ" इति आदौ, "नम" इत्यन्ते च योज्यम् ॥

ॐ श्रीरामाय नमः	ॐ रघुपुङ्गवाय नमः	शरणत्राणतत्पराय
रामभद्राय	जानकीवल्लभाय	वालिप्रमथनाय
रामचन्द्राय	जैत्राय नमः १०	वाग्मिने नमः
शाश्वताय	जितामित्राय	सत्यवाचे नमः
राजीवलोचनाय	जनार्दनाय	सत्यविक्रमाय
श्रीमते नमः	विश्वामित्रप्रियाय	सत्यव्रताय २०
राजेन्द्राय	दान्ताय नमः	व्रतधराय

सदा हनुमदाश्रिताय
कौसलेयाय
खरध्वंसिने नमः
विराधवधपण्डिताय
विभीषणपरित्रात्रे
हरकोदण्डखण्डनाय
सप्ततालप्रभेत्त्रे
दशग्रीवशिरोहराय
जामदग्न्यमहादर्प-
दलनाय ३०

ताटकान्तकाय
वेदान्तसाराय
वेदात्मने नमः
भवरोगस्य भेषजाय
दूषणत्रिशिरोहन्त्रे
त्रिमूर्तये नमः
त्रिगुणात्मकाय
त्रिविक्रमाय
त्रिलोकात्मने नमः
पुण्यचारित्रकीर्तनाय
त्रिलोकरक्षकाय
धन्विने नमः
दण्डकारण्यपुण्यकृते
अहल्याशापशमनाय
पितृभक्ताय

ॐ वरप्रदाय नमः
जितेन्द्रियाय
जितक्रोधाय
जितामित्राय
जगद्गुरवे नमः ५०
ऋक्षवानरसङ्घातिने
चित्रकूटसमाश्रयाय
जयन्तत्राणवरदाय
सुमित्रापुत्रसेविताय
सर्वदेवादिदेवाय
मृतवानरजीवनाय
मायामारीचहन्त्रे
महादेवाय
महाभुजाय
सर्वदेवस्तुताय ६०

सौम्याय
ब्रह्मण्याय
मुनिसंस्तुताय
महायोगिने
महोदाराय
सुग्रीवेप्सितराज्यदाय
सर्वपुण्याधिकफलाय
स्मृतसर्वाघनाशनाय
आदिपुरुषाय नमः
परमपुरुषाय ७०

ॐ महापुरुषाय नमः
पुण्योदयाय
दयासाराय
पुराणपुरुषोत्तमाय
स्मितवक्त्राय
मितभाषिणे
पूर्वभाषिणे
राघवाय
अनन्तगुणगम्भीराय
धीरोदात्तगुणोत्तराय
मायामानुषचारित्राय
महादेवादिपूजिताय
सेतुकृते नमः
जितवाराशये
सर्वतीर्थमयाय
हरये नमः
श्यामाङ्गाय
सुन्दराय
शूराय
पीतवाससे ९०

धनुर्धराय
सर्वयज्ञाधिपाय
यज्वने नमः
जरामरणवर्जिताय
विभीषणप्रतिष्ठात्रे

सर्वापगुणवर्जिताय	ॐ परंज्योतिषे नमः	ॐ परेशाय नमः
परमात्मने नमः	परंधाम्ने नमः	पारगाय
परब्रह्मणे नमः	पराकाशाय	पाराय
सच्चिदानन्दविग्रहाय	परात्पराय	सर्वदेवात्मकाय
		परस्मै नमः

श्रीरामचंद्रपरब्रह्मणे नमः नानाविधपरिमलपत्रपुष्पाणि समर्पयामि ॥

यत्पुरुषं व्यदधुः···ते ॥

वनस्पतिरसोद्भूतो गन्धाढ्यो गन्ध उत्तमः ।
रामचन्द्र महीपाल धूपोऽयं प्रतिगृह्यताम् ॥

श्रीराम···णे नमः धूपं आघ्रापयामि ॥

ब्राह्मणोऽस्य मुखमासीत्···यत ॥

ज्योतिषांपतये तुभ्यं नमो रामाय वेधसे ।
गृहाण दीपकं चैव त्रैलोक्यतिमिरापह ॥

श्रीराम···णे नमः दीपं दर्शयामि ॥

चन्द्रमा मनसो जातः···यत ॥

इदं दिव्यान्नममृतं रसैः षड्भिः समन्वितम् ।
लेह्यं पेयं च नैवेद्यं सीतेश प्रतिगृह्यताम् ॥

श्रीराम···णे नमः नैवेद्यं निवेदयामि ॥

मध्ये पानीयं सम···मि ॥ उत्तरापोशनं सम···मि ॥ हस्तप्रक्षालनं ॥ मुखप्रक्षालनं सम···मि ॥ पादप्रक्षालनं ॥ करोद्वर्तनार्थे इदं चन्दनम् ॥

नाभ्या आसीदन्तरिक्षं ...यन् ॥

नागवल्लीदलैर्युक्तं पूगीफलसमन्वितम् ।
तांबूलं गृह्यतां राम कर्पूरादिसमन्वितम् ॥

श्रीराम...णे नमः ताम्बूलं समर्पयामि ॥

इदं फलमिति फलम् ॥ हिरण्यगर्भेति दक्षिणां ॥

मङ्गलार्थं महीपाल नीराजनमिदं हरे ।
संगृहाण जगन्नाथ रामचन्द्र नमोऽस्तु ते ॥

राजाधिराजाय प्रसह्य साहिने, नमो वयं वैश्रवणाय कुर्महे, स मे कामान् काम कामाय मह्यम्, कामेश्वरो वैश्रवणो ददातु, कुबेराय वैश्रवणाय, महाराजाय नमः ॥

श्रीराम...णे नमः नीराजनं दर्शयामि ॥

नमो देवाधिदेवाय रघुनाथाय शार्ङ्गिणे ।
चिन्मयानन्तरूपाय सीतायाः पतये नमः ॥

श्रीराम...णे नमः नमस्कारान् समर्पयामि ॥

सप्तास्यासन् परि...पशुं ॥ यानि कानि च...जनार्दन ॥ प्रदक्षिणम् ॥ यज्ञेन यज्ञ...देवाः ॥ कोमलाङ्ग इति पुष्पाञ्जलिं ॥

नृत्यैर्गीतैश्च वाद्यैश्च पुराणपठनादिभिः ।
पूजोपचारैरखिलैः संतुष्टो भव राघव ॥

श्रीराम...णे नमः अक्षतान् समर्पयामि ॥

अशोककुसुमैर्युक्तं रामायार्घ्यं समर्पयेत् ।
दशाननवधार्थाय धर्मसंस्थापनाय च ॥
राक्षसानां वधार्थाय दैत्यानां निधनाय च ।

परित्राणाय साधूनां जातो रामः स्वयं हरिः ॥
गृहाणार्घ्यं मया दत्तं भ्रातृभिः सहितोऽनघ ।
श्रीरामचन्द्राय साङ्गाय सपरिवाराय नम इदमर्घ्यं समर्पयामि॥

एवं त्रिः ॥ यस्य——तमच्युतम् ॥

आवाहनं न जानामि——मन्त्रहीनं——श्रीरामचन्द्र स्वामिन् अनेन यथाज्ञानकृतपूर्वोक्ताराधनेन भगवान् श्रीरामचन्द्रः प्रीयताम् ॥

इति श्रीरामनवम्यां श्रीरामनवमीव्रतपूजा समाप्ता ॥

श्रीरामप्रतिमादानोद्यापनविधिः ॥

प्रातर्दशम्यां कृत्वा तु संध्याद्याः कालिकाः क्रियाः ।
संपूज्य विधिवद्रामं भक्त्या वित्तानुसारतः ॥
ब्राह्मणान् भोजयेद्भक्त्या दक्षिणाभिश्च तोषयेत् ।
गोभूतिलहिरण्याद्यैःवस्त्रालङ्कारभूषणैः ॥
रामं भक्त्या प्रयत्नेन पूजयेत्परया मुदा ।
एवं यः कुरुते भक्त्या श्रीरामनवमीव्रतम् ॥
अनेकजन्मसिद्धानि पातकानि बहून्यापि ।
भस्मीकृत्वा व्रजत्येव तद्विष्णोः परमं पदम् ॥
सर्वेषामप्ययं धर्मो भुक्तिमुक्त्येकसाधनः ।
अशुचिर्वाऽपि पापिष्ठः कृत्वेदं व्रतमुत्तमम् ॥
पूज्यः स्यात्सर्वभूतानां यथा रामस्तथैव सः ।
यस्तु रामनवम्यां वै भुंक्ते स च नराधमः ॥
कुंभीपाकेषु घोरेषु पच्यते नात्र संशयः ।
अकृत्वा रामनवमीव्रतं सर्वव्रतोत्तमम् ॥

व्रतान्यन्यानि कुरुते न तेषां फलभाग्भवेत् ।
रहस्यकृतपापानि प्रख्यातानि बहून्यपि ॥
महान्ति च प्रणश्यन्ति श्रीरामनवमीव्रतात् ।
एकामपि नरो भक्त्या श्रीरामनवमीं मुने ॥
उपोष्य कृतकृत्यः स्यात्सर्वपापैः प्रमुच्यते ।
नरो रामनवम्यां तु श्रीरामप्रतिमाप्रदः ॥
विधानेन मुनिश्रेष्ठ स भक्तो नात्र संशयः ॥

सुतीक्ष्ण उवाच—

श्रीरामप्रतिमादानं विधानं वा कथं मुने ।
कथयस्व मुनिश्रेष्ठ भक्तस्य मम विस्तरात् ॥

अगस्त्यः—

कथयिष्यामि तद्विद्वन् प्रतिमादानमुत्तमम् ।
विधानं चापि यत्नेन यतस्त्वं वैष्णवोत्तमः ॥
अष्टम्यां चैत्रमासे तु शुक्लपक्षे जितेन्द्रियः ।
दन्तधावनपूर्वं तु प्रातः स्नायाद्यथाविधि ॥
नद्यां तटाके कूपे वा ह्रदे प्रस्रवणेऽपि वा ।
ततः सन्ध्यादिकं कुर्यात्संस्मरन् राघवं हृदि ॥
गृहमासाद्य विप्रेन्द्रः कुर्यात्पूजादिकं परम् ।
दान्तं कुटुंबिनं विप्रं वेदशास्त्रपरं सदा ॥
श्रीरामपूजानिरतं सुशीलं दंभवर्जितम् ।
विधिज्ञं राममन्त्राणां राममन्त्रैकसाधनम् ॥
आहूय भक्त्या संपूज्य वृणुयात्प्रार्थयन्निति ।
श्रीरामप्रतिमादानं करिष्येऽहं द्विजोत्तम ॥

भक्त्याऽऽचार्यो भव प्रीतः श्रीरामोऽसि त्वमेव च ।
इत्युक्त्वा पूज्य विप्रेन्द्रं स्नापयित्वा ततः परम् ॥
तैलेनाभ्यज्य च स्नायाच्चिन्तयन् राघवं हृदि ॥

(तैलेन स्नापयित्वेत्यन्वयः)

श्वेतांबरधरः श्वेतमाल्यगन्धानुलेपनः ।
अर्चितो भूषितश्चैव कृतमाध्याह्निकक्रियः ॥

(अर्चितः=कृतार्चनः)

आचार्यं भोजयेद्भक्त्या सात्त्विकान्नेन विस्तरम् ।
भुंजीत स्वयमप्येवं हृदि राममनुस्मरन् ॥

एकभुक्तव्रती तत्र सहाचार्यो जितेन्द्रियः ।
शृण्वन् रामकथां दिव्यामहश्शेषं नयेन्मुने ॥

सायंसन्ध्यादिकाः कुर्यात्क्रियी राममनुस्मरन् ।
आचार्यसहितो रात्रावधश्शायी जितेन्द्रियः ॥

वसेत्स्वयं न चैकान्ते श्रीरामार्पितमानसः ।
ततः प्रीतः समुत्थाय स्नात्वा सन्ध्यामुपास्य च ॥

प्रातः सर्वाणि कर्माणि शीघ्रमेव समापयेत् ।
ततः स्वस्थमना भूत्वा विद्वद्भिः सहितस्तथा ॥

स्वगृहस्योत्तरे देशे द्वारस्योत्तरमण्टपम् ।
चतुर्द्वारं पताकाढ्यं सवितानं सुतोरणम् ॥

मनोहरं महोत्सेधं पुष्पाद्यैःसमलङ्कृतम् ।
शङ्खचक्रहनूमद्भिः प्राग्द्वारे समलङ्कृतम् ॥
गरुत्मच्छार्ङ्गबाणैश्च दक्षिणे समलङ्कृतम् ।

गदाखड्गाङ्गदैश्चैव पश्चिमे सुविभूषितम् ॥
पद्मस्वस्तिकनीलैश्च कौबेरे समलङ्कृतम् ।
मध्येहस्तचतुष्काढ्यं वेदिकायुक्तमायतम् ॥
प्रविश्य नृत्तगीतैश्च वाद्यैश्चापि सुसंयुतम् ।
पुण्याहं वाचयेत्तत्र विद्वद्भिः प्रीतमानसः ॥
ततः सङ्कल्पयेद्देवं राममेव स्मरन् मुने ।
अस्यां रामनवम्यां च रामाराधनतत्परः ॥
उपोष्याष्टसु यामेषु पूजयित्वा यथाविधि ।
इमां स्वर्णमयीं रामप्रतिमां च प्रयत्नतः ॥
श्रीरामप्रीतये दास्ये रामभक्ताय धीमते ।
प्रीतो रामो हरत्वाशु पापानि सुबहूनि मे ॥
अनेकजन्मसिद्धानि अभ्यस्तानि महान्ति च ॥
विलिखेत्सर्वतोभद्रं वेदिकोपरि सुन्दरम् ।
मध्ये तीर्थोदकैर्युक्तं पात्रं संस्थाप्य चार्चितम् ॥
सौवर्णे राजते ताम्रे पात्रे षट्कोणमालिखेत् ।
तत्र स्वर्णमयीं रामप्रतिमां पलमात्रतः ।
निर्मितां द्विभुजां दिव्यां वामाङ्कस्थितजानकीम् ॥
बिभ्रतीं दक्षिणकरे ज्ञानमुद्रां महामुने ।
वामेनाधः करेणशां देवीमालिंग्य संस्थिताम् ॥
सिंहासने राजतेऽत्र पलद्वयविनिर्मिते ।
पञ्चामृतस्नानपूर्वं संपूज्य विधिवत्ततः ॥
मूलमन्त्रेण नियतः स्नानपूर्वमतन्द्रितः ।
दिवैवं विधिवत्कृत्वा रात्रौ जागरणं चरेत् ॥

दिव्यां रामकथां श्रुत्वा रामभक्तैः समन्वितः ।
नृत्तगीतादिभिश्चैव रामस्तोत्रैरनेकधा ॥
पूजयन्विधिवद्भक्त्या दिवारात्रं नयेद्बुधः ।
ततः प्रातः समुत्थाय स्नानसंध्यादिकाः क्रियाः ॥
समाप्य विधिवद्रामं पूजयेद्विधिवन्मुने ।
ततो होमं प्रकुर्वीत मूलमन्त्रेण मन्त्रवित् ॥
पूर्वोक्तपद्मकुण्डे वा स्थण्डिले वा समाहितः ।
लौकिकाग्नौ विधानेन शतमष्टोत्तरं ततः ॥
अन्नेन पायसेनैव स्मरन् राममनन्यधीः ।
ततो भक्तान् सुसंतोष्य आचार्यं पूजयेन्मुने ॥
कुण्डलाभ्यां नवरत्नाभ्यामङ्गुलीयैरनेकधा ।
गन्धपुष्पाक्षतैर्वस्त्रैर्विचित्रैः सुमनोहरैः ॥
ततो रामं स्मरन् दद्याद्देवं मन्त्रमुदीरयन् ।
इमां स्वर्णमयीं रामप्रतिमां समलङ्कृताम् ॥
चित्रवस्त्रयुगच्छन्नां रामोऽहं राघवाय ते ।
श्रीरामप्रीतये दास्ये तुष्टो भवतु राघवः ॥
इति दत्वा विधानेन दद्याद्वै दक्षिणां पुनः ।
अन्येभ्यश्च यथान्यायं हिरण्यादींश्च शक्तितः ॥
दद्याद्वासोयुगं धान्यं यथाविभवमादृतः ।
ब्राह्मणैस्सह भुञ्जीत तेभ्यो दद्याच्च दक्षिणाम् ॥
ब्राह्महत्यादिपापेभ्यो मुच्यते नात्र संशयः ।
तुलापुरुषदानादि फलं प्राप्नोति सुव्रती ॥
अनेकजन्मसंपन्नपापेभ्यो मुच्यते ध्रुवम् ।

बहुना किमिहोक्तेन मुक्तिस्तस्य करे स्थिता ।
कुरुक्षेत्रे महापुण्ये सूर्यपर्वण्यशेषतः ॥
तुलापुरुषदानाद्यैः कृतैर्यल्लभ्यते फलम् ।
तत्फलं लभते मर्त्यो दानेनानेन सुव्रती ॥

इति रामप्रतिमादानोद्यापनविधिः ॥

— —

श्रीरामनवमीव्रतकथा ॥

अगस्त्य उवाच—रहस्यं कथयिष्यामि सुतीक्ष्ण मुनिसत्तम । चैत्रमासे नवम्यां तु शुक्लपक्षे रघूत्तमः ॥ प्रादुरासीतत्तो ब्रह्मा ब्रह्मानन्दैककेवलः । तत्र जागरणं कुर्याद्रामस्य पुरतो बुधः ॥ प्रतिमायां यथाशक्ति पूजा कार्या यथाविधि । प्रातर्दशम्यां स्नात्वैव कृत्वा संध्यादिकाः क्रियाः ॥ संपूज्य विधिवद्रामं भक्तिवित्तानुसारतः । ब्राह्मणान् भोजयेत्सम्यक् दक्षिणाभिश्च तोषयेत् ॥ गोभूतिलहिरण्याद्यैर्वस्त्रालङ्कारभूषणैः । रामं भक्त्या प्रयत्नेन प्रीणयेत्परया मुदा ॥ एवं यः कुरुते भक्त्या श्रीरामनवमीव्रतम् । अनेकजन्मजातानि पापानि सुबहूनि च । ज्ञानेन भस्मसात्कृत्वा याति विष्णोः परं पदम् ॥ सर्वेषामप्ययं धर्मो भुक्तिमुक्त्येकसाधनः । अशुचिर्वापि पापिष्ठः कृत्वेदं व्रतमुत्तमम् ॥ पूज्यः स्यात्सर्वभूतानां यथा रामस्तथैव सः । यस्तु रामनवम्यां वै भुङ्क्ते स तु नराधमः ॥ कुंभीपाकेषु घोरेषु पतत्येव न संशयः ॥ अकृत्वा रामनवमीव्रतं सर्वव्रतोत्तमम् । व्रतान्यन्यानि कुरुते न तस्य फलभाग्भवेत् ॥ महान्ति विप्रणश्यन्ति पापानि नवमीव्रतात् । एकामपि नरो भक्त्या श्रीरामनवमीं तथा ॥ उपोष्य कृत-

कृत्यः स्यात्सर्वपापैः प्रमुच्यते ॥ ततो रामनवम्यां तु श्रीरामप्रतिमाप्रदः । विधानेन नरश्रेष्ठः स मुक्तो नास्ति संशयः ॥ सुतीक्ष्णः—प्रायेण हि नराः सर्वे दरिद्राः कृपणा मुने । कथं कुर्वन्ति विस्तार्य श्रीरामनवमीव्रतम् ॥ अगस्त्यः—दरिद्रस्तु महाभाग स्वस्ववित्तानुसारतः । पलार्धेन तदर्धेन तदर्धार्धेन वा पुनः ॥ वित्तशाठ्यमकृत्वैव कुर्यादेवं व्रतं मुने । यदि घोरतरं दुष्टं पातकं हरते क्वचित् ॥ अकिंचनोऽपि यत्नेन चोपोष्य नवमीदिने । एकचित्तोऽतियत्नेन सर्वपापैः प्रमुच्यते ॥ प्राप्ते श्रीरामनवमीदिने मर्त्यो विमूढधीः । उपोषणं न कुरुते कुंभीपाकेषु पच्यते ॥ यत्किञ्चिद्राममुद्दिश्य क्रियते न स्वशक्तितः । रौरवे स तु मूढात्मा पच्यते नात्र संशयः ॥ सुतीक्ष्णः—यामाष्टके तु पूजा वै तत्र चोक्ता महामुने । मूलमन्त्रेण संयुक्तां तां कथां वद सुव्रत ॥ अगस्त्यः—सर्वेषां राममन्त्राणां मन्त्रराजं षडक्षरम् ॥ इदं तु स्कान्दे मोक्षखण्डे रुद्रगीतायां श्रीरामं प्रति रुद्रवचनम्—मुमूर्षोर्मणिकर्ण्यां ते अर्धोदकनिवासिनः । अहं दिशामि ते मन्त्रं तारकस्योपदेशतः ॥ श्रीराम राम रामेति ह्येतत्तारकमुच्यते। अतस्त्वं जानकीनाथ परं ब्रह्माभिधीयसे॥ तारकं ब्रह्मचेत्युक्तं तेन पूजाप्रशस्यते। पीठांगदेवतानां तु आवृत्तीनां तथैव च । आदावेव प्रकुर्वीत देवस्य प्रीतयेऽर्चनम् ॥ उपचारैः षोडशभिः पूजा कार्या यथाविधि । आवाहनं स्थापनं च सम्मुखीकरणं तथा॥ एवं मुद्राप्रार्थनां च पूजां मुद्रां प्रयत्नतः । शङ्खपूजां प्रकुर्वीत पूर्वोक्तविधिना ततः ॥ कलशं वामभागे तु पूजाद्रव्याणि चादरात् । पीठे संपूज्य यत्नेन आत्मानं मन्त्रमुच्चरेत् ॥ पात्रासादनमप्येवं कुर्याद्यामेष्वतन्द्रितः । पीतांबराणि देवाय प्रार्थयन्नर्चयेत्सुधीः ॥ सर्वयज्ञोपवीतानि दद्याद्देवाय भक्तितः । नानारत्न-

विचित्राणि दद्यादाभरणानि च ।। हिमांबुदष्टं रुचिरं घनसारं मनोहरम् । क्रमात्तु मूलमन्त्रेण ह्युपचारान् प्रकल्पयेत् ।। कह्लारैः केतकीजातीपुन्नागाद्यैः प्रपूजयेत् । चंपकैः शतपत्रैश्च सुगन्धैः सुमनोहरैः ।। पाद्यचन्दनधूपैश्च तत्तन्मंत्रैः प्रपूजयेत् । भक्ष्यभोज्यादिकं भक्त्या देवाय विधिनार्पयेत् ।। एवं सोपस्करं देवं दत्वा पापैः प्रमुच्यते । जन्मकोटिकृतैर्घोरनानारूपैश्च दारुणैः ।। विमुक्तः स्यात्क्षणादेव राम एव भवेन्मुने । श्रद्दधानस्य दातव्यं श्रीरामनवमीव्रतम् ।। सर्वलोकहितायेदं पवित्रं पापनाशनम् । लोहेन निर्मितं वाऽपि शिलया दारुणाऽपि वा ।। एकेनैव प्रकारेण यस्मैकस्मै तथा मुने । कृतं सर्वं प्रयत्नेन यत्किञ्चिदपि भक्तितः ।। जपेदेकान्तमासीनो यावत्सुदशमीदिनम् । अनेन स्यात्पुनःपूजा दशम्यां पूजयेद्द्विजान् ।।भक्त्या भोज्यैर्बहुविधैर्दद्याच्छक्त्या च दक्षिणाम् । कृतकृत्यो भवेच्चैव सद्यो रामः प्रसीदति ।। तूष्णीं तिष्ठन्नरो वापि पुनरावृत्तिवर्जितः । द्वादशाब्दैः कृतं चापि यत्पापं न विमुच्यते ।। विलयं याति तत्सर्वं श्रीरामनवमीव्रतात् ।। जपं च राममन्त्राणां यो न जानाति मानवः । उपोष्य संस्मरेद्रामं न्यासपूर्वमतन्द्रितः ।। गुरुलब्धं तु मन्त्रं तन्मुने न्यासपुरस्सरम् । यामे यामे च विधिना कुर्यात्पूजां समाहितः ।। मुमुक्षुश्च सदा कुर्याच्छ्रीरामनवमीव्रतम् । मुच्यते सर्वपापेभ्यो याति ब्रह्म सनातनम् ।।

इति श्रीस्कान्दपुराणेऽगस्त्यसंहितायां श्रीरामनवमीव्रतकथा संपूर्णा ।।

॥ श्रीरस्तु ॥

॥ ११. अथ चित्रापूर्णिमाव्रतम् ॥

चित्रापूर्णिमाव्रतारंभविधिः ॥

चित्रानक्षत्रयुक्तपूर्णिमायां कार्यम्। सा च पूर्णिमा मध्याह्नव्यापिनी ग्राह्या ॥ तदुक्तं तिथिनिर्णये—"पूजाव्रतेषु सर्वेषु मध्याह्नव्यापिनी तिथिः" इति ॥

तत्र प्रभाते स्नात्वा नित्यनैमित्तिकानि परिसमाप्य व्रतारंभं कुर्यात् ॥

अशेषे...स्वीकृत्य, मम जन्माभ्यासादित्यादि, समस्तपापक्षयार्थं धर्मराजमुखस्थितचित्रगुप्तप्रीत्यर्थं चित्रगुप्तप्रसादसिद्ध्यर्थं चित्रापूर्णिमापुण्यकाले चित्रगुप्तव्रतारंभं कर्तुं योग्यतासिद्धिमनुगृहाण ॥

विघ्नेश्वरपूजां कृत्वा। चित्रगुप्तव्रतारंभं करिष्य इति सङ्कल्प्य। विघ्नेश्वरमुद्वास्य। ग्रहप्रीतिं कृत्वा। चित्रापूर्णिमापुण्यकाले चित्रगुप्तपूजां करिष्य इति सङ्कल्प्य, कलशपूजां कृत्वा पूजोपकरणानि प्रोक्ष्य सौवर्णेन राजतेन वा चित्रगुप्तप्रतिमां कृत्वा पञ्चगव्येन संस्नाप्य पीठे स्थापयित्वा कल्पोक्तप्रकारेण चित्रगुप्तं संपूज्य ॥ अन्ते अर्घ्यप्रदानं उपायनदानं च कुर्यात् ॥ एवं संवत्सरपर्यन्तं प्रतिमासं पूर्णिमायां व्रतं कार्यम् ॥ इत्यारंभविधिः ॥

अथ चित्रापूर्णिमाव्रतोद्यापनविधिः ॥

अनुज्ञा—अशेषे...स्वीकृत्य, मम जन्माभ्यासादित्यादि मया आचरितस्य चित्रापूर्णिमाव्रतस्य उद्यापनकर्मणः कल्पोक्तसाङ्गफल-

सिद्ध्यर्थं आचार्यमुखेन ऋत्विङ्मुखेन च चित्रापूर्णिमाव्रतोद्यापनकर्म कर्तुं योग्यतासिद्धिमनुगृहाण ।। विघ्नेश्वरपूजां कृत्वा ।। चित्रापूर्णिमाव्रतोद्यापनकर्म करिष्य इति सङ्कल्प्य ।। विघ्नेश्वरमुद्वास्य ।। अभ्युदयं पुण्याहं ग्रहप्रीतिञ्च कुर्यात् ।। अथ आचार्यादिवरणम् ।। अस्मिन् मयाचरिते चित्रापूर्णिमाव्रतोद्यापनकर्मणि सकलकर्म कर्तुं प्रतियामं चित्रगुप्तपूजार्थं च आचार्यं त्वां वृणे इति वृत्वा ।। इन्द्रप्रतिमापूजार्थं ऋत्विजं त्वां वृणे ।। धर्मराजप्रतिमापूजार्थं ऋत्विजं त्वां वृणे। वरुणपूजार्थं ऋत्विजं त्वां वृणे ।। कुबेरपूजार्थं ऋत्विजं त्वां वृणे ।। ब्रह्मकलशं केचित् स्थापयन्ति ।। तस्मिन् विषये—दक्षिणतः ब्रह्मकलशप्रतिमापूजार्थं ऋत्विजं त्वां वृणे ।। सर्वेभ्यो ब्राह्मणेभ्यो नमः ।। अस्मिन् व्रते 'यमाय धर्मराजाय' इति चतुर्दशकलश इति केचिद्वदन्ति।।)अनन्तरं आचार्यः मण्टपशुद्ध्यर्थं प्रतिमाशुद्ध्यर्थं पुण्याहं कृत्वा तज्जलेन प्रतिमां यजमानं सर्वोपकरणानि च प्रोक्ष्य, पञ्चगव्येन प्रतिमां संशोध्य कुंभान् स्पृष्ट्वा ऋत्विग्भिस्सह जपेत् 'आपो वा इदगूँ सर्वं' इत्यनुवाकम् ।। अपः प्रणयति—शुचगूँ शमयति ।। देवो वस्सवितोत्पुनात्वच्छिद्रेण पवित्रेण वसोस्सूर्यस्य रश्मिभिः ।। सहि रत्नानि दाशुषे । सुवाति सविताभगः । तं भागं चित्रमीमहे ।।

कूर्चाग्रै राक्षसान् घोरान् छिन्धि कर्मविघातिनः ।
त्वामर्पयामि कुंभेऽस्मिन् साफल्यं कुरु कर्मणि ।।

वृक्षराजसमुद्भूताः शाखायाः पल्लवत्वचः ।
युष्मान् कुंभेष्वर्पयामि सर्वपापापनुत्तये ।।

नालिकेरसमुद्भूत त्रिनेत्रहरसंभव ।
शिखया दुरितं सर्वं पापं पीडां च मे नुद ।।

घंटानादं कृत्वा । कलशपूजां कृत्वा ॥ कलशजलेन शङ्खं पूरयित्वा संपूज्य तेन जलेन पूजोपकरणानि देवमण्टपं आत्मानं च प्रोक्ष्य ॥ अनन्तरं ध्यानादि कुर्यात् ॥

आदौ ब्रह्मध्यानम् ॥

ध्यायामि शारदानाथं ब्रह्माणं परमेष्ठिनम् ।
हंसारूढं चतुर्वक्त्रं सत्यलोकनिवासिनम् ॥
ब्रह्माणं ध्यायामि ॥

चित्रगुप्तं महाप्राज्ञं लेखिनीपत्रधारिणम् ।
चित्ररत्नांबरधरं मध्यस्थं सर्वदेहिनाम् ॥
चित्रगुप्तं ध्यायामि ॥

एह्येहि सुरराजेन्द्र सर्वलोकैकनायक ।
पूजां गृहाण कृपया सर्वदोषापनुत्तये ॥
इन्द्रं ध्यायामि ॥

काल दण्डधर श्रीमन् महामहिषवाहन ।
एह्येहि सुभगाकार धर्मराज नमोऽस्तु ते ॥
धर्मराजं ध्यायामि ॥

नागपाशधर श्रीमन् नक्रवाह जलेश्वर ।
पूजां गृहाण मद्दत्तं सान्निध्यं कुरु सन्ततम् ॥
वरुणं ध्यायामि ॥

नरवाहन यक्षेश सर्वपुण्यजनेश्वर ।
आवाहितो महादेव पूजां मे सफलं कुरु ॥
कुबेरं ध्यायामि ॥

तत्तत्कलशेषु आदौ वरुणमावाह्य ॥ तत्तत्प्रतिमासु तया तया ऋचावाहयेत् ॥ सचित्रचित्रमिति चित्रगुप्तमावाह्य ॥ त्रातारमिन्द्रमिति इन्द्रमावाह्य ॥ सुगन्नः पन्थामिति धर्मराजमावाह्य ॥ तत्त्वायामीति वरुणमावाह्य ॥ वयं सोमेति कुबेरमावाह्य ॥ सर्वप्रतिमासु तत्तद्देवताप्राणप्रतिष्ठां कुर्यात् ॥ अनन्तरं आसनादिपूजां कुर्यात् ॥

चित्रगुप्त महाप्राज्ञ यमप्राणधनेश्वर ।
आगच्छ त्वं महापूजां गृहाण परमेश्वर ॥
अस्यां प्रतिमायां चित्रगुप्तमावाहयामि ॥

चित्रगुप्त नमस्तुभ्यं लेखिनीपत्रधारक ।
आसनं ते प्रदास्यामि चित्रं मणिविभूषितम् ॥
चित्रगुप्ताय आसनं समर्पयामि ॥

पाद्यं गृहाण भगवन् गन्धपुष्पाक्षतैर्युतम् ।
सर्वशास्त्रार्थतत्वज्ञ प्रीत्यर्थं प्रतिगृह्यताम् ॥
चित्रगुप्ताय पाद्यं समर्पयामि ॥

अर्घ्यं गृहाण भगवन् पुष्पाक्षतसमन्वितम् ।
शास्त्रोक्तविधिना दत्तं प्रणतार्तिविभञ्जन ॥
चित्रगुप्ताय अर्घ्यं समर्पयामि ॥

नानानदीसमानीतं शुद्धनीरं सुवासितम् ।
गृहाणाचमनं देव ज्ञानानन्दस्वरूपक ॥
चित्रगुप्ताय आचमनीयं समर्पयामि ॥

मधुपर्कं मया दत्तं गृहाण सुरवन्दित ।
दधिमध्वाज्यसंयुक्तं गृहाण परया मुदा ॥
चित्रगुप्ताय मधुपर्कं समर्पयामि ॥

स्नानं पञ्चामृतं दिव्यं नवपात्रे प्रकल्पितम् ।
पुष्पोदकफलोपेतं गङ्गातोयैस्तु मिश्रितम् ॥
चित्रगुप्ताय पञ्चामृतस्नानं समर्पयामि ॥
गङ्गादिभ्यो नदीभ्यश्च समाहृतमिदं जलम् ।
स्नानार्थं गृह्यतां देव चित्रगुप्त वरप्रद ॥
चित्रगुप्ताय शुद्धोदकस्नानं समर्पयामि ॥
स्नानानन्तरमाचमनीयं समर्पयामि ॥
वस्त्रयुग्मं महादेव ज्योत्स्नया समनिर्मितम् ।
सोत्तरीयं मया दत्तं गृहाण वरपूजित ॥
चित्रगुप्ताय वस्त्रं समर्पयामि ॥
रत्नहेममयं चारु ब्रह्मसूत्रं च निर्मितम् ।
गृहाण भक्तवरद भुक्तिमुक्तिफलप्रद ॥
चित्रगुप्ताय यज्ञोपवीतं समर्पयामि ॥
कस्तूर्यागरुसंयुक्तं वासनाधिकसम्मितम् ।
विलेपनं मया दत्तं प्रीत्यर्थं प्रतिगृह्यताम् ॥
चित्रगुप्ताय गन्धान् समर्पयामि ॥
अक्षतार्थाय देवेश सुरासुरनमस्कृत ।
अक्षतान् तव दास्यामि गृहाण यमपोषित ॥
चित्रगुप्ताय अक्षतान् समर्पयामि ॥
करवीरैश्च पुन्नागैश्चंपकैर्वकुलैरशुभैः ।
शतपत्रैश्च कह्लारैः पूजयामि सुरेश्वर ॥
चित्रगुप्तं पुष्पैः पूजयामि ॥

॥ अथांगपूजा ॥

चित्रगुप्ताय नमः पादौ पूजयामि	मध्यस्थाय नमः बाहून् पूजयामि
कमलपत्रवर्णाय नमः गुल्फौ,,	चित्ररत्नधराय नमः अधरं ,,
चित्रवर्णाय नमः जानुनी ,,	यमप्राणधनेश्वराय मुखं ,,
चित्रांबरधराय नमः जङ्घे ,,	चित्राय नमः कर्णौ ,,
चित्राय नमः नाभिं ,,	दीर्घनेत्राय नमः नेत्रे ,,
वृकोदराय नमः उदरं ,,	सुनासाय नमः नासिकां ,,
महाप्राज्ञाय नमः हृदयं ,,	चित्रगुप्ताय नमः ललाटं ,,
चित्रमालाकण्ठभूषणाय कण्ठं	किरीटधराय नमः शिरः ,,

सर्वपापपुण्यगणकाय नमः सर्वाण्यङ्गानि पूजयामि ॥

यमाय नमः, धर्मराजाय नमः, मृत्यवे नमः, अन्तकाय नमः वैवस्वताय नमः, कालाय नमः, सर्वभूषितक्षयाय नमः, औदुंबराय नमः, दध्नाय नमः, नीलाय नमः, परमेष्ठिने नमः, वृकोदराय नमः, चित्राय नमः, चित्रगुप्ताय नमः ॥

नानाविधपत्रपुष्पाणि समर्पयामि ॥

दशाङ्गं गुग्गुलोपेतं सुगन्धि सुमनोहरम् ।
आघ्रेयस्सर्वदेवानां धूपोऽयं प्रतिगृह्यताम् ॥

चित्रगुप्ताय धूपमाघ्रापयामि ॥

साज्यं त्रिवर्तिसंयुक्तं वह्निना योजितं मया ।
गृहाण मङ्गलं दीपं त्रैलोक्यतिमिरापहम् ॥

चित्रगुप्ताय दीपं दर्शयामि ॥

नैवेद्यं षड्रसोपेतं नानाभक्ष्यसमन्वितम् ।
पायसान्नञ्च कृसरं मधुनाज्येन संयुतम् ॥

चित्रगुप्ताय नैवेद्यं निवेदयामि ॥

पूगीफलेति तांबूलम् ॥

देवदेव जगन्नाथ त्राहि मां भवसागरात् ॥
नीराजनं नीरजाक्ष कर्पूरेण समन्वितम् ॥

चित्रगुप्ताय कर्पूरनीराजनं समर्पयामि ॥

यानि कानि च पापानि जन्मान्तरकृतानि च ।
तानि तानि विनश्यन्ति प्रदक्षिणपदेपदे ॥

यमाय धर्मराजायेति नमस्कारः ॥

नमस्ते चित्रगुप्ताय नमस्ते सर्वदेहिनाम् ।
सर्वदेवरहस्याय यमप्रिय नमोऽस्तु ते ॥

मन्त्रपुष्पं समर्पयामि ॥

चित्रगुप्त महाप्राज्ञ सर्वप्राणिमनोहर ।
पुष्पाञ्जलिं प्रदास्यामि देवपूज्य नमोऽस्तु ते ॥

पुष्पाञ्जलिं समर्पयामि ॥

नानारत्नसमायुक्तं स्वर्णनालसमन्वितम् ।
मुक्ताकेसरसंयुक्तं स्वर्णपुष्पं ददाम्यहम् ॥

सुवर्णपुष्पं समस्तोपचारान् समर्पयामि ॥

अद्य पूर्वोक्त· · ·पूर्णिमापुण्यकाले चित्रगुप्तपूजान्ते क्षीरार्घ्यप्रदानं उपायनदानं च करिष्ये ॥

चित्रगुप्त नमस्तेऽस्तु धर्मराजसहायिने ।
अर्घ्यं गृहाण भगवन् सर्वलोकहिताय च ॥
चित्रगुप्ताय नमः इदमर्घ्यं ॥ त्रिः ॥
वैवस्वत नमस्तुभ्यं कृत्याकृत्यप्रवर्तक ।
इदमर्घ्यं प्रदास्यामि मम पापविमोचिने ॥
चित्रगुप्ताय नमः इदमर्घ्यं ॥ त्रिः ॥
सर्वलोकस्य कर्त्रे च सर्वप्राणिहिताय च ।
इदमर्घ्यं प्रदास्यामि चतुर्मुख नमोऽस्तु ते ॥
ब्रह्मणे नमः इदमर्घ्यं ॥ त्रिः ॥

अनेनार्घ्यप्रदानेन चित्रगुप्तः प्रीयताम् ॥ अथ उपायनदानं कृत्वा ॥

अनन्तरं आचार्यः स्वगृह्योक्तविधानेन मुखान्तं कृत्वा ॥ ऋत्विग्भिस्सह सचित्रचित्रमिति मन्त्रेण समित्पायसान्नाज्यैरष्टोत्तरशतं हुत्वा स्विष्टकृदादि होमशेषं परिसमाप्य, पुनःपूजां कृत्वा यज्ञेन यज्ञमिति कुंभानुद्वास्य । आपोहिष्ठादिमन्त्रेण कर्तारमभिषेचयेत् ॥ अथ कर्ता शुक्लवस्त्रं परिधाय स्वकुलाचारपुण्ड्रान्धृत्वा कलशवस्त्रप्रतिमादानानि दत्वा कर्मसाद्गुण्यार्थं दशदानषड्दानयथासंभवदानानि कृत्वा फलदानं तांबूलदानञ्च कुर्यात् ॥ ततः ब्राह्मणान् भोजयित्वा आशिषः प्राप्य बन्धुभिस्सह स्वयं भुञ्जीत ॥ एवं यः कुरुते सम्यक्चित्रगुप्तस्य सुव्रतम् । स सर्वभोगान्भुक्त्वान्ते मोक्षं प्राप्नोति सर्वथा ॥

इति चित्रगुप्तव्रतोद्यापनविधिः संपूर्णः ॥

॥ श्रीरस्तु ॥

॥ १२. अथ एकादशी व्रतम् ॥

शुक्लकृष्णपक्षयोः पूर्वेद्युः दशम्यां एकवारं भुक्त्वा रात्रौ जितेन्द्रियः ततः शुद्धमना भूत्वा एकादश्यां प्रातः स्नात्वा नित्यकर्म समाप्य मध्याह्ने स्नात्वा गृहे शुद्धे मण्टपे रङ्गवल्लीवितानाद्यलंकृते हेम्ना रजतेन वा कृतां लक्ष्मीनारायणप्रतिमां पूजोपकरणानि च सन्निधाप्य ब्राह्मणानुज्ञां लब्ध्वा व्रतमारभेत ॥

अशेषे...स्वीकृत्य मम जन्मा...र्थं लक्ष्मीनारायणप्रसादसिद्ध्यर्थं सर्वाभीष्टसिद्ध्यर्थं शुक्लकृष्णैकादशीव्रतारंभं कर्तुं योग्यतासिद्धिमनुगृहाण । विघ्नेश्वरपूजां कृत्वा, शुभे तिथौ मम जन्मा...र्थं शुक्लकृष्णैकादशीव्रतारंभं करिष्ये ॥ यथाशक्ति लक्ष्मीनारायणपूजाञ्च करिष्ये इति सङ्कल्प्य विघ्नेश्वरमुद्वास्य आरम्भे उद्यापने वा ग्रहप्रीतिं पितृपूजां पुण्याहं च कृत्वा घण्टानादं कलशपूजां शंखपूजां कुर्यात् ॥

अथ पूजाक्रमः ॥

ध्यायामि देवं लक्ष्मीशं शङ्खचक्रगदाधरम् ।
पीतांबरपरीधानं पद्मसन्निभलोचनम् ॥

मन्दस्मितमुखांभोजं मदनायुतसुन्दरम् ।
मायानिर्मितलोकौघं मेघश्यामलविग्रहम् ॥

श्रीलक्ष्मीनारायणं ध्यायामि ॥ प्राणप्रतिष्ठा ॥

आगच्छ देवदेवेश विश्वयोने रमापते ।
प्रतिमायां सन्निहितः प्रीत्या पूजां गृहाण मे ॥
श्रीलक्ष्मीनारायणं आवाहयामि ॥

नमस्ते शेषशयन नमो वैकुण्ठवासिने ।
क्षीरार्णवनिवासाय गृहाण कनकासनम् ॥
श्रीलक्ष्मी···णाय नमः आसनं समर्पयामि ॥

पादांबुपाविताशेष तीर्थपादाय ते नमः ।
पाद्यं ददामि ते भक्त्या पुरुषोत्तम गृह्यताम् ॥
श्रीलक्ष्मी···णाय नमः पाद्यं समर्पयामि ॥

अर्घ्यं गृहाण भगवन्नच्युतानन्त केशव ।
गन्धपुष्पादिसंयुक्तं गन्धर्वपरिपूजित ॥
श्रीलक्ष्मी···णाय नमः अर्घ्यं समर्पयामि ॥

गङ्गादिसरिदानीतं हेमपात्रस्थितं जलम् ।
गृहाणाचमनार्थाय गुणरत्नमहार्णव ॥
श्रीलक्ष्मी···णाय नगः आचमनीयं समर्पयामि ॥

मधुपर्कं गृहाणेदं मधुरं मधुसंयुतम् ।
मधुसूदन मायेश महादेवादिवन्दित ॥
श्रीलक्ष्मी···णाय नमः मधुपर्कं समर्पयामि ॥

पञ्चामृतं गृहाणेदं पन्नगारातिवाहन ।
पञ्चबाणस्य जनक पञ्चपातकनाशन ॥
श्रीलक्ष्मी···णाय नमः पञ्चामृतस्नानं समर्पयामि ॥

नानानदीसमानीतं शीतलं विमलं जलम् ।
स्थितं सुवर्णकलशे स्नानार्थं स्वीकुरु प्रभो ॥

श्रीलक्ष्मी...णाय नमः स्नानं समर्पयामि ॥

पीतांबरधरं दिव्यं सूक्ष्मं स्वर्णपरिष्कृतम् ।
गृहाण कमलाकान्त सर्वमङ्गलदायक ॥

श्रीलक्ष्मी...णाय नमः वस्त्रं समर्पयामि ॥

उपवीतमिदं शुभ्रं स्वीकुरुष्व श्रियःपते ।
भक्तिं त्वयि परां देहि परत्र च शुभाङ्गतिम् ॥

श्रीलक्ष्मी...णाय नमः उपवीतं समर्पयामि ॥

श्रीगन्धं कुङ्कुमोपेतं श्रीपते श्रितवत्सल ।
गृहाण करुणां कृत्वा मधुसूदन माधव ॥

श्रीलक्ष्मी...णाय नमः गन्धान् धारयामि ॥

अक्षतान् धवलान्दिव्यान् शालिजान् शासितासुर ।
गृहाण गतिहीनं मां सुगतिं प्रापय प्रभो ॥

श्रीलक्ष्मी...णाय नमः अक्षतान् समर्पयामि ॥

मन्दारमल्लिकादीनि मधुसूदन मत्प्रभो ।
गृहाण गन्धरम्याणि पुष्पाणि पुरुषोत्तम ॥

श्रीलक्ष्मी...णाय नमः पुष्पाणि समर्पयामि ॥

॥ अथांगपूजा ॥

मत्स्याय नमः	पादौ पूजयामि	त्रिविक्रमाय नमः	कण्ठं पूजयामि
कूर्माय नमः	गुल्फौ ,,	बलध्वंसिने नमः	बाहून् ,,
जगद्रक्षकाय नमः	जानुनी,,	रामाय नमः	मुखं ,,
जप्याय नमः	जङ्घे ,,	नराय नमः	नासिकां ,,
वराहाय नमः	ऊरू ,,	नारायणाय नमः	नेत्रे ,,
करुणावते नमः	कटिं ,,	राघवाय नमः	श्रोत्रे ,,
नरसिंह्वाय नमः	नाभिं ,,	बलभद्राय नमः	फालं ,,
दामोदराय नमः	उदरं ,,	कृष्णाय नमः	केशान् ,,
वामनाय नमः	वक्षः ,,	कल्किने नमः	शिरः ,,

सर्वेश्वराय नमः सर्वाण्यङ्गानि पूजयामि ॥

धूपं गृहाण देवेश दशाङ्गेन सुवासितम् ।
दयानिधे देवदेव लक्ष्म्या सह जगत्पते ॥

श्रीलक्ष्मी···णाय नमः धूपं आघ्रापयामि ॥

साज्यं वर्तित्रयोपेतमज्ञानविनिवारक ।
दीपं गृहाण रुचिरं दामोदर नमोऽस्तु ते ॥

श्रीलक्ष्मी···णाय नमः दीपं दर्शयामि ॥

नैवेद्यं षड्रसोपेतं भक्ष्यपायससंयुतम् ।
अपूपफलसूपाढ्यं गृह्यतां गरुडध्वज ॥

श्रीलक्ष्मी···णाय नमः नैवेद्यं निवेदयामि ॥

पूगीफलेति तांबूलम् ॥

कर्पूरखण्डकलितं नीराजनमिदं मुदा ।
गृहाण लक्ष्मीरमण त्राहि मां शरणागतम् ॥
श्रीलक्ष्मी...णाय नमः नीराजनं दर्शयामि ॥

वेदवेदान्तवेद्याय वेधसो जनकाय च ।
मन्त्रपुष्पं ददामीश महादेवाय ते विभो ॥
श्रीलक्ष्मी...णाय नमः मन्त्रपुष्पं समर्पयामि ॥

नानारत्नसमायुक्तं वज्रनालसमन्वितम् ।
मुक्ताकेसरसंयुक्तं स्वर्णपुष्पं ददाम्यहम् ॥
श्रीलक्ष्मी...णाय नमः स्वर्णपुष्पं समर्पयामि ॥

प्रदक्षिणं करोमि त्वां प्रसीद पुरुषोत्तम ।
प्रकृष्टपापनाशाय प्रकृष्टफलसिद्धये ॥
श्रीलक्ष्मी...णाय नमः प्रदक्षिणम् ॥

नमो नमस्ते करुणालयाय नमो नमस्ते कमलाधवाय ।
नमो नमस्ते जगतां च स्रष्ट्रे नमो नमस्ते नतशोकहर्त्रे ॥
श्रीलक्ष्मी...णाय नमः नमस्कारान् ॥

त्राहि मां करुणासिन्धो पाहि मां कमलापते ।
त्वयि भक्तिस्सदैवास्तु मम सर्वार्थदायिनि ॥

प्रार्थना ॥

ममो...र्थं लक्ष्मीनारायणपूजान्ते क्षीरार्घ्यप्रदानं उपायनदानञ्च करिष्ये ॥ इति सङ्कल्प्य ॥

एकादश्यामुपोष्याहं प्रातर्भोक्ष्यामि माधव ।

इदमर्घ्यं प्रदास्यामि गृहाण सुरवन्दित ॥
लक्ष्मीनारायणाय नमः इदमर्घ्यमिदमर्घ्यम् ॥
नमो वः केशवाद्याश्च सर्वलोकैकवन्दिताः ।
इदमर्घ्यं प्रदास्यामि स्वीकुरुध्वं मुदान्विताः ॥
केशवादिभ्यो नमः इदमर्घ्यमिदमर्घ्यम् ॥
श्रीविष्णवे नमस्तुभ्यं सदसन्मार्गदर्शक ।
तुभ्यमर्घ्यं ददामीदं व्रतसाद्गुण्यसिद्धये ॥
श्रीविष्णवे नमः इदमर्घ्यमिदमर्घ्यम् ॥
मत्स्यरूप नमस्तेऽस्तु नमस्ते कूर्मरूपिणे ।
नीलमेघसमाभाय नमस्तेऽर्घ्यं गृहाण मे ॥
श्रीमहाविष्णवे नमः इदमर्घ्यमिदमर्घ्यम् ॥
क्षीरोदार्णवसंभूते महालक्ष्मि महेश्वरि ।
वरप्रदे जगद्वन्द्ये गृहाणार्घ्यमिदं मुदा ॥
महालक्ष्म्यै नमः इदमर्घ्यमिदमर्घ्यम् ॥

इत्यर्घ्यं कृत्वा ॥ अनया पूजया अर्घ्यप्रदानेन च भगवान् लक्ष्मीनारायणः प्रीयताम् ॥ ब्राह्मणं संपूज्य उपायनं दत्वा देवमुद्वास्य परेद्युः प्रातः स्नात्वा नित्यकर्म समाप्य देवं संपूज्य केशवं नाम्ना ब्राह्मणं संपूज्य सपायसं कांस्यपात्रं दत्वा यथाशक्ति ब्राह्मणान् भोजयित्वा तदनुज्ञया स्वयं भुञ्जीत ॥ एवं वर्षमेकं व्रतं कृत्वा अन्ते उद्यापनं कुर्यात् ॥

इत्येकादशीव्रतपूजाविधिः

एकादशीव्रतोद्यापनविधिः ॥

एवं वर्षपर्यन्तं व्रतमनुतिष्ठेत् ॥ वर्षस्यान्ते शुक्लैकादश्यां उद्यापनं कुर्यात् ॥ मध्याह्ने स्नात्वा नित्यपूजां निर्वर्त्य गृहे गोमयोपलिप्ते रङ्गवल्याद्यलंकृतमण्टपे षोडशपत्रं पद्मं विलिख्य तस्योपरि व्रीहीन् तण्डुलांश्च निक्षिप्य मध्ये राजतं ताम्रं मृन्मयं वा कुंभं निधाय तन्तुना संवेष्ट्य वस्त्रादिभिरलंकृत्य हेम्ना रजतेन वा कृतां लक्ष्मीनारायणप्रतिमां संस्थाप्य प्रागादिचतुर्दिक्षु कलशान्निधाय केशवादिद्वादशप्रतिमाः सङ्कर्षणादिद्वादशप्रतिमाश्च संस्थाप्यालंकृत्य अनुज्ञां कुर्यात् ॥

अशेषे...स्वीकृत्य मम जन्मा...र्थं लक्ष्मीनारायणप्रसादसिद्ध्यर्थं मया आचरितस्य शुक्लकृष्णैकादशीव्रतस्य संपूर्णफलावाप्त्यर्थं वैकुण्ठलोकावाप्त्यर्थं दिव्यज्ञानलाभद्वारा मोक्षसिद्ध्यर्थं च शुक्लकृष्णैकादशीव्रतोद्यापनं आचार्यऋत्विङ्मुखेन अद्य कर्तुं योग्यतासिद्धिमनुगृहाण ॥ विघ्नेश्वरं संपूज्य । शुभे...तिथौ मम जन्मा...र्थं लक्ष्मीनारायण...त्यर्थं च शुक्लकृष्णैकादशीव्रतोद्यापनं आचार्यऋत्विङ्मुखेन च अद्य करिष्ये इति सङ्कल्प्य ॥ अप उपस्पृश्य ॥ विघ्नेश्वरमुद्वास्य ॥ ग्रहप्रीतिं कृत्वा ॥ अस्मिन् शुक्लकृष्णैकादशीव्रतोद्यापनकर्मणि सकलकर्म कर्तुं लक्ष्मीनारायणप्रतिमापूजार्थं आचार्यं त्वां वृणे ॥ इत्याचार्यं वृत्वा ॥ अस्मिन् शुक्लकृ...णि केशवप्रतिमापूजार्थमृत्विजं त्वां वृणे ॥ एवं क्रमशः चतुर्विंशतिब्राह्मणान् वृत्वा तत आचार्यः पवित्रपाणिः ऋत्विग्भिस्सह सङ्कल्प्य मण्टपशुद्ध्यर्थं पुण्याहं वाचयित्वा पञ्चगव्येन प्रतिमाशुद्धिं कृत्वा, आपो वा इदमित्यादिभिश्शुद्धजलेन कुंभानापूर्य सहिरत्नानीति रत्नानि तेषु निक्षिप्य कूर्चाग्रैरिति कूर्चान् वृक्षराजेति

पञ्चत्वक्पञ्चपल्लवान् नालिकेरेति नालिकेराणि च तेषु निक्षिप्य उपरि प्रतिमा निधाय "इमं मे वरुण" इति द्वाभ्यां कुंभेषु वरुणमावाह्य प्रतिमासु "सहस्रशी"र्षेति ऋचा तत्तद्देवता आवाह्य प्राणप्रतिष्ठापूर्वं कल्पप्रकारेण पुरुषसूक्तेन च चतुर्वारं पूजयेत्। प्रतिवारं च व्रतिनमर्घ्यमुपायनं च दापयेत् ॥ उपोषित एव पुण्यकथाश्रवणादिभिः रात्रौ व्रतिनं जागरणं कारयेत् ॥ परेद्युः प्रातराचार्यः स्नात्वा स्वनित्यकर्म समाप्य शुक्लकृष्णैकादशीव्रतोद्यापनहोमं करिष्य इति सङ्कल्प्य गृह्योक्तविधिना अग्निप्रतिष्ठादि मुखान्तं कृत्वा 'इदं विष्णु'रिति मन्त्रेण समिच्चर्वान्नाज्यैरष्टोत्तरशतमाहुतीर्हुत्वा होमशेषं समाप्य ऋत्विग्भिस्सह पुनःपूजां कृत्वा प्रतिमाभ्यो देवताः कुंभेभ्यो वरुणं चोद्वास्य देवस्येत्यादिभिर्मन्त्रैः व्रतिनं प्रोक्ष्य स्नापयेत् ॥ ततो व्रती शुक्लवस्त्रपुंड्रादि धृत्वा आचम्य सङ्कल्प्य आचार्याय ऋत्विग्भ्यश्च कलशवस्त्रप्रतिमादानानि दत्वा गोभूतिलहिरण्यादीनि च यथाशक्ति दत्वा सङ्कल्प्य ब्राह्मणान् सुवासिनीश्च भोजयित्वा तेषामाशिषः प्राप्य तदनुज्ञया भुञ्जीत ॥

इत्येकादशीव्रतोद्यापनविधिः ॥

॥ श्रीरस्तु ॥

॥ १३. अथ मथनद्वादशीव्रतम् ॥

कार्तिकशुक्लद्वादश्यां बृन्दावनपूजाविधिः ॥

ब्राह्मणान् अनुज्ञाप्य विघ्नेशं संपूज्य सङ्कल्पं कुर्यात् ॥ देशकालौ संकीर्त्य प्रबोधोत्सवसंज्ञकबृन्दावनद्वादशीपुण्यकाले महाविष्णुपूजां तुलसीपूजाञ्च करिष्ये ॥ इति सङ्कल्प्य ॥ विघ्नेश्वरमुद्वास्य कलशपूजां कुर्यात् ॥ तुलसीसंमुखां श्रीकृष्णप्रतिमां पीठे निधाय पूजयेत् ॥

अथ ध्यानम् ॥

ध्यायेच्च तुलसीं देवीं श्यामां कमललोचनाम् ।
प्रसन्नां पद्मकह्लारां वरदाञ्च चतुर्भुजां ॥
किरीटहारकेयूरकुण्डलाद्यैर्विभूषिताम् ।
धवलांशुकसंवीतां पद्मासननिषेविताम् ॥
देवीं त्रैलोक्यजननीं सर्वलोकैकपावनीम् ।
अस्मिन्बिबे महाविष्णुं तुलसीञ्च ध्यायामि ॥
सर्वदेवमये देवि सर्वदा विष्णुवल्लभे ।
आगच्छ मम गेहेऽस्मिन् नित्यं सन्निहिता भव ॥
तुलसीं आवाहयामि ॥
रत्नसिंहासनञ्चारु भुक्तिमुक्तिफलप्रदे ।
मया दत्तं महादेवि संगृहाण सुरार्चिते ॥
तुलस्यै नमः आसनं समर्पयामि ।
नानागन्धसुपुष्पैश्च वासितं सुरवन्दिते ।

पाद्यं गृहाण देवि त्वं सर्वकामफलप्रदे ॥
तुलस्यै नमः पाद्यं समर्पयामि ॥

गङ्गोदकं समानीतं सुवर्णकलशस्थितम् ।
तुलसि त्वं गृहाणेदमर्घ्यमैश्वर्यदायकम् ॥
तुलस्यै नमः अर्घ्यं समर्पयामि ॥

सर्वमङ्गलदेवेशि नवरत्नैर्विभूषिते ।
मया दत्तमिदं तोयं गृहाणाचमनीयकम् ॥
तुलस्यै नमः आचमनीयं समर्पयामि ॥

पूर्णेन्दुबिंबसदृशं दधिखण्डं घृतं मधु ।
मधुपर्कं मयाऽनीतं गृहाण परमेश्वरि ॥
तुलस्यै नमः मधुपर्कं समर्पयामि ॥

दधिक्षीरंघृतञ्चैव शर्कराफलसंयुतम् ।
पञ्चामृतं गृहाण त्वं लोकानुग्रहकारिणि ॥
तुलस्यै नमः पञ्चामृतस्नानम् ॥

गङ्गायमुनयोस्तोयैरानीतं निर्मलं शुभम् ।
शुद्धोदकमिदं देवि स्नानार्थं प्रतिगृह्यताम् ॥
तुलस्यै नमः स्नानं समर्पयामि ॥

क्षौमं काञ्चनसङ्काशमिदं शुभ्रं मनोहरम् ।
वस्त्रयुग्मं शुभे देवि स्वीकुरुष्वांबुजेक्षणे ॥
तुलस्यै नमः वस्त्रयुग्मं समर्पयामि ॥

राजतं ब्रह्मसूत्रञ्च काञ्चनञ्चोत्तरीयकम् ।
गृहाण सर्ववरदे पद्मपत्रनिभेक्षणे ॥
तुलस्यै नमः उपवीतं समर्पयामि ॥

किरीटहारकटकान् केयूरान् कुण्डलान् शुभान् ।
नूपुरोदरबन्धञ्च भूषणानि समर्पये ॥
तुलस्यै नमः आभरणानि समर्पयामि ॥

चन्दनागरुकस्तूरीकर्पूरेण च संयुतम् ।
विलेपनं ददामि त्वं गृहाण तुलसी ? शुभे ॥
तुलस्यै नमः गन्धान् धारयामि ॥

अक्षतान् धवलान् दिव्यान् शालीयांस्तण्डुलान् शुभान् ।
अक्षतांश्चार्पये देवि बृन्दास्थानोद्भवेश्वरि ॥
तुलस्यै नमः अक्षतान् समर्पयामि ॥

मल्लिकाकुन्दमन्दारजाजीवकुलचंपकैः ।
शतपत्रैश्च कह्लारैः पूजयामि महेश्वरि ॥
तुलस्यै नमः पुष्पमालां समर्पयामि ॥

अथाङ्गपूजा ॥

तुलसीदेव्यै नमः पादौ पूजयामि	लोकानुग्रहकारिण्यै उदरं पूजयामि
बृन्दावनस्थायै नमः गुल्फौ ,,	त्रैलोक्यजनन्यै नमः हृदयं ,,
पद्मपत्रनिभेक्षणायै जङ्घे ,,	पद्मप्रियायै नमः हस्तान् ,,
पद्मकोटिसमप्रभायै ऊरू ,,	इन्दिराख्यायै नमः भुजान् ,,
हरिप्रियायै नमः जानुनी ,,	कम्बुकण्ठ्यै नमः कण्ठं ,,
कुङ्कुमाङ्कितगात्रायै कटिं ,,	वरप्रदायै नमः मुखं ,,
सुरवन्दितायै नमः नाभिं ,,	आश्रितरक्षकायै नमः शिरः ,,

श्रीमहाविष्णवष्टोत्तरशतनामपूजा ॥

"ॐ" इति आदौ, "नमः" इत्यन्ते च योज्यम् ॥

ॐ विष्णवे नमः
लक्ष्मीपतये
कृष्णाय नमः
वैकुण्ठाय
गरुडध्वजाय
परब्रह्मणे नमः
जगन्नाथाय
वनमालिने नमः
यज्ञरूपाय नमः
चक्रपाणये १०
गदाधराय नमः
उपेन्द्राय नमः
केशवाय नमः
हंसाय नमः
समुद्रमथनाय
हरये ममः
गोविन्दाय
ब्रह्मजनकाय
कैटभासुरमर्दनाय
श्रीधराय नमः २०
कामजनकाय
शेषाय नमः
चतुर्भुजाय नमः
ॐ पाञ्चजन्यधराय
श्रीमते नमः
शार्ङ्गपाणये
जनार्दनाय
पीतांबरधराय
देवाय नमः
सूर्यचन्द्रविलोचनाय
मत्स्यरूपाय
कूर्मतनवे
विभवे नमः
घनश्यामाय नमः
जगत्कारणाय
अव्ययाय नमः
बुद्धावताराय
ॐ वासुदेवाय नमः
त्रिविक्रमाय
दैत्यान्तकाय ४०
मधुरिपवे नमः
तार्क्ष्यवाहाय
सनातनाय
नारायणाय
क्रोडरूपाय
नृकेसरिणे
ॐ वामनाय नमः
भार्गवाय
रामाय नमः
हलिने नमः ५०
कल्किने नमः
हयाननाय
विश्वंभराय
शिंशुमाराय
श्रीकराय
कपिलाय
ध्रुवाय नमः
दत्तात्रेयाय
अच्युताय
अनन्ताय ६०
मुकुन्दाय
दधिवामनाय
धन्वन्तरये
श्रीनिवासाय
प्रद्युम्नाय
पुरुषोत्तमाय
श्रीवत्सकौस्तुभधराय
मुरारातये
अधोक्षजाय

ॐ शान्तात्मने नमः
लीलामानुषविग्रहाय
दामोदराय नमः
विराड्रूपाय
भूतभव्यभवत्प्रभवे
पद्मनाभाय नमः
हृषीकेशाय
सुधाप्रदाय
हरये नमः
पुण्डरीकाक्षाय
स्थितिकर्त्रे ८०
परात्पराय
ऋषभाय
मोहिनीरूपधारिणे

ॐ सङ्कर्षणाय नमः
पृथवे नमः
क्षीराब्धिशायिने
भूतात्मने
अनिरुद्धाय
भक्तवत्सलाय
नराय नमः ९०
गजेन्द्रवरदाय
विधात्रे नमः
भूतभावनाय
श्वेतद्वीपसुवास्तव्याय
सूर्यमण्डलमध्यगाय
सनकादिमुनिध्येयाय
भगवते नमः

ॐ शङ्करप्रियाय नमः
नीलाकान्ताय
धराकान्ताय १००
वेदात्मने नमः
बादरायणाय
भागीरथीजन्मभूमि-
पादपद्माय
सतां प्रभवे नमः
स्वभुवे नमः
आदिदेवाय नमः
देवदेवाय नमः
प्रह्लादपरिपालकाय
महाविष्णवे नमः

नानाविधपरिमलपत्रपुष्पाणि समर्पयामि ॥

गुग्गुलं गोघृतञ्चैव दशाङ्गं सुमनोहरम् ।
धूपं गृहाण वरदे सर्वाभीष्टफलप्रदे ॥
तुलस्यै नमः धूपमाघ्रापयामि ॥

साज्यमिति दीपम् ॥

नैवेद्यं षड्रसोपेतं फलसूपसमन्वितम् ।
सघृतं समधुक्षीरं गृहाण तुलसीश्वरि ॥
तुलस्यै नमः नैवेद्यं निवेदयामि ॥ आचमनीयम् ॥

पूगीफलेति तांबूलम् ॥

नीराजनं सुमाङ्गल्यं दिव्यज्योतिःसमन्वितम् ।
अज्ञानघ्ने गृहाण त्वं ज्ञानमार्गप्रदायिनि ॥

तुलस्यै नमः नीराजनम् ॥ प्रदक्षिणम् ।

प्रकृष्टपापनाशाय प्रकृष्टफलसिद्धये ।
प्रदक्षिणं करोमि त्वां सर्वाभीष्टफलप्रदे ॥

आयुरारोग्यमैश्वर्यं विद्याज्ञानं यशस्सुखम् ।
देहि देहि ममाभीष्टं प्रदक्षिणकृतोत्तमे ॥

नमस्ते तुलसीदेवि सर्वाभीष्टफलप्रदे ।
नमस्ते त्रिजगद्वन्द्ये नमस्ते लोकरक्षके ॥

तुलस्यै नमः नमस्कारान् समर्पयामि ॥

बृन्दास्थानस्थिते देवि दिव्यभोगप्रदे शुभे ।
पुष्पाञ्जलिं प्रदास्यामि स्वीकुरुष्वांबुजेक्षणे ॥

पुष्पाञ्जलिं समर्पयामि ॥

अद्य पूर्वोक्त···तिथौ अद्यकृततुलसीपूजान्ते क्षीरार्घ्यप्रदानं पायसपात्रदानं च करिष्ये ॥ इति संकल्प्य ॥

अर्घ्यप्रदानम ॥

तुलस्यै तु नमस्तुभ्यं नमस्ते फलदायिनि ।
इदमर्घ्यं प्रदास्यामि सुप्रीता वरदा भव ॥

तुलस्यै नमः इदमर्घ्यम् ॥

लक्ष्मीपतिप्रिये देवि तुलसी (?) दिव्यरूपिणि ।
इदमर्घ्यं प्रदास्यामि सुप्रीता वरदा भव ॥

तुलस्यै नमः इदमर्घ्यम् ॥

सर्वपापहरे देवि आश्रिताभीष्टदायिनि ।
मया दत्तं गृहाणेदं सुप्रीता वरदा भव ॥

तुलस्यै नमः इदमर्घ्यम् ॥

देहि मे विजयं देहि विद्यां देहि महेश्वरि ।
त्वामिति प्रार्थये नित्यं शीघ्रमेव फलं कुरु ॥

इति प्रार्थना ॥

अर्घ्यप्रदानानन्तरं ब्राह्मणान् संपूज्य पायसपात्रं दद्यात् ॥

इति बृन्दावनपूजाकल्पस्समाप्तः ॥

—

॥श्रीरस्तु॥

॥ १४. अथ अखण्डदीपपूजाकल्पः ॥

अखण्डदीपारोपविधिः —

सूतः—

अखण्डदीपारोपस्य विधिं वक्ष्ये मुनीश्वराः ।
शृण्वन्तु श्रद्धया यूयमाश्वयुग्दर्शतः परम् ॥
प्रतिपत्तिथिमारभ्य मासमेकं निरन्तरम् ।
अखण्डदीपस्संस्थाप्यः श्रीविष्णोः परितुष्टये ॥
सौवर्णं वा राजतं वा कांस्यं वाऽपि स्वशक्तितः ।
कृत्वा पात्रं गोघृतेन पूरयेदब्जतन्तुभिः ॥
वर्तीः कुर्यान्मासमध्ये विच्छेदो न भवेद्यथा ।
कल्पोक्तेन प्रकारेण पूजयेत्प्रत्यहं द्विजाः ॥
पूजान्ते च प्रतिदिनं दीपं दद्याद्द्विजन्मने ।
हैमं वा राजतं वाऽपि कांस्यं वाऽपि सदक्षिणम् ॥
भोजयेच्च द्विजं भक्त्या मासमेवं समाचरेत् ।
अशक्तावपि मासांते सह वा भोजयेद्द्विजान् ॥
विप्रानुज्ञां पुरा लब्ध्वा संपूज्य च गणाधिपम् ।
कुर्यात् सङ्कल्पमथ च वृद्धिश्राद्धं समाचरेत् ॥
पुण्याहं वाचयेत्तत्र दीपमारोपयेत्ततः ।
कलशं शंखमभ्यर्च्य पीठपूजां विधाय च ।
भक्त्या समर्चयेद्विप्रो ज्योतिष्येव जनार्दनम् ॥ इति ॥

तत्प्रकारः ॥ अशेषे...स्वीकृत्य ॥ मम जन्मा.. र्थं अज्ञाननिवृत्तिद्वारा सुज्ञानसिद्ध्यर्थं परलोके अन्धत्वनिवृत्यर्थं श्रीभूमिनीलासमेतमहाविष्णुप्रीत्यर्थं अद्य प्रतिपद्दिनमारभ्य आगामिदर्शपर्यन्तं पुराणोक्तां अखण्डदीपे महाविष्णुपूजां कर्तुं योग्यतासिद्धिमनुगृहाण ॥ (योग्यतासिद्धिरस्त्विति ब्राह्मणैरुक्ते) विघ्नेशं संपूज्य। सङ्कल्प्य। विघ्नेश्वरमुद्वास्य। अभ्युदयं कृत्वा। पुण्याहं वाचयित्वा। ग्रहप्रीतिं कृत्वा। कलशपूजां शङ्खपीठपूजाञ्च कृत्वा। दीपं प्रज्वाल्य वक्ष्यमाणप्रकारेण पूजयेत् ॥

ध्यायेच्चतुर्भुजं देवं शंखचक्रगदाधरम्।
श्रीभूमिनीलासहितं प्रसन्नमुखपङ्कजम् ॥

ध्यानम् ॥ प्राणप्रतिष्ठां कृत्वा ॥

आवाहयामि लक्ष्मीशमादिमध्यान्तवर्जितम्।
श्यामलं शान्तहृदयं ज्योतिष्यस्मिन् जनार्दनम् ॥

महाविष्णुं आवाहयामि ॥

मुक्तावैडूर्यखचितं मुकुन्द मुनिसेवित।
रत्नसिंहासनं चारु रमानाथ ददामि ते ॥

श्रीमहाविष्णवे नमः आसनं समर्पयामि ॥

पाद्यं गृहाण भगवन् पङ्कजाक्ष परात्पर।
हेमपात्रस्थितं शुद्धं हेतुत्रयविवर्जित ॥

श्रीमहाविष्णवे नमः पाद्यं समर्पयामि ॥

अर्घ्यं गृहाण भगवन्नच्युतानन्त केशव।

अक्षतादिसमायुक्तमक्षतं देहि मे पदम् ॥

श्रीमहाविष्णवे नमः अर्घ्यं समर्पयामि ॥

अतिशुद्धमिदं तोयं सुवर्णकलशस्थितम् ।
गृहाणाचमनार्थाय गोविन्द गरुडध्वज ॥

श्रीमहाविष्णवे नमः आचमनीयं समर्पयामि ॥

मधुवैरिन् महादेव महनीयपदांबुज ।
मधुपर्कं गृहाणाद्य महापापविनाशन ॥

श्रीमहाविष्णवे नमः मधुपर्कं समर्पयामि ॥

पञ्चामृतं गृहाणेदं पञ्चपातकनाशन ।
पञ्चाननसमाराध्य पञ्चबाणातिसुन्दर ॥

श्रीमहाविष्णवे नमः पञ्चामृतस्नानं समर्पयामि ॥

तुङ्गागोदावरीकृष्णागङ्गादिभ्यस्समाहृतम् ।
सलिलं विमलं देव कमलाधव गृह्यताम् ॥

श्रीमहाविष्णवे नमः स्नानं समर्पयामि ॥

पीतांबरयुगं देव दामोदर गुणार्णव ।
गृह्यतां करुणासिन्धो भक्त्या तुभ्यं समर्पितम् ॥

श्रीमहाविष्णवे नमः वस्त्रयुग्मं समर्पयामि ॥

यज्ञोपवीतं परमं पवित्रं पापनाशनम् ।
दत्तं मया गृहाणेदं धारणार्थं दयानिधे ॥

श्रीमहाविष्णवे नमः आभरणानि समर्पयामि ॥

श्रीगन्धं कुङ्कुमोपेतं श्रीनिवास जगत्पते ।
विष्णो विलेपनार्थाय गृहाण गरुडध्वज ॥
श्रीमहाविष्णवे नमः गन्धान् धारयामि ॥

अक्षतान् धवलान्देव शालिजान् शासितासुर ।
गृहाण कमलाकान्त देहि मे पदमक्षतम् ॥
श्रीमहाविष्णवे नमः अक्षतान् समर्पयामि ॥

पङ्कजैः पारिजातैश्च मन्दारैर्मल्लिकासुमैः ।
तुलसीदलसंयुक्तैः पूजयामि पुरातनम् ॥
पुष्पाणि समर्पयामि ॥

॥ अथांगपूजा ॥

पावनाय नमः पादौ पूजयामि	चतुर्भुजाय नमः भुजान् पूजयामि
गोविन्दाय नमः गुल्फौ ,,	कमलाधवाय नमः कण्ठं ,,
ज्योतिस्स्वरूपाय नमः जङ्घे ,,	चन्द्रवदनाय नमः चुबुकं ,,
जगत्कुक्षये नमः जानुनी ,,	मन्दस्मिताय नमः मुखं ,,
उपेन्द्राय नमः ऊरू ,,	नाशहीनाय नमः नासिकां ,,
गुणनिधये नमः गुह्यं ,,	पद्मनेत्राय नमः नेत्रे ,,
कमलाक्षाय नमः कटिं ,,	श्रुतिमध्याय नमः श्रोत्रे ,,
नारायणाय नमः नाभिं ,,	केशवाय नमः कपोलौ ,,
दामोदराय नमः उदरं ,,	लक्ष्मीप्रियाय नमः ललाटं ,,
माधवाय नमः मध्यं ,,	श्यामाङ्गाय नमः शिरः ,,
वनमालिने नमः वक्षः ,,	

सर्वेश्वराय नमः सर्वाण्यङ्गानि पूजयामि ॥

धूपं गृहाण देवेश दशाङ्गेन सुवासितम् ।
धूतपाप दयाराशे दुरितोन्मुक्तविग्रह ॥
श्रीमहाविष्णवे नमः धूपं आघ्रापयामि ॥

साज्यवर्तिसमायुक्तं पूज्यपाद पुरातन ।
दीपं गृहाण दयया ज्योतीरूप जगत्प्रभो ॥
श्रीमहाविष्णवे नमः दीपं दर्शयामि ॥

नानाभक्ष्यसमायुक्तं नानाफलसमन्वितम् ।
नैवेद्यं गृह्यतां देव नीरजाक्ष नमोऽस्तु ते ॥
श्रीमहाविष्णवे नमः नैवेद्यं निवेदयामि ॥

पूगीफलं सकर्पूरं नागवल्लीदलानि च ।
मुखवासाय गोविन्द गृह्यतां गरुडध्वज ॥
श्रीमहाविष्णवे नमः ताम्पूलं समर्पयामि ॥

कर्पूरैः कल्पितं देव करुणारससागर ।
नीराजनं नीरजाक्ष गृह्यतां गुणसागर ॥
श्रीमहाविष्णवे नमः नीराजनं समर्पयामि ॥

प्रकृष्टपापनाशाय प्रकृष्टपदलब्धये ।
प्रदक्षिणं करोमि त्वां ज्योतीरूप जनार्दन ॥
श्रीमहाविष्णवे नमः प्रदक्षिणानि समर्पयामि ॥

नमस्तेऽस्तु हृषीकेश नारायण नतावन ।
ज्योतीरूप जगन्नाथ जनार्दन नमो नमः ॥
श्रीमहाविष्णवे नमः नमस्कारान् समर्पयामि ॥

मन्त्रपुष्पं गृहाणेदं महादेवादिवन्दित ।
मधसूदन देवेश महापापविनाशन ॥
श्रीमहाविष्णवे नमः मन्त्रपुष्पं समर्पयामि ॥

नानारत्नसमायुक्तं वज्रनालसमन्वितम् ।
मुक्ताकेसरसंयुक्तं स्वर्णपुष्पं ददाम्यहम् ॥
श्रीमहाविष्णवे नमः सुवर्णपुष्पं समर्पयामि ॥

अखण्डदीपे देवेश तव पूजा कृता मया ।
सफला भवतु क्षिप्रं त्वत्प्रसादाज्जनार्दन ॥

ऋणपातकदौर्भाग्यव्याधीन् मे विनिवारय ।
पदं देहि परं देव प्रसीद पुरुषोत्तम ॥

प्रार्थना ॥

अद्य पूर्वोक्त...तिथौ श्रीभूमिनीलासमेतश्रीमहाविष्णुप्रीत्यर्थं महाविष्णुपूजान्ते क्षीरार्घ्यप्रदानं दीपदानञ्च करिष्ये। इति सङ्कल्प्य ॥

श्रीभूमिनीलासहित महाविष्णो दयानिधे ।
गृहाणार्घ्यं मया दत्तं ज्योतीरूप नमोऽस्तु ते ॥
श्रीभूमिनीलासमेताय नमः इदमर्घ्यम् ॥ एवं त्रिः ॥

अनेन दीपपूजनेन अर्घ्यप्रदानेन महाविष्णुः प्रीयताम् ॥ इत्युक्त्वा ब्राह्मणं संपूज्य ।

दीपं प्रज्वलितं साज्यमज्ञानविनिवारकम् ।
लक्ष्मीकरं ब्राह्मणाय विष्णुप्रीत्यै ददाम्यहम् ॥

इति दीपं दत्वा ब्राह्मणं भोजयित्वा स्वयं भुञ्जीत ॥

विच्छेदे सति दीपस्य कृच्छ्रमेकं समाचरेत् ।
सायं प्रातः प्रतिदिनं यथाशक्ति प्रपूजयेत् ॥

मासे पूर्णे महादीपं यथाविभवविस्तरम् ।
संपूज्य, च ततो दद्यादाचार्याय सदक्षिणम् ॥

दशदानं ततो दद्यात् भूरिदानं यथाबलम् ।
ब्राह्मणान् पूजयेत्पश्चात् षड्रसैरोदनैस्तथा ॥

एवं यः कुरुते भक्त्या सर्वपापैः प्रमुच्यते ।
भुक्त्वा भोगान् स देहान्ते विष्णोस्सायुज्यमाप्नुयात् ॥

इत्यखण्डदीपपूजाकल्पः ॥

॥ श्रीरस्तु ॥

॥ १५. अथ कावेरीपूजाविधिः ॥

आदावनुज्ञा ॥ विघ्नेश्वरपूजां कृत्वा ॥ शुभे शोभनमुहूर्ते... शुभतिथौ मम समस्तपापक्षयार्थं सौमङ्गल्यसौभाग्यसन्तानसौख्यायुरारोग्यसिद्ध्यर्थञ्च श्रीकावेरीपूजां करिष्ये ॥ विघ्नेश्वरमुद्वास्य ॥ तदङ्गं कलशपूजां करिष्ये। कलशपूजाप्रभृति घण्टानादादि ध्यानान्तं कृत्वा॥ इमं मे गङ्गे यमुने सरस्वति शुतुद्रि स्तोमगँ् स च ता परुष्णिया । असिक्निया मरुद्वृधे वितस्तयार्जीकीये शृणु ह्यासुषो मया ॥ आपो वा इदगँ् सर्वं विश्वा भूतान्यापः प्राणा वा आपः पशव आपोऽन्नमापोऽमृतमापस्संम्राडापो विराडापः स्वराडापश्छन्दाँस्यापो ज्योतीगँ्ष्यापो यजूगँ्ष्यापस्सत्यमापस्सर्वा देवता आपो भूर्भुवस्सुवराप ओं ॥

ओं भूः कावेरीमावाहयामि ॥

ओं भुवः इत्यादिना कावेरीमावाह्य ॥

मरुद्वृधा महालक्ष्मीस्सह्यकन्या सरस्वती ।
अगस्त्यपत्नी कावेरी लोपामुद्रा वरप्रदा ॥
कमण्डलुसमुत्पन्ना सर्वतीर्थाधिदेवता ।
विरजा दक्षिणा गङ्गा ब्रह्मविष्णुशिवात्मिका ॥
चतुर्विधफलोद्धात्री चतुराननकन्यका ।
सर्वाभीष्टप्रदात्री च नाम्नां षोडशकं स्मृतम् ॥
एभिर्नामपदैर्नित्यं पूजयेद्भक्तिमान्नरः ॥

ॐ—अच्छस्वच्छलसद्दुकूलवसनां पद्मासनाध्यासिनीं
हस्तन्यस्तवराभयाब्जकलशां राकेन्दुकोटिप्रभाम् ।
भास्वद्भूषणगन्धमाल्यरुचिरां चारुप्रसन्नाननां
श्रीगङ्गादिसमस्ततीर्थनिलयां ध्यायामि कावेरिकाम् ॥

कावेरीं ध्यायामि ॥

श्रीकण्ठविश्वेश्वरसंन्निभानि लिङ्गानि यद्रोधसि लक्षकोट्यः ।
जलप्रवाहेऽपि च कोटिकोट्यः कवेरजायाश्शिवमूर्तयस्स्युः ॥

पयांसि तीर्थानि शिलाश्च देवता दिवौकसो वालुकतां प्रपन्नाः ।
अतो नदी सह्यगिरिप्रसूता सरित्सु मुख्या मनुजैरलभ्या ॥

कावेरीमावाहयामि ॥

आदावादिविधातृमानससुता पश्चात्कवेरात्मजा
भूयः कुंभभवस्य तस्य दयिता तस्मान्नदीरूपिणी ।
श्रीगङ्गातुलकुंभघोणविलसन्मायूरमध्यार्जुने
श्वेतारण्यमुखस्थलेषु महिता सह्याद्रिजा दृश्यते ॥

कावेर्यै नमः रत्नासनं समर्पयामि ॥

मरुद्वृधे महादेवि महाभागे मनोहरे ।
सर्वाभीष्टप्रदे लोकमातः पाद्यं ददामि ते ॥

मरुद्वृधे मान्यजलप्रवाहे कवेरकन्ये नमतां शरण्ये ।
मान्ये जगत्पूज्यतमप्रभावे कावेरि कावेरि मम प्रसीद ॥

कावेर्यै नमः पाद्यं समर्पयामि ॥

सह्यपादोद्भवे देवि श्रीगङ्गोत्संगगामिनि ।
कावेरीनामविख्याते गृहाणार्घ्यं नमोऽस्तु ते ॥

प्राचीनवाक्कीर्तितपुण्यकीर्ते कल्याणि भक्तेप्सितदानधुर्ये ।
कुंभोद्भवप्रेरितशुंभितार्थे कावेरि कावेरि मम प्रसीद ॥
कावेर्यै नमः अर्घ्यं समर्पयामि ॥

श्रीसह्यशैलतनये सर्वासह्यनिवारिणि ।
प्रसादं कुरु मे देवि प्रसन्ना भव सर्वदा ॥
संसारविस्रंसिनि संस्कृतानां सर्वाघसंहारिणि सर्ववन्द्ये ।
समस्तलोकैकशरण्यमूर्ते कावेरि कावेरि मम प्रसीद ॥
कावेर्यै नमः अचमनीयं समर्पयामि ॥

तुलामासे तु कावेरी सप्ततीर्थाश्रिता नदी ।
पंचपातकसंहर्त्री वाजिमेधफलप्रदा ॥
भक्तानुकंपे मुनिभागलक्ष्मीर्निलये जगन्मङ्गलदानशीले ।
निरञ्जने दक्षिणदेशगङ्गे कावेरि कावेरि मम प्रसीद ॥
कावेर्यै नमः पञ्चामृतस्नानं समर्पयामि ॥

कावेरीतीरजन्मानो मृगपक्षिमहीरुहाः ।
तद्वारिशीतवातैश्च स्पृष्टा मुक्तिं प्रयान्ति वै ॥
मोक्षश्रियोपासितपादपद्मे निलये शरीरद्रुहिणस्वरूपे ।
सदाशिवे धातृवरप्रसादे कावेरि कावेरि मम प्रसीद ॥
कावेर्यै नमः शुद्धोदकस्नानं समर्पयामि ॥

कवेरकन्ये कावेरि निम्नगानाथनायकि ।
वस्त्राणि वसभूवस्ते भुक्तिमुक्तिप्रदायिनि ॥
देवर्षिपूज्ये विमले नदीशे परात्परे भावितनित्यपूर्णे ।

समस्तलोकोत्तमतीर्थमातः कावेरि कावेरि मम प्रसीद ॥
कावेर्यै नमः वस्त्रं समर्पयामि ॥

सर्वयज्ञाश्रयतटे सर्वयज्ञसहायिनि ।
यज्ञाङ्गसंभवे देवि सर्वयज्ञफलप्रदे ॥

कलिप्रभूताखिलदोषनाशे विशुद्धविज्ञानजलप्रवाहे ।
अखण्डकह्लार अखण्डपूरे कावेरि कावेरि मम प्रसीद ॥
कावेर्यै नमः यज्ञोपवीतं समर्पयामि ॥

जय देवि जगन्मातः लोपामुद्रे पुरातने ।
जय भद्रे भवोद्धारे मङ्गले मङ्गलप्रदे ॥

प्रसीद कारुण्यगुणाभिरामे प्रसीद कल्याणवरप्रवाहे ।
प्रसीद कामादिहरे पवित्रे कावेरि कावेरि मम प्रसीद ॥
कावेर्यै नमः हरिद्राकुङ्कुमं समर्पयामि ॥

चन्दनागरुकस्तूरीहिमवालुककेसरैः ।
रांकवैस्सांकवैर्युक्तं गन्धं स्वीकुरु सह्यजे ॥

आद्ये परे चिन्मयपुण्यपादे पचेलिमप्रौढकवेरभाग्ये ।
अनन्यसाधारणवैभवाढ्ये कावेरि कावेरि मम प्रसीद ॥
कावेर्यै नमः गन्धान् धारयामि ॥

यस्यां सकृत् स्नानमात्रान्नरोऽक्षय्यफलं लभेत् ।
नक्षत्रमालिवच्छुभ्रामक्षतैरर्चयाम्यहम् ॥
कावेर्यै नमः अक्षतान् समर्पयामि ॥

किरीटहारकेयूरकुण्डलांगदकंकणैः ।
हंसकैर्मेखलाद्यैश्च भूषये त्वां मरुद्वृधे ॥
कावेर्यै नमः आ रणानि समर्पयामि ॥

तार्टकं कण्ठसूत्रञ्च सिन्दूरं कज्जलादिकम् ।
सौमङ्गल्यप्रदे देवि गृहाणागस्त्यवल्लभे ॥
कावेर्यै नमः तार्टकादीनि समर्पयामि ॥

तुलसीबिल्वमन्दारैः कुशाग्रशतपत्रकैः ।
इन्दीवरैः कोकनदैर्हल्लकैः कमलैरपि ॥
कह्लारैः पुण्डरीकैश्च पुष्पैः सौगन्धिकादिभिः ।
जातीचंपकपुन्नागमल्लिकाकेतकादिभिः ॥
सुरभिद्रोणवासन्तीगन्धराजकदंबकैः ।
पुष्पैस्सह्यसुते मातर्वेण्यलङ्करणं कुरु ॥
बहुजन्मकृतानेकवासनावासितात्मभिः ।
दिव्यैस्सुमनसैः पूज्यां पूजयेत्पुष्पजातिभिः ॥

॥ अथांगपूजा ॥

मरुद्वृधायै नमः पादौ पूजयामि	कमंडलुसमुत्पन्नायै बाहून् पूजयामि
महालक्ष्म्यै नमः गुल्फौ ,,	सर्वतीर्थाधिदेवतायै कण्ठं ,,
सह्यकन्यायै नमः जङ्घे ,,	विरजायै नमः नासिकां ,,
सरस्वत्यै नमः जानुनी ,,	दक्षिणगङ्गायै नमः श्रोत्रे ,,
अगस्त्यपत्न्यै नमः मध्यं ,,	ब्रह्मविष्णुशिवात्मिकायै नेत्रे,,
कावेर्यै नमः नाभिं ,,	चतुर्विधफलोद्धार्यै वक्त्रम् ,,
लोपामुद्रायै नमः हृदयं ,,	चतुराननकन्यकायै शिरः ,,
वरप्रदायै नमः स्तनौ ,,	

सर्वाभीष्टप्रदात्र्यै नमः सर्वाण्यङ्गानि पूजयामि ॥

अथ कावेर्यष्टोत्तरशतनामावलिः ॥

ॐ अनन्तगुणगंभीरायै नमः
अर्कपुष्करसेवितायै नमः
अमृतस्वादुसलिलायै नमः
अगस्त्यमुनिनायक्यै नमः
आशान्तकीर्तितिलकायै नमः
आशुगागमनवर्धिन्यै नमः
इतिहासपुराणोक्तायै नमः
ईतिबाधानिवारिण्यै नमः
उन्मत्तजनदूरस्थायै नमः
ऊर्जितानन्तदायिन्यै नमः १०
ऋषिसङ्घसुसंवीतायै नमः
ऋणत्रयविमोचनायै नमः
लुप्तधर्मजनोद्धारायै नमः
लूनभावविवर्जितायै नमः
एधिताखिललोकश्रियै नमः
ऐहिकामुष्मिकप्रदायै नमः
ओंकारनादनिनदायै नमः
ओषधीकृतजीवनायै नमः
औदार्यगुणनिर्दिष्टायै नमः
औदासीन्यनिवारिण्यै नमः २०
अन्तःकरणसंसेव्यायै नमः
अच्छस्वच्छजलाश्रयायै नमः
कपिलाख्यनदीसख्यै नमः
करुणापूर्णमानसायै नमः
ॐ कावेरीनामविख्यातायै नमः
कामितार्थफलप्रदायै नमः
कुंभघोणक्षेत्रनाथायै नमः
कौतुकप्रथमप्रभायै नमः
खगराजरथोत्साहरङ्गस्थलसुशोभितायै नमः
खगावलिसमाक्रान्तकल्लोलावलिमण्डितायै नमः ३०
गजारण्यसुविस्तीर्णप्रवाहजनमोहिन्यै नमः
गायत्र्याख्यशिलामध्यायै नमः
गरुडासनभक्तिदायै नमः
घनगंभीरनिनदनिर्जरप्राप्तनिर्झरायै नमः
चन्द्रपुष्करमध्यस्थायै नमः
चतुराननपुत्रिकायै नमः
चोलदेशजनोद्धारग्रीष्मकालप्रवाहिन्यै नमः
चुंचुक्षेत्रसंमानितायै नमः
छद्मदोषनिवारिण्यै नमः
जंबूद्वीपसरिच्छ्रेष्ठनदीनदगरीयस्यै नमः ४०
झङ्कारनादसंमृष्टषट्पदालिसमाकुलायै नमः

ॐ ज्ञानैकसाधनपरायै नमः
ज्ञप्तिमात्रात्महारिण्यै नमः
टिट्टिभारावसव्याजदिविजस्तुति-
पात्रिण्यै नमः
ठङ्कारनादसंभेदजर्झरीकृतपर्वतायै
डाकिनीशाकिनीसङ्घनिवारणस-
रित्तटायै नमः
ढक्कानिनादपारीणपार्वतीसमाश्रि-
तायै नमः
णान्तवाच्यद्विजाष्टांगयोगसाधन-
तत्परायै नमः
तरङ्गावलिसंविद्धमृदुवालुकाशो-
भितायै नमः
तपस्विजनसत्कारनिषेवितशिला-
सनायै नमः ५०

तापत्रयतरून्मूलगङ्गादिभिरभि-
ष्टुतायै नमः
थान्तप्रमथसंसेव्यसांबसान्निध्य-
कारिण्यै नमः
दयादाक्षिण्यसत्कारशीललोकसु-
भावितायै नमः
दाक्षिणात्यजनोद्धारनिर्विचारदया-
न्वितायै नमः
धनमानमदान्धादिमर्त्यनिर्वर्तन-
प्रियायै नमः

ॐ नमज्जनोद्धारशीलायै नमः
निमज्जज्जनपावनायै नमः
नागारिकेतुनिलयायै नमः
नानातीर्थाधिदेवतायै नमः
नारीजनमनोल्लासायै नमः ६०
नानारूपफलप्रदायै नमः
नारायणकृपारूपायै नमः
नादब्रह्मस्वरूपिण्यै नमः
पराभूतसमस्ताघायै नमः
पशुपक्ष्यादिजीवनायै नमः
पापतूलाग्निसदृशायै नमः
पापिष्ठजनपावनायै नमः
फणीन्द्रकीर्तितकलायै नमः
फलदानपरायणायै नमः
बहुजन्मतपोयोगफलसंप्राप्तदर्श-
नायै नमः ७०

बाहुरूपद्विपार्श्वस्थस्वमातृकजला-
र्थिनां कलमक्षेत्रशाल्यन्नदान-
निर्जितवित्तपाय नमः
भगवत्कृतसन्तोषायै नमः
भास्करक्षेत्रगामिन्यै नमः
भागीरथीसमाक्रान्ततुलामास-
जलाश्रयायै नमः
मज्जद्दुर्जनप्राग्जन्मदुर्जयांहः-
प्रमार्जन्यै नमः

माघवैशाखादिमाघस्नानस्मरण-
सौख्यदायै नमः
यज्ञदानतपःकर्मकोटिपुण्यफल-
प्रदायै नमः
यक्षगन्धर्वसिद्धाद्यैरभिष्टुतपदद्व-
यायै नमः
रघुनाथपदद्वन्द्वविराजितशिला-
तलायै नमः
रामनाथपुरक्षेत्रकामधेनुसमाश्रि-
तायै नमः ८०
लवोदकस्पर्शमात्रनिर्वाणपददा-
यिन्यै नमः
लक्ष्मीनिवाससदनायै नमः
ललनारत्नरूपिण्यै नमः
लघूकृतस्वर्गभोगायै नमः
लावण्यगुणसागरायै नमः
वह्निपुष्करसान्निध्यायै नमः
वन्दिताखिललोकपायै नमः
व्याघ्रपादक्षेत्रपरायै नमः
व्योमयानसमावृतायै नमः
षट्कालवन्द्यचरणायै नमः ९०
षट्कर्मनिरतप्रियायै नमः
ॐ षडास्यमातृसंसेव्यायै नमः
षडूर्मिजितसोर्मिकायै नमः
सकृत्स्मरणसंशुद्धतापत्रयजना-
श्रितायै नमः
सज्जनोद्धारसंधानसमर्थस्वप्रवा-
हिन्यै नमः
सरस्वत्यादिदेवीभिरभिवन्दित-
निर्झरायै नमः
सह्यशैलसमुद्भूतायै नमः
सह्यासह्यजनप्रियायै नमः
सङ्गमक्षेत्रसामीप्यायै नमः
स्ववशार्थचतुष्टयायै नमः १००
सौभरिक्षेत्रनिलयायै नमः
सौभाग्यफलदायिन्यै नमः
संशयाविष्टदूरस्थायै नमः
सांगोपांगफलोदयायै नमः
हरिब्रह्मेशलोकेशसिद्धवृन्दारक-
वनितायै नमः
क्षेत्रतीर्थादिसीमान्तायै नमः
क्षपानाथसुशीतलायै नमः
क्ष्मातलाखिलानन्तक्षेमश्रीविज-
यावहायै नमः

इति कावेर्यष्टोत्तरशतनामावलिः ॥

कावेर्यै नमः पुष्पाणि समर्पयामि ॥

रङ्गत्रयोत्सङ्गविराजमाने ब्रह्मादिकूटाश्रिततीर्थगर्भे ।
समस्तसिद्धाश्रमरम्यतीर्थे कावेरि कावेरि मम प्रसीद ॥

दशाङ्गगुग्गुलोपेतस्सुगन्धो घ्राणतर्पणः ।
मरुद्वृधेऽम्ब कावेरि धूपोऽयं ते समर्पितः ॥

कावेर्यै नमः धूपमाघ्रापयामि ॥

तुलागतेऽर्के तटिनीवराभिर्गङ्गादिभिस्सेवितपादपद्मे ।
त्रिकोटितीर्थाश्रमपुष्कराढ्ये कावेरि कावेरि मम प्रसीद ॥

आपो ज्योतिस्त्वमस्यंब कुंभसंभवतेजसा ।
तेजःप्रदात्रि कावेरि दीपोऽयं प्रतिगृह्यताम् ॥

कावेर्यै नमः दीपं समर्पयामि ॥

ददासि कुल्याभिरनर्घधान्यान्यशेषचोलीयजनस्य देवि ।
भुक्तिप्रदे मुक्तिविधानदक्षे कावेरि कावेरि मम प्रसीद ॥

अन्नं चतुर्विधं गुह्यं शाकव्यञ्जनसंयुतम् ।
सफलं सघृतं भुंक्ष्व कावेरि तटितां वरे ॥

कावेर्यै नमः नैवेद्यम् ॥ पानीयम् ॥ उत्तरापोशनम् ॥

निजाभिधानश्रवणामृतानां निश्शेषपापक्षयकारिणी त्वम् ।
निदाघतृष्णादिनिरासदक्षे कावेरि कावेरि मम प्रसीद ॥

पूगीफलेति तांबूलम् ॥

पराशरागस्त्यवसिष्ठमुख्यैर्महर्षिभिर्मान्यतपोभिरम्ब ।
त्वमाश्रितानां फलसिद्धिहेतुः कावेरि कावेरि मम प्रसीद ॥

सर्वतीर्थैस्तुलामासे त्वं नीराजितपादुका ।
नीराजयामि भक्त्या त्वां कावेर्यंब मरुद्वृधे ॥

कावेर्यै नमः नीराजनं समर्पयामि ॥

मायूरमध्यार्जुनकुंभघोणश्रीरङ्गचुंचुस्थलघट्टगा त्वम् ।
सह्योद्भवे सिन्धुयुते स्वतन्त्रे कावेरि कावेरि मम प्रसीद ॥

प्रदक्षिणं करोमि त्वां पुरुषार्थप्रदायिनि ।
दक्षिणावर्तका श्रीनिवासप्रीते मरुद्वृधे ॥

कावेर्यै नमः प्रदक्षिणं समर्पयामि ॥

ब्रह्मादिभिर्देववरैस्त्रिसंध्यं वसिष्ठपूर्वैर्मुनिभिर्वरिष्ठैः ।
नित्यं गजारण्यगतैर्निषेव्ये कावेरि कावेरि मम प्रसीद ॥

नमस्ते तटितां मुख्ये निगमागमसंस्तुते ।
पाहि पाह्यंब कावेरि प्रपन्नं मां कृपादृशा ॥

कावेर्यै नमः नमस्कारान् ॥

सुवासिनीनाञ्च निजाश्रितानां पतिप्रियत्वं च सुतादिवर्गम् ।
दास्यस्युदारं बहुभोगभाग्यं कावेरि कावेरि मम प्रसीद ॥

सुवासिनीभ्यः ब्राह्मणादिभ्यः वायनदानानि ॥

निजप्रवाहप्लवलब्धपुण्यप्रसिद्धसत्कर्मफलोदयेन ।
नृणामभीष्टार्थविधायिनी त्वं कावेरि कावेरि मम प्रसीद ॥

पापक्षयं पारिशुध्यमायुरारोग्यमेव च ।
सौभाग्यमपि सन्तानं ज्ञानं देहि मरुद्वृधे ॥

इति प्रार्थ्य ॥

छत्रचामरादिना संपूज्य त्रिंशद्दिनं पूजां कृत्वा ब्राह्मणानां सुवासिनीनां अन्नदानं कृत्वा दक्षिणां दत्वा आशिषो वाचयित्वा स्वयं बन्धुभिःसह भुञ्जीत ॥

इति कावेरीपूजाविधिः ॥

॥ श्रीरस्तु ॥

॥ १६. अथ माघस्नानविधिः ॥

माघमासे रटन्त्यापः किञ्चिदभ्युदिते रवौ ।
ब्रह्मघ्नं वा सुरापं वा कं पतन्तं पुनीमहे ॥

दुःखदारिद्र्यनाशाय श्रीविष्णोस्तोषणाय च ।
प्रातः स्नानं करोम्यद्य माघे पापविनाशनम् ॥

मकरस्थे रवौ माघे गोविन्दाच्युत माधव ।
स्नानेनानेन मे देव यथोक्तफलदो भव ॥

कृष्णार्जुन निमज्जामि प्रभातेऽस्मिन्छुभोदके ।
अनेन माघस्नानेन सुप्रीतो मां समुद्धर ॥

प्रत्यहं सूर्यार्घ्यमन्त्रः ॥

सवित्रे प्रसवित्रे च परं धाम जले मम ।
त्वत्तेजसा परिभ्रष्टं पापं यातु सहस्रधा ॥

सवित्रे नमः इदमर्घ्यं ॥ त्रिः ॥

त्रिवेण्यर्घ्यम् ॥

गङ्गायमुनयोर्मध्ये यत्र गुप्ता सरस्वती ।
त्रैलोक्यवन्दिते देवि त्रिवेण्यर्घ्यं ददामि ते ॥

त्रिवेण्यै नमः इदमर्घ्यं ॥ त्रिः ॥

प्रार्थना ॥

प्रभाकर जगन्नाथ दिवाकर नमोऽस्तु ते ।
परिपूर्णं कुरुष्वेदं माघस्नानं मया कृतम् ॥

इति सूर्यं प्रार्थयेत् ॥

---

१७. रथसप्तमीस्नानमन्त्राः ॥

यदा जन्मकृतं पापं मया जन्मसु जन्मसु ।
तन्मे रोगञ्च शोकञ्च माकरी हन्तु सप्तमी ॥
एतज्जन्मकृतं पापं यच्च जन्मान्तरार्जितम् ।
मनोवाक्कायजं पापं ज्ञाताज्ञाते च ये पुनः ॥
इति सप्तविधं पापं स्नानान्मे सप्तसप्तिके ।
सप्तव्याधिसमायुक्तं हर माकरि सप्तमि ॥

अर्घ्यमन्त्राः ॥

सप्तसप्तिवहप्रीत सप्तलोकप्रदीपन ।
सप्तमीसहितो देव गृहाणार्घ्यं दिवाकर ॥

दिवाकराय नमः इदमर्घ्यम् ॥ त्रिः ॥

समनन्तराष्टमी भीष्माष्टमी ॥

तत्र अर्घ्यमन्त्राः ॥

वैयाघ्रपादगोत्राय साङ्कृतिप्रवराय च ।
गङ्गापुत्राय भीष्माय आजन्मब्रह्मचारिणे ॥

भीष्माय नमः इदमर्घ्यम् ॥ त्रिः ॥

अपुत्राय जलं दद्मि नमो भीष्माय वर्मणे ।
भीष्मश्शान्तनवो वीरस्सत्यवादी जितेन्द्रियः ।
आभिरद्भिरवाप्नोतु पुत्रपौत्रोचितां क्रियाम् ॥

भीष्माय नमः इदमर्घ्यम् ॥

वसूनामवताराय शन्तनोरात्मजाय च ।
अर्घ्यं ददामि भीष्माय आबाल्यब्रह्मचारिणे ॥

भीष्माय नमः इदमर्घ्यम् ॥ त्रिः ॥

इदं मध्याह्नव्यापिन्यामष्टम्यां जीवत्पितृकेणापि कार्यम् ॥
गे कृते संवत्सरोपात्तदुरितनाशः, अकृते पुण्यनाश इत्युक्तेः ॥

इति भीष्मतर्पणविधिः ॥

इति व्रतरत्नाकरे प्रथमो भागः ॥

— —

Printed at the Vavilla Press, Madras:—1950.

॥ क्रय्यसंस्कृतपुस्तकानि ॥

✢ वैदिकग्रन्थाः ✢

		रू.	अ.
पञ्चसूक्तानि सस्वराणि	... ...	०	३
रुद्रनमकचमकम्—सस्वरम्	... ...	०	३
सन्ध्यावन्दनम् (याजुषम्)	... ...	०	३
दर्शतर्पणम्	... ...	०	[illegible]
पञ्चायतनपूजा	... ...	०	[illegible]
तैत्तिरीयोपनिषत्—ब्रह्ममेधसहिता सस्वरा	...	१	[illegible]
त्रिकाण्डसारार्थबोधिनी—(श्रीविद्यामन्त्रभाष्यात्मिका)	...	१	[illegible]
महात्रिपुरसुन्दरी पूजाकल्पः	... ...	०	१[illegible]
वैष्णवाह्निकम् (याजुषम्)	... ...	०	[illegible]
स्मार्ताह्निकम्	... ...	०	१[illegible]
Vedic Law of Marriage	... ...	१	[illegible]

✢ वेदान्तग्रन्थाः ✢

		रू.	अ.
श्रीमद्भगवद्गीता—(मूलमात्रम्)	... ...	०	[illegible]
श्रीमद्भगवद्गीता, महादेवशास्त्रिकृतया शङ्करभाष्यानुसारिण्या आङ्गलव्याख्यया सहिता	... ...	१	[illegible]
श्रीमद्भगवद्गीता—संस्कृतद्रमिडश्लोकैः द्रमिडतात्पर्येण च सहिता		२	८
ब्रह्मसूत्राणि—(मूलम्)	... ...	०	४
उपनिषत्सु Minor Upanishads Vol I.	... ...	१	४
दक्षिणामूर्तिस्तोत्रम् ,, Vol II.	... ...	२	[illegible]
विवेकचूडामणिः	... ...	०	[illegible]

✢ तर्क, व्याकरणग्रन्थाः ✢

		रू.	अ.
तर्कसङ्ग्रहः, न्यायबोधिनी—निरुक्ति—पदकृत्यसहितः	...	१	[illegible]
शब्दमञ्जरी—(दृढपत्रात्मिका)	... ...	०	१२
तिङन्तमञ्जरी—धातुपाठसहिता	... ...	०	६
लघुसिद्धान्तकौमुदी	... ...	१	[illegible]

वाविळ्ळ रामस्वामिशास्त्रुलु अण्ड् सन्स्,
२९१, एस्प्लनेड्, चेन्नपुरी.